Licence No. 644 dated 9-3-1949.

VOL. VI. NOS. 1 & 2 JANUARY - APRIL 1950

JOURNAL

OF THE

TRAVANCORE UNIVERSITY ORIENTAL MANUSCRIPTS LIBRARY

TRIVANDRUM



[Annual Subscription Rs. 4]

TRIVANDRUM :
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1950

CONTENTS

॥ श्रीः ॥

शतानन्दकवीन्द्रसूनुविरचितं

भीमपराक्रमम् ।

गौरीबाहुलताशङ्खवलयांशुभिरङ्कमा ।
कृष्णोऽप्यर्जुनतां नीतः कण्ठो भीमस्य पातु वः ॥ १ ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः —(सहर्षम्) अयमपूर्वाभ्युदयवृत्तान्तः प्राणसमायै समुपहर्तव्यः । यतः —

उत्सवस्य परा काष्ठा सूक्तिलाभो हि तद्विदाम् ।
सुहृद्भिः संविभागेन स सहस्रगुणायते ॥ २ ॥

(परिक्रम्य नेपथ्यं प्रति)

आर्ये ! यदि कल्याणाकर्णनकुतूहलि ते श्रवणयुगलम्, तदितस्तावदागम्यताम् ।

(प्रविश्य)

नटी — (क) एस ह्मि अवहिदा । अय्यो कहेदु ।

(क) एषास्म्यवहिता । आर्यः कथयतु ।

१. 'भ्युदयपूर्वाभ्युदय' ख.

२. 'सुहृद्भ्यः' ख.

३. 'कहहिदु' ख.

सूत्रधारः — आर्ये ! ननु स्मरसि [1]यत् [2]सिद्धार्थकनाम्ना त्रैकाल्यविदुषा कार्तान्तिकेन मां प्रत्यादिष्टम् —

करिष्यते भीमपराक्रमाख्यं
काव्यं शतानन्दकवीन्द्रसूनुः ।
मनीषिणां संसदि [3]तत्प्रयोक्ता
त्वं सम्पदां धाम [4]भविष्यसीति ॥ ३ ॥

नटी — (क) जाणामि [5]जाणामि एदम् । ता किं दाणि कइणा तं णिबन्धणं समाविदम् ।

सूत्रधारः — आर्ये ! समापितं समर्पितं च मम करे, तदिद-मुक्तं च —

अणुमपि गुणमुच्चैः कुर्वतां पण्डितानां
विवृणु तदिदमग्रे नेतरेषां कदाचित् ।
सफलयति यथाब्धौ शुक्तिरभ्रस्य वृष्टिं
प्रभवति न [6]तथा हि क्वापि शम्बूकयूथम् ॥ ४ ॥

अपि च —

ये सूक्तीन्दुकलाकलङ्कजनका ये गाढगर्वज्वरा
ये वा केवलतर्ककर्कशधियः साक्षाच्च ये श्रोत्रियाः ।
ये च द्वेषमषीमलीमसधियस्तान् प्राज्ञगोष्ठीरस-
प्रौढप्राड्वग्रहान् परिहरन् [7]वाचां प्रचारं कुरु ॥ ५ ॥

(क) जानामि जानाम्येतद् । तत् किमिदानीं कविना तन्निबन्धनं समापितम् ।

---

१. 'यद्' इति खपाठे नास्ति ।
२. 'सिद्धाकनाम्ना' क.
३. 'तत्प्रयोगात्' ख.
४. 'करिष्यसीति' ख.
५. द्वितीयं 'जाणामि' ख. पाठे नास्ति ।
६. 'तथापि' ख.
७. 'वाचः प्रचारं' ख.

नटी — (क) अय्य! सोहअम् । अह्माणं मणोरहकप्पपाअवो फुप्फिओ ।

सूत्र — आर्ये ननु फलित एव । यतस्तदभिनयकुतूहलिन्या विद्वत्परिषदा साम्प्रतमित्थमाज्ञप्तः[1] ।

काव्यकोशनिगूढानि ग्रथितानि नवैर्गुणैः ।
उद्घाट्य रसरत्नानि त्वं नः सन्दर्शयेरिति ॥ ६ ॥

नटी — (ख) अणुग्गहीद[2] ह्म । (विमृश्य सश्लाघम्) सव्वदा सिलहणिज्जं[3] एदं णिबन्धणं । जेण सच्चवअणो आदेसओ, किचि भाअणं कई, पेक्खणविणोदिणो अय्यामिस्सा सफळमणोरहा अह्मे (वि) संवुत्ता ।

सूत्र — आर्ये[4] ! नन्वेवम्

अपि स्वार्थे प्रवृत्तानां धीमतां सदुपक्रमः ।
बहूनामुपकाराणां यान्ति कारणतां फले ॥ ७ ॥

(नेपथ्ये)

भद्र ! कल्याणभाजनं भूयाः यतो भद्रमिदमुदाहरसि[5] ।

(क) आर्य शोभनम् । अस्माकं मनोरथकल्पपादपः पुष्पितः ।

(ख) अनुगृहीताः, स्मः । सर्वथा श्लाघनीयमेतद् निबन्धनम् । येन सत्यवचन आदेशकः कीर्तिभाजनं कविः, प्रेक्षणविनोदिनः आर्यमिश्राः, सफलमनोरथा वयमपि संवृत्ताः ।

---

१. 'सांप्रतमह्यमिदमाज्ञप्त:' ख.
२. 'हिद ह्यि' ख.
३. 'सिळाहणिज्जं' ख.
४. 'आर्ये' इति खपाठे नास्ति ।
५. 'इदम्' इति खपाठे नास्ति ।

नटी — (क) अय्य! को एसो तुह्माणं वअणं अहिणन्दइ ।

सूत्र — (विलोक्य) आर्ये ! एष खलु भरतकुलधुरन्धरस्य धर्मराजस्य पुरोहितो धौम्योऽस्मद्वचनं[1] श्लाघयन्निव एवाभिवर्तते । तदावामनन्तरकरणीयेषु भरतान्[2] नियोक्तुमितो गच्छावः ।

(इति निष्क्रान्तौ ।)

स्थापना ॥

(ततः प्रविशति धौम्यः ।)

धौम्यः — (सश्लाघम्) 'अपि स्वार्थे प्रवृत्तानां—' इति चतुरमुपन्यस्तम् । तथाहि ज्येष्ठपाण्डवस्यायमारम्भः ।

निष्पत्तौ राजसूयस्य बन्धमोक्षे च भूभृताम् ।
भीमस्य च प्रतिज्ञा(भ्युल्लङ्घने) मूलतां गतः ॥ ८ ॥

तत् सर्वथा मयाप्यमुष्य निष्पत्तये यथाशक्ति प्रयतितव्यम् । नेपथ्यं[3] प्रति) वत्स ! मेधातिथे ! । (प्रविश्य)

शिष्यः — (ख) अयम्हि ।

धौम्यः — वत्स ! कष्टमिदं पारतन्त्र्यं नाम । तत्रापि,

(क) आर्य ! क एष युष्माकं वचनमभिनन्दति ।

(ख) अयमस्मि ।

---

१. 'मद्वचनं' ख.

२. 'भरतं' क.

३. 'नैपथ्यं' ख.

नृपाणां[1] कल्याणं विपदुपगमे प्रार्थ्यमनिशं
विपर्यासे दैवाज्जगति विततं सत्यमयशः ।
परार्थे भर्तव्यः पशुभिरिव भारः खलु महा-
नहो पौरोहित्यं न च भवति भोगो न च तपः ॥ ९ ॥

शिष्यः — (क) सुठ्ठु भअवं भणादि ।

धौम्यः— वत्स! साधवः सर्वप्रकारेणाप्यनुग्राह्या इति प्रतिपन्नपाण्डवपौरोहित्यभारा वयं वर्तामहे । सम्प्रति च तत्प्रत्ययादहं रहसि राज्ञा विज्ञापितः । यदुत[2] जनार्दनवृकोदरधनञ्जयानामविलम्बितमनुष्ठीयतां प्रास्थानिकं शान्तिकर्मेति । तदचिरेणैव[3] समित्कुशादीनि होमसाधनानि सिद्धार्थकदूर्वायवाङ्कुरगोरोचनाप्रभृतीनि माङ्गलिकानि सम्भावय[4] ।

शिष्यः— (ख) भअवं! अविण्णादवुत्तन्तो पुच्छामि । किं दाणिमेदेहिं उव्वक्कन्तम् ।

धौम्यः — वत्स! महान् खलु कार्यभारः ।

शिष्यः — (ग) तं कहेदु भअवम् ।

धौम्यः — बालः खल्वसि । राजमन्त्रस्तु[5] चौर्यार्जितद्रविण[6]सञ्चय इव न सुखप्रकाश्यो भवति । तथापि त्वामाभ्यन्तर इति किञ्चिन्निवेद्यते ।

शिष्यः — (घ) अणुग्गहिदो म्हि ।

(क) सुष्ठु भगवान् भणति ।
(ख) भगवन्! अविज्ञातवृत्तान्तः पृच्छामि । किमिदानीमेतैरुपक्रान्तम् ।
(ग) तत् कथयतु भगवान् ।
(घ) अनुगृहीतोऽस्मि ।

---

१. 'नराणां' ख.
२. 'तद्दुत' ख.
३. 'तन्नाचिरमेव' ख.
४. 'संपादय' ख.
५. 'राजमन्त्रे' ख.
६. 'द्रव्य' ख.

धौम्यः — (समन्तादवलोक्य) नात्र कश्चिदन्यो जनः । तद्विस्रब्धं श्रूयताम् ।

शिष्यः — (क) अवहिदो ह्मि ।

धौम्यः — एकदा तु निर्वर्तितदिवसमुखकृत्ये यथोचितसम्भावनापरितोषितभृत्ये नमस्करपालिशिरःपरम्परावतंसितचरणे पौरवाभरणे सकलजगदानन्दने पाण्डुनन्दने सह सुहृद्भिर्विविधविनोदनपेशलं दर्शितमयकौशलं चतुरविलासिनीसञ्चारितचारुचामरमरुच्छीतलं मणिमयसभातलं रुचितुलितपञ्चबाणे समधिलङ्कुर्वाणे,

> किमिदमिति जनानामक्षिविक्षोदहेतुं[1]
> बिसविदलनवलक्षं विक्षिपन् दिक्षु तेजः ।
> तरुणपवनकोणास्फालवाचालवीणः[2]
> परिषदमभिपेदे नारदस्तां नभस्तः ॥ १० ॥

शिष्यः — (ख) अम्मो[3] विह्मअणिज्जं खु जुहिट्ठिलस्स माहप्पं । जदो एआरिसाणं वि महप्पाणं अभिगमणिज्जो वट्टइ ।

धौम्यः— किमुच्यते । पाण्डवज्येष्ठो युधिष्ठिरः खल्वयम्[4] । अपि च,

> धर्म्या प्रवृत्तिर्जगतां हिताय
> सम्बन्धि मित्रं मधुकैटभारिः ।
> लोकोत्तरं भ्रातृषु यस्य हार्दं
> काः सम्पदो न स्पृहयन्ति तस्मै ॥ ११ ॥

(क) अवहितोऽस्मि ।

(ख) अहो ! विस्मयनीयं खलु युधिष्ठिरस्य माहात्म्यम् । यथा एतादृशानामपि महात्मनां अभिगम्यो वर्तते ।

---

१. 'अक्षिनिक्षेपहेतुं' ख.

२. 'वाचालवीणं' ख.

३. 'अह्मो' ख.

४. 'खल्वप्ययम्' क.

शिष्यः —(क) तदो तदो ।

धौम्यः — ततः स भगवानजातशत्रुणा यथोचितामपचितिं[1] लम्भितः समुपविष्टश्च विष्टरे[2] तदेतत् सन्दिदेश ।

त्रिविष्टपसदां तुष्ट्यै पितुः पाण्डोर्नियोगतः ।
राजसूयं तवाहर्तुं वध्यो मगधराडिति ॥ १२ ॥

शिष्यः —(ख) अदिमहन्तो खु णिओअभारो । तदो तदो ।

धौम्यः — ततश्च महान् प्रसाद[3] इति तन्नियोगं निजमकुट-[4]शिखरमारोपयति भीमाग्रजे स तपोनिधिस्तिरोदधे ।

शिष्यः — (ग) मण्णे तस्स कलहप्पिअस्स मुणिणो एसो अभिप्पाओ । जइ[5] जुहिट्ठिरो राजसूअं उपक्कमिस्सदि । तदो पण्डुपुत्ताणं सअलराअमण्डलेण सद्धं इदो तदो संपहारा[6] वट्टिस्संति ।

धौम्यः — (विहस्य) वत्स ! स खलु भगवान् परमार्थतिरोहित-[7]रजोगुणोऽपि निसर्गतो निरर्गलसुभटसम्फेटलम्पटचित्तवृत्तिरेव वर्तते । (विमृश्य) भवतु को दोषः ।

अप्युदारचरित्राणामसारे क्वचिदादरः ।
कस्मै गुणाय गृह्णाति महानीलमणिस्तृणम् ॥ १३ ॥

(क) ततस्ततः ।

(ख) अतिमहान् खलु नियोगभारः । ततस्ततः ।

(ग) मन्ये, तस्य कलहप्रियस्य मुनेरेषोऽभिप्रायः । युधिष्ठिरो राजसूयमुपक्रमिष्यति । तदा पाण्डुपुत्राणां सकलराजमण्डलेन सार्धं इतस्ततः संप्रहारा वर्तिष्यन्ते ।

---

१. 'यथोचितमुपचितिमुपलम्भितः' ख.

२. 'विष्टरे सदे' ख.

३. 'महाप्रसादः' ख.

४. 'मकुटभार' ख.

५. 'जइ' इति कपाठे नास्ति ।

६. 'अवस्सं संप' ख.

७. 'परमार्थविज्ञानतिरोहित' ख.

शिष्यः — (क) तदो तदो ।

धौम्यः — ततस्तत्कालमेवाजिहीर्षता पुरुषमेधं मगधराजेन प्रीतो वचोहरः । रे रे पाण्डुनन्दन !,

बाणश्रेणिकरालकार्मुकमहःकिर्मीरदोर्मण्डल-
व्यापारप्रतिषिद्धवैरिवनिताधम्मिल्लमाल्यार्पणः ।
जन्योद्योगपराङ्मुखे[1] नृपगणे स्वस्मै प्रतापाय यः
सङ्ग्रामाग्रसमग्रसम्मदभरप्रत्यर्थिने कुप्यति ॥ १४ ॥

स जरासन्धदेवस्त्वामाह —

नृपतिपशुसहस्रसाध्यसीमा
पुरुषमखो भविता भवस्य तुष्ट्यै ।
तदुपहर[2] करं ममोचितं वा
भज मकरालयमन्धकैः[3] समं वा ॥ १५ ॥

शिष्यः — (ख) अहो अवहीरिअसव्वलोओ गव्वगरिमा मागहस्स । तदो तदो ।

धौम्यः — ततश्च तदाकर्ण्य मगधराजनिगलितनिखिलक्षत्रिय-परित्राणाय किमपि चिन्तयत्यधिगतनये तपस्तनयेऽनुचिताकर्णनघूर्ण-मानरोषकलुषीकृतेक्षणोत्कया तत्क्षणमिव दिधक्षति जगत्त्रयं बलतुलित-महासेने भीमसेने, गुरुनियोगपूर्वपरावरप्रतीकारसम्पादनाकुले नकुले, द्विषदनादरतिरोहितरोषमीषदपहसति विनयनन्दितनरदेवे सहदेवे रा-ज्ञानुमत्या कुमारफल्गुनेन तदिदं प्रत्यभिहितो दूतः ।

(क) ततस्ततः ।

(ख) अहो अवधीरितसर्वलोको गर्वगरिमा मागधस्य । ततस्ततः ।

१. 'अद्योद्योगः' क.

२. 'तदुपनय करं' ख.

३. 'मकराकरमन्धकैः' ख.

४. 'तवागाकर्णन' ख.

ऋतुरपि सुकरो मुदे स्मरारे-
नरपतयः पशवश्च तेन कार्याः ।
यदि न मृगयते यमस्य तुष्ट्यै
समरमखे मगधेश्वरं पशुत्वम् ॥ १६ ॥

शिष्यः — (क) सरिसं कुरुकुलालङ्कारस्स पुरन्दरतणअस्स । तदो तदो ।

धौम्यः — ततश्च पुनरपि रिपुदूतेन दर्पोदग्रमिदमुदग्राहि । रे रे कुमाराः ! अनाकलितपरात्मसारोऽयमारम्भो भवताम् । के यूयं जरासन्धदेवे वैरमनुसन्धातुम् । तथाहि —

आज्ञामास्थाय केचिद्धति निजपदे स्थास्नुतां क्षुण्णपक्षाः
पर्यस्ताः सन्निवेशाद् दिशि दिशि विवशास्तुर्ङ्गतुत्खाय केचित् ।
राजानस्तेन भग्नाः कतिचिदधिगता गर्भमम्भोनिधीनां
सुत्रामत्रासितानां परिणतिमुररीकुर्वते पर्वतानाम् ॥ १७ ॥

अपि च,

सङ्ग्रामे मानतुङ्गं नमयति स धनुर्नैव मौलिं कदाचित्
चापस्यैवापराङ्गं प्रकटयति दृशां गोचरे न स्वकीयम् ।
दृष्टिः पृष्ठे रिपूणां निपतति न पुनर्बाणपङ्क्तिस्तदीया
जीवापायः परेषां भवति रणमुखे नैव तत्कार्मुकस्य ॥ १८ ॥

शिष्यः — (ख) सच्चं एईदिसो एव्व मागहो । तह वि किं जदुघरातक्कपङ्कपडिअसोअरकुडुम्बुद्धरणकुंजरं बकाहिडिम्बविद्धंसणा-

(क) सदृशं कुरुकुलालङ्कारस्य पुरन्दरतनयस्य । ततस्ततः ।

(ख) सत्यं एतादृश एव मागधः । तथापि किं जतुगृहातङ्कपङ्क-

१. 'स्तास्स्वान्निवेशात् ' ख.
२. 'र्न स्वमौलिं' ख.
३. 'नापि' ख.
४. 'कि एस जदु' ख.
५. 'द्धरणवणकुञ्जरं' ख.

डम्बरविह्माविदतिहुवणं भीमसेणं सअळवीरजोहसाहसेकणिहसं खंडव-दावदहणखंडिआखण्डलपरक्कमं गण्डीविणं च ण जाणइ।

धौम्यः—वत्स! कथमिव न जानाति। औद्धत्यमेवापराध्यति।

कुतो मदावलिप्तानां परोत्कर्षविचेतनम्।
दन्तभङ्गं तटाघाती विविनक्ति न हि द्विपः॥ १९॥

शिष्यः—(क) एव्वं एदम्। तदो तदो।

धौम्यः—ततश्च दर्शिताहङ्कारस्य विद्विषो वचोहरेण प्रयुक्त-मवमानमसहमानेन कठिनकरास्फालितविपुलमणिसभास्तम्भसम्भ्रम-भ्रमितपरिषदा तुलितकल्पान्तपार्वकेन कुमारवृकोदरेण तदिदमजात-विद्विषे प्रतिज्ञातम्।

गुरुतरयमदण्डोचण्डदोर्दण्डघातै-
र्विघटितविकटोरःपीठपाटाकलाटम्।
अधिसमरमरातिं भीमसेनेन भग्नं
नृप! नियतमहोभिः श्रोष्यसि द्वित्रमात्रैः॥ २०॥

शिष्यः—(ख) समत्थं पडिण्णादम्। तदो तदो।

धौम्यः—ततस्तदाकर्ण्य यद्येवमित्र एव न चिरादागतं मगधराजमवगच्छतेत्याभिधाय प्रस्थितः प्रणिधिः।

पतितसोदरकुटुम्बोद्धरणकुञ्जरं बकहिडिम्बविध्वंसनाडम्बरविस्मापितत्रिभुवनं भीमसेनं सकलवीरयोधसाहसैकनिकषं खाण्डवदावदहनखण्डिताखण्डलपराक्रमं गाण्डीविनं च न जानाति।

(क) एवमेतत्। ततस्ततः।

(ख) समर्थं प्रतिज्ञातम्। ततस्ततः।

---

१. 'तदाघाती'-ख.
२. 'तद्दर्शिता' ख.
३. 'करतलास्फालित' ख.
४. 'वकेन वृकोदरेण' ख.
५. 'तदिदं जातविद्वेषेण' ख.
६. 'अभिसमर' क.

शिष्यः — (क) तदो तदो ।

धौम्यः — ततश्च[1] बहुधापि धिया बार्हद्रथं समुच्छिद्य तत्क्षण-प्रणिहितलेखहार[2]वचनादागतेन भुवनभारसंहारिणा शौरिणा रिपुकुल-धनञ्जयेन कुमारधनञ्जयेन सार्धं स्नातकलाञ्छनप्रतिच्छन्नः प्रतिज्ञा-समर्थनाय राज्ञा भाभञ्जनिरनुज्ञातः ।

शिष्यः[3] —(ख) तदो तदो ।

धौम्यः — (ध्यात्वा) अहो धर्मराजस्य बुद्धिमत्ता । यत् कुमारवृकोदरस्य तस्यौद्धत्यपरतन्त्रतामाशङ्क्य,

'अर्जुनः कृष्णमन्वेतु भीमोऽन्वेतु धनञ्जयम् ' इति सन्दिष्टम् ।

शिष्यः— (ग) अहो ए(दे)दाणिं कं तत्थ एकाइणो गमिस्सन्ति ।

धौम्यः — अथ किम्। बुद्धिसाधनाः खलु मनास्विनः ।

शिष्यः[4] — (घ) अहो एदाणं ह्णादअवेसधारणे को अभि-प्पाओ ।

धौम्यः — तत् खल्वमुष्मिन् कर्मणि निरपायमौपयिकम् । यतः, 'स्नातकव्रतिनः[5] कदाचिदपि नावधीरयामीति मगधराजस्य प्रतिज्ञाव्रतम् ।

शिष्यः — (ङ) ता एदे किं भोअणत्थमदिहिणो भविस्सन्ति ।

धौम्यः — युद्धार्थमतिथयो भविष्यन्ति ।

(क) ततस्ततः ।

(ख) ततस्ततः ।

(ग) अहो एते इदानीं किं तत्रैकाकिनो गमिष्यन्ति ।

(घ) अहो एतेषां स्नातकवेषधारणे कोऽभिप्रायः ।

(ङ) तदेते किं भोजनार्थमतिथयो भविष्यन्ति ।

---

१. 'बहुधा धिया' ख.

२. 'लेखाहार' क.

३. इदं खपाठे नास्ति ।

४. 'शिष्यः — किं तत्थ एव्वं काइणो गमिस्सन्ति । ख.

५. 'व्रतिनं' ख.

शिष्यः— (क) अह किं एदाणं एस सङ्कप्पो सफळो भविस्सदि ।

धौम्यः — न ख (ल्व ? लु) वन्ध्याभिसन्धयो भवन्ति धीमन्तः । तदधुना नियोगमनुतिष्ठ ।

शिष्यः — (ख) जं भअवो आणवेदि ।

धौम्यः — अहमपि कालिन्दीमवतीर्य निर्वर्तितनियमाभिषेकः कमण्डलुना सलिलमाहरामि ।

[इत्युभौ निष्क्रान्तौ ।]

मिश्रविष्कम्भः[1] ।

(ततः प्रविशन्ति कृष्णार्जुनभीमसेनाः स्नातकवेषधारिणः ।)

कृष्णः — (भीमार्जुनाववलोक्य स्वगतम्) अहो नु कुरुकुलकुमारयोरनयोर्गुरुनियोगानुष्ठानसौष्ठवम् । तथाहि —

तरुणचरणपातैर्लङ्घितं वर्त्म दीर्घं
परिजनकरणीयं पाणिभिः कर्म सोढम् ।
प्रकृतिरपि निगूढा कृत्रिमैः संविधानैः
किमिव हि गुरुभक्त्या दुष्करं निर्भयानाम् ॥ २१ ॥

[प्रकाशम्] कुमार भीमसेन ! वत्स फल्गुन ! सम्प्रति हि —

गङ्गां विलङ्घ्य निकटे कुरुजाङ्गलानां
तीर्त्वा ततश्च सरयूसरितं रयेण ।
क्रान्त्वा च शोणमिममम्बुजरेणुशोणं
प्राप्ता वयं पुरमिदं मगधेन्द्रगुप्तम् ॥ २२ ॥

(क) अथ किमेतेषामेष सङ्कल्पः सफलो भविष्यति ।

(ख) यद् भगवानाज्ञापयति ।

---

१. 'विष्कम्भकः' ख.

[अग्रतो विलोक्य]

अहो विभवतिरस्कृतवस्वोकसारा मगधराजधानी मुष्णाति चेतः । यैषा —

पृथुकटकालङ्कारैः प्रचलपताकोज्ज्वलाङ्गुलीललितैः ।[1]
तुङ्गैर्ध्वजभुजनिकरैः श्रियमाह्वयतीव नाकस्य ॥ २३ ॥

अर्जुनः — एवमेतत् । यथाह चाणूरमल्लमथनः ।[2]

भीमः — वत्स फल्गुन ! प्राप्तं पदव्याः पर्यवसानं, नाद्यापि प्रतिज्ञायाः ।[3]

अर्जुनः — तदपि नेदिष्ठं तर्कयामि । यदर्थमेव केशवोऽप्यनुचितवेषधारणक्लेशमनुभवति ।[4] तथाह्यस्य,[5]

पाणौ चक्रप्रणयिनि पदं पश्य धत्ते कुसुम्भं
शार्ङ्गस्याधिश्रयति धनुषः स्थानमाषाढ एषः ।
वासोर्युग्मं विलसति सितं पीतकौशेयधाम्नि[6]
प्रत्यादिष्टं सकलमपरं मण्डनं कुण्डलाभ्याम् ॥ २४ ॥

भीमः — एवमेतत् । सत्यमाह वत्सः ।

गतो वामनरूपी यः शक्रस्यार्थे बलेर्मखम् ।
सोऽस्मदर्थे व्रती भूत्वा याति शत्रोर्गृहं हरिः ॥ २५ ॥

(सर्वे परिक्रामन्ति ।)

कृष्णः[7] — (पुरोऽवलोक्य) प्रत्यासन्नं राजमन्दिरं सम्भावयामि । यतः —

---

१. 'प्रकटपतकोज्ज्वला' क.

२. 'मल्ल' इति ख पाठेन.

३. 'पदव्यां' ख.

४. 'वेषधारी क्लेशं' ख.

५. 'तथाप्यस्य' ख,

६. 'युग्मं' ख.

७ 'कृष्णः' इति खपाठे नास्ति.

दृश्यन्ते केतवोऽमी नवमणिकिरणैर्व्योम सीमन्तयन्तः
प्रासादाभ्यन्तरेषु प्रतिफलति मुहुर्बृंहितं वारणानाम् ।
अच्छाच्छैरातपत्रैः कवलितककुभो गोपुरस्योपकण्ठा-
न्निर्यान्त्येते नरेन्द्रा नृपचरणरजोधूसरोष्णीषपट्टाः ॥ २६ ॥

अर्जुनः — एवमेतत् । यथाह कालियमहाभुजङ्गजाङ्गलिकः ।

भीमः — वत्स बीभत्सो ! नन्वद्यैवास्माभिरतिथिजननिर्विशेषैर्द्रष्टव्यो मगधराजः । तन्निर्धार्यतामाशीर्वचनसमुदाचारचातुर्यम् ।

अर्जुनः — अत्रैव मे मतिर्विभ्रमीति । यतः, जयतु देव इति भृत्यजनालापः, विजयतां महाराज इति अस्मदनभ्यस्तो विषयः । अभिलषितसिद्धिरस्त्विति प्रस्तुतविरोधः । दीर्घायुर्भूया इत्यसत्यवचनम् । तदत्र वृष्णिवीरः प्रमाणम् ।

कृष्णः — भवतु । कालोचितं किमपि व्याहरिष्यामः ।

(नैपथ्ये महान् कलकलः । सर्वे आकर्णयन्ति ।)

(पुनर्नैपथ्ये ।)

भो भो ! मगधराजपृतनापतयः ! शृण्वन्तु भवन्तः । एष खलु सम्प्राप्तो महाराजस्य प्रस्थानसमयः । तेन,

घण्टाटङ्कारघोरोड्डमरुकरिघटासङ्कटक्षोणिपीठं
धाटीभिर्घोटकानां झटिति खरखुरोद्धूतधूलीवितानम् ।
सान्द्राणां स्यन्दनानां ध्वजपटपटलीलीढदिक्चक्रवालं
सैन्यं सन्नह्यतां नः पटुसुभटभुजामण्डलोद्घूर्णखड्गम् ॥ [२७ ॥

---

१. 'कण्ठे' ख.
२. 'निर्यान्त्येते' ख.
३. 'यतः देव' क.
४. 'असत्यकथनम्' ख.
५. 'वीर एव' ख.
६. 'पृतनाधिपतयः' ख.

अर्जुनः राज्ञः प्रस्थानमिति श्रूयते । तत् किं नु खल्विदम् ।

कृष्णः — मन्ये दूतकथितकुपितः सम्प्रति बार्हद्रथः कुरुराष्ट्रं प्रतिष्ठासुरिति ।[1]

भीमः — यमराष्ट्रं प्रतिष्ठताम् ।

कृष्णः — तद् यावदचिरमद्वारेण प्रविश्य राजमन्दिरमरातिप्रस्थानप्रत्यूहमाचरामः ।

उभौ — बाढम् । (सर्वे परिक्रामन्ति) ।

कृष्णः — (पुरोऽवलोक्य ।) इयमास्थानशाला । कथमत्रासन्निहितो मगधराजः । तदेवं तावत् (किञ्चिदुच्चैः) भो भो राजमन्दिराभ्यन्तरचारिणः कञ्चुकीवर्षवरकिरातादयः! क इदानीं वर्तते मगधराजः ।

(नैपथ्ये)

सम्प्रत्युपक्रान्तकुरुराष्ट्रप्रयाणः साङ्ग्रामिकमङ्गलग्रहणाय लोहाभिहारभवनमधितिष्ठति मगधराजः[2] ।

भीमार्जुनौ — हन्त निवृत्तः[3] सन्देहः ।

कृष्णः — (नैपथ्यं प्रति) यद्येवं निवेद्यताममुष्मै कालसमागताः केचन स्नातकातिथयो द्रष्टुकामा इति ।

(नैपथ्ये)

इदं निवेद्यते !

कृष्णः — तदत्रैव वयं मगधराजागमनं प्रतिपालयामः ।

(ततः प्रविशति निर्वर्तितनीराजनः कृतसन्नाहविधिर्गदापाणिः क्रुद्धो जरासन्धः, यथोचितव्यापारः परिजनश्च ।)

---

१. 'कुरुराष्ट्रं प्रति प्रतिष्ठासु' क.

२. 'महाराजः' क.

३. 'निर्वर्तितः' क.

जरासन्धः — (सरोषोत्कम्पम्)

मधुरिपुमथितेऽपि भोजराजे
न कटुरदीप्यत कोपधूमकेतुः ।
मम मनसि यथा तथाद्य माद्य-
त्कुरुकुलबालकदर्पजल्पितेन ॥ २८ ॥

तदचिरेण पाण्डुपुत्रा अनुभवन्तु मगधराजविरोधपरिपाकम् ।

(गदामुद्यम्यावलोक्य च) ।

संरम्भोत्तालतालध्वजभुजमुसलास्फालनोद्दीपिताश्रि-
श्रेणीपर्यन्तनिर्यच्छिखिकणकलिकारब्धनीराजनायाम् ।
यान्तु प्राणाः प्रणाशं मम समरमुखे भीमसेनस्य शत्रो-
रस्यां क्षोणीश्वराणां रणरणरणिकाभङ्गदायां गदायाम् ॥२९॥

श्रूयते च कोदण्डविद्यासु पण्डितम्मन्यो गाण्डीवी । (परिजन-मवलोक्य) धनुर्धनुः ।

(पुरुषः धनुरुपनयति ।)

जरासन्धः —

खेलद्वेतालरक्षःकलहकलकलाभीलकच्छोपकण्ठाः
कृष्यन्तः कायभारान् प्रलयघनघटासन्निभानामिभानाम् ।
मद्बाणव्रातकृत्तोद्भटसुभटमुखाम्भोजराजीविराज-
त्कल्लोलोल्लासभीमाः समरभुवमसृक्सिन्धवः क्षालयन्तु ॥ ३० ॥

प्रतीहारी — (स्वगतम्) (क) अम्मो कुरुकुलणरिन्देसु जरासन्ध-देवेण आमरणन्तं वेरं णिब्बद्धमासि ।

जरासन्धः — अहो दुरात्मनोर्वीरम्मन्ययोः कुरुकुलखेटयो-र्वाचाटत्वम् । 'क्रतुरपि सुकर' इत्यादि पठति ।

(क) अहो कुरुकुलनरेन्द्रेषु जरासन्धदेवेन आमरणान्तं वैरं निबद्धमस्ति ।

---

१. 'जमुसलहलास्फालनो' ख.

प्रतीहारी — (स्वगतम्) (क) परपरक्कमंपरिभाविणो होन्ति वीर-लोआ ।

जरासन्धः — तत्[2] सर्वथा ।

गाण्डीविनं समरमूर्ध्नि शरैः प्रमथ्य
वन्ध्यं विधाय निजनाम युधिष्ठिरस्य ।
माद्यद्वृकोदरविमर्दमहोत्सवेन
निर्वाणमभ्युपगमिष्यति मागधेन्द्रः ॥ २१ ॥

कियद्दूरे प्रस्थानवेला ।

(प्रविश्य[3] मौ(हू)र्तिकः, पार्श्वतः पुरुषमवलोक्य च)

वातवेग ! गच्छ ब्रूहि सूताय सज्जीकृतं साङ्ग्रामिकं रथमुपस्थापयेति ।

पुरुषः — (ख) जं देवो आणवेदि ।

(इति निष्क्रान्तः ।)

(प्रविश्य)

काञ्चुकीयः — जयतु महाराजः । दूरादागताः केऽप्यलघुमहिमानो द्विजन्मानः ।

जरासन्धः — (अनाकर्णितकेन पुनस्तदेव गाण्डीविनमित्यादि पठति)

काञ्चुकीयः — (स्वगतम्) अत्यारूढप्रतिघनिभ्रान्तःकरणो महाराजः । भवतु, सविशेषं विज्ञापयामि । (प्रकाशम्)

अद्वारेण गृहं प्राप्ताः स्नातकातिथयस्त्रयः ।

जरासन्धः — यथासुखमागच्छन्तु । सर्वथा सफलो मेऽद्य दिवसः ।

(क) परपराक्रमपरिभविनो भवन्ति वीरलोकाः ।

(ख) यद् देव आज्ञापयति ।

---

१. 'मपडिपन्थिणो होन्ति' ख.

२. 'तत् इति' खपाठे न ।

३. 'प्रविश्य' इति खपाठे न ।

काञ्चुकीयः —

आस्थानस्थाः प्रतीक्षन्ते देव देवस्य दर्शनम् ॥ ३२ ॥

जरासन्धः — हन्त[1] कर्तव्ययोर्विप्रतिषेधे वर्तामहे । (विचिन्त्य) सर्वथा प्राणैरपि प्रीणनीया ह्यतिथयः ! तदेतान् सम्भावयामि । (इत्युत्थातुमिच्छति) ।

(प्रविश्य सत्वरः)

सारथिः — आयुष्मन् !

मुखरकनककिङ्किणीकराल-
ध्वजपटपल्लवचुम्बिताम्बुवाहः ।
अयमलघुतुरङ्गहर्षहेषा-
प्रतिरवपूरितदिङ्मुखो रथस्ते ॥ ३३ ॥

तदारोहत्वायुष्मान्[2] ।

जरासन्धः — अयमहमारूढ एव भगवतो भूमिदेवानभिलषितेन तोषयित्वा ।

सारथिः — किञ्चिदन्यद् विज्ञाप्यमस्ति ।

जरासन्धः — ब्रूहि ।

सारथिः — आयुष्मन् ! रथवाजियोजनवेलायां

खलु तार्क्ष्यध्वजाभिरुध्यां स्यन्दनस्याशु सन्दधत् ।
क्रूरः पत्ररथः केतौ निलीयोदपतद् द्रुतम् ॥ ३४ ॥

जरासन्धः — (स्वगतम्) अहो क्रूरता निमित्तस्य । (प्रकाशम्) भवतु । सुकरप्रतीकारमेतत् ।

सारथिः — यथाज्ञापयत्यायुष्मान् । (इति प्रस्थितः ।)

जरासन्धः — (उत्थाय निमित्तं सूचयित्वा)

स्खलति चरणं वृन्तप्रान्ते विलंबिनि (वाससं? वाससि)
स्फुरणविधिना वामं चक्षुः गतिं प्रतिषेधति

---

१. 'हन्त' इति खपाठे न ।

२. 'तदारोहत्वायुष्मान्' क.

इदमपि विना हेतोश्चेतः कुतोऽपि विघूर्णते।
किमभिलषितं दैवस्याहो निरङ्कुशरंहसः ॥ ३५ ॥

(निश्चित्य)[1] तदेतद् दुर्निमित्तजातं भगवतां भूमिदेवानामातिथ्यकल्पनेन प्रशममुपनयामि[2]। (इति परिक्रामति)।

काञ्चुकीयः— देव। इत इतः। इयमास्थानशाला। एतेऽप्यतिथयः।

कृष्णः — (राजानमवलोक्य स्वगतम्)

किं मूर्तोऽयं रसानां प्रसरति निचयो वीररौद्राद्भुतानां

अर्जुनः — (स्वगतम्)

निःसीम्नां विक्रमाणां किमयमभिनवो रूपवान् सन्निपातः।

भीमः — (स्वगतम्)

किं तावन्मर्त्यमूर्त्या जगति परिणतो गर्वसर्वस्वसारः

सर्वे — (स्वगतम्)

सोऽयं (चे? द्वे)ष्टाप्यभीष्टः सुहृदिव हृदयं दानधृष्णुर्धिनोति ॥ ३६ ॥

जरासन्धः — (अग्रतोऽवलोक्य) दिष्ट्यानुगृहीतमिदमस्मद्[3]भवनमतिथिपुरुषोत्तमसमागमेन।

कृष्णः — (स्वगतम्) किं परिज्ञातोऽस्मि।

जरासन्धः — (सविनयम्) स्वागतमतिथिमुख्येभ्यः।

भीमार्जुनौ — (स्वगतम्) अहो अतिथिसत्कारपारतन्त्र्यं बार्हद्रथस्य।

कृष्णः — (स्वगतम्) नन्ववसरोऽयमाशीर्वादस्य। तदेवं तावत्। (प्रकाशम्)

भीमशत्रुकृतान्तस्य धर्मराजनिवेशनम्।
प्रस्थितस्य महीपाल! पन्थानः सन्तु ते शिवाः ॥ ३७ ॥

१, '(निश्वस्य)' ख.
२. 'प्रशमनं' ख.
३. 'अस्मादिति' खपाठे म।

जरासन्धः — कृतार्थोऽस्मि ।

उभौ—(जनान्तिकम्) अहो आशीर्वादचातुर्यकौशलं केशिसूदनस्य। (राजानं प्रति) अस्य चिरन्तनस्य मुनेराशिषोऽभिप्रायः सिध्यतां (?) ते ।

जरासन्धः — उपविशन्त्वमीष्वासनेषु । (सर्वे उपविशन्ति) ।

जरासन्धः — (कृष्णं निर्वर्ण्य स्वगतम्)

प्रायः सोऽयं नयनविषयं क्वापि मे प्राप्तपूर्वः

(अर्जुनमवलोक्य)

कस्याप्येष प्रकृतिसुभगो भाग्यभाजस्तनूजः ।

(भीममभिवीक्ष्य)

पीनस्कन्धः पृथुलनयनः कोऽप्ययं बाहुशाली

(समाधाय)

ये वा के वा वपुरनुचितं वेषमेते वहन्ति ॥ २८ ॥

(निरूप्य) अपूर्वोऽयं स्नातकसमुदाचारः । यदद्वारेण प्रवेशः, सव्येन पाणिना यष्टिधारणं बहिर्बाह्यत्वं च । भवतु अर्हणानन्तरं प्रष्टव्यम् ।

अर्जुनः — (स्वगतम्)

सोऽयं मायामनुष्यस्य प्रभावो भुवनप्रभोः ।
यद्रिपुर्निपुणोऽप्येनं न निश्चेतुं प्रगल्भते ॥ २९ ॥

जरासन्धः — (कञ्चुकिनं प्रति) गच्छ ब्रूहि विमलमेधसे पुरोधसे।

कञ्चुकी — देव ! किमिति ।

जरासन्धः — शीघ्रमागत्यातिथयो यथाविधानमर्हणीया (इत्यर्धोक्ते)

कृष्णः — मा मा मगधराज !

---

१. 'र्वादकौशलं' ख.

२. 'उपविशन्तामिहासनेषु' ख.

३. 'रनुपमं' क.

४. '(निपुणं निरूप्य)' ख.

जरासन्धः — किं नार्हणयोग्या भवन्तः ।

कृष्णः — अयोग्यादर्हणग्रहणं प्रतिषिद्धं स्नातकानाम्

जरासन्धः — (स्वगतम्) अहो द्विजातेरौद्धत्यम् । यन्मामप्य-योग्यं प्रतिपादयति । सर्वथा वाचि क्षुरो ब्राह्मणस्येति सूक्तमेतत् । तदेवं तावत् । (प्रकाशम्) भो धर्मज्ञ ! ननु 'नाद्वारेण विशेत् क्वचिद्' इति विशेषतः स्नातकानां धर्मोपदेशः । तदुल्लङ्घनकारिणो यूयं योग्याः । बार्हद्रथः पुनरयोग्यः संवृत्तः ।

कृष्णः — बार्हद्रथ ! किन्तु, 'अद्वारेण रिपोर्गेहम्,' (इति) अप्युपदेशः स्मर्यते ।

जरासन्धः — किं किम् । 'अद्वारेण रिपोर्गेह'मिति ब्रवीषि । तत् किमिह द्विजन्मनां शत्रुः ।

कृष्णः — न केवलं द्विजन्मनां, कृत्स्नस्यापि जगतः शत्रुरसि ।

जरासन्धः — तदेतद् भवन्तं पृच्छामि ।

अधीत्य वेदानवजित्य शत्रून्
मखैश्च सन्तर्प्य गणं सुराणाम् ।
प्रजाः प्रशासद्विधिना कथं वा
जायेत राजा भुवनस्य शत्रुः ॥ ४० ॥

कृष्णः — न खलु दोषमाचरन् दोषभागिनमात्मानं मन्यते । यतः —

करेण विकिरन् रेणून् कुञ्जरः कुम्भमण्डले ।
किमात्मनः पांसुलतादोषमेष विबुध्यते ॥ ४१ ॥

जरासन्धः — एवमपि ब्रूमहे । अदुष्टमपि दुष्टं पश्यन्ति दोष-दृष्टयः । तथाहि —

---

१. 'नार्हणोचिता' ख.
२. अयोग्यार्हणग्रहणं' ख.
३. 'आम् बार्हद्रथ' ख.
४. 'स्मर्यते' इति खपाठे न ।
५. 'भगवन्तं' क.
६. 'भागी न मन्यते' ख.

महान्तमासाद्य निधिं यथा जनो
मषीमयं भाग्यवशेन पश्यति ।
स्वभावसीमानियतस्य वस्तुनः
किमेतदारोहति दोषकल्पनम् (?) ॥ ४२ ॥

कृष्णः — मा मैवम् । न वयमदुष्टदूषणशीलाः, किन्तु दुष्टं दूषयामह एव । तच्छृणु —

राजानो ननु भुवनस्य रक्षितार-
स्तेषां त्वं निधनविधानपातकेन ।
धर्मस्य प्रसभमुपप्लवं वितन्वन्
जानीषे कथमिव नात्मनः प्रमादम् ॥ ४३ ॥

जरासन्धः — (किञ्चित् सोपहासम्) अहो शास्त्रचक्षुषो वैचक्षण्यं भवतः । यद्राज्ञां शत्रुनिग्रहोऽप्यधर्म इति साम्प्रतमाकर्णयामः ।

कृष्णः — बार्हद्रथ ! न खलु शत्रुनिग्रहस्तावदधर्मः । किन्तु पराजितानां पुनः पशुमारं मारणमनाचरणीयं प्रतिपादयामः ।

जरासन्धः — ननु प्रमाणपूर्वं प्रतिपादय ।

कृष्णः — प्रतिपादने कस्तावत् पणबन्धः क्रियते ।

जरासन्धः — यस्तवाभिमतः ।

कृष्णः — यदि त्वमेव विवादे पराजीयसे कमप्यस्माकं मनोरथमवन्ध्यं करिष्यसि ।

जरासन्धः — बाढम् ।

---

१ 'महाजनो' ख.
२. 'दोषकत्थनाम् । ख.
३. 'दुष्टान्' ख.
४. 'एवं तत् शृणु' ख.
५. 'प्रथमं' ख.
६. 'पुनः' इति खपाठे न ।
७. 'यद्येवं तदा कमपि' ख.
८. 'मनोरथमप्यवश्यं करिष्यसि' ख.

कृष्णः — तर्हि सत्यसङ्गरो भव ।

जरासन्धः — ननु नित्यमेव सत्यसन्धो जरासन्धः ।

तथा हि,

तपस्तर्पितशर्वस्य त्यागसन्तोषितार्थिनः ।
वपुरेव द्विधा भिन्नं न मे जिह्वा कदाचन ॥ ४४ ॥

भीमार्जुनौ — (स्वगतम्) भिन्नमेव भवतु भवतो वपुः ।

जरासन्धः — यद्यहं भवतो विजेता संवृत्तः, तदास्मत्प्रणीत-महर्णमभिनन्दन्तु भवन्तः ।

कृष्णः — उपपन्नमेतत् । कस्तावदावयोर्विवादे निर्णेता कल्प-नीयः ।

जरासन्धः — ननु सर्वोऽप्यस्मदीयोऽत्रत्यो जनः । तन्नाहमत्र प्रमाणम् । (सर्वे तूष्णीं स्थिताः ।)

(प्रविश्य)

दौवारिकः — (क) जेदु भट्टा । देव सिस्सेण सद्धं अम्बरादो ओदरिअ दुवारदेसं उवट्ठिदो म(हे)सी णारदो ।

जरासन्धः — (श्रुत्वा सहर्षम् ।) किमुपस्थितो भगवान् कमलभवसम्भवः । तदविलम्बितं प्रवेश्यताम् ।

दौवारिकः — (ख) जं देवो आणवेदि । (इति निष्क्रान्तः ।)

(क) जयतु भर्ता । देव! शिष्येण सार्द्धमम्बरादवतीर्य द्वारदेश-मुपस्थितो महर्षिर्नारदः ।

(ख) यद् देव आज्ञापयति ।

---

१. 'तर्हि तस्य सत्य' ख.
२. 'ननु सत्य' ख.
३. 'वपुरेतद् द्विधा' क.
४. 'तदस्मत्प्र' ख.
५. 'कल्पनीयः' इति खपाठे न
६. अपीति खपाठे न ।

कृष्णः — (स्वगतम्) काले खलु सम्प्राप्तस्तत्रभवान् विश्वविद्याविशारदो नारदः ।

भीमः — (अर्जुनं प्रति जनान्तिकम् ।) हन्त ईषच्छेषसङ्कथा[1] वयमन्तरागतेन नारदेन प्रकाशीक्रियामहे ।

अर्जुनः — स खलु भगवान् धर्मराजगुणपक्षपाती कार्यज्ञश्च नेदमुद्घोषयिष्यति[2] ।

(ततः प्रविशति नारदः शिष्यश्च ।)

नारदः — (स्वगतम्) साधु, सिद्धप्रायो मनोरथः । यत् कृष्णार्जुनसहायो भीमसेनः प्रच्छन्नो मगधराष्ट्रं प्रति प्र(स्थि)त इति भगवता द्वैपायनेन निवेदितं तत् कलहावलोकनकुतूहलादल्पीयसा कालेन महीयसीं गगनवीथीमतिवाह्य मगधराजमन्दिरोपकण्ठमवतीर्णोऽस्मि[3] । (हर्षमभिनीय ।)

धर्मात्मजस्य स मखः सुकरोऽस्तु मा वा
किं तेन मे मधुरिपोः खलु भार एषः ।
उद्दामभीममगधेश्वरसंविमर्द-
सन्दर्शनेन सफलश्रममस्तु चक्षुः ॥ ४५ ॥

शिष्यः — (श्रममभिनीय सशूत्कारम् ।) (क) हद्धि हद्धि । वक्कलकमंडलुकचाभारणीसहसरीरो एदेण जंघालएण महेसिणा सद्धं बंह्मण्डं परिब्भमिअ गाढं परिस्संतो ह्मि । ता सुट्ठु एदस्सिं राअउले मुहुत्तअं वीसावमणुभविस्सम् । (परिक्रामतः ।)

(क) हा धिक् हा धिक् । वल्कलकमण्डलुकचाभारनिस्सहशरीर एतेन जङ्घालकेन महर्षिणा सार्धं ब्रह्माण्डं परिभ्रम्य गाढं परिश्रान्तोऽस्मि । तत् सुष्ठु एतस्मिन् राजकुले मुहूर्तकं विश्राममनुभविष्यामि ।

---

१. 'शेषसङ्कथा' ख.

२. 'उद्घाटयिष्यति' ख.

३. 'मन्दिरमव' ख.

नारदः — (पुरोऽवलोक्य) स एष खलु मगधराजः यो रणवीरो दानवीरश्च । (अन्यतोऽवलोक्य स्वगतम्) त एते स्नातकलाञ्छनच्छादितास्तरुविटपजालजटिला इव शाकुनिकास्त्रयोऽपि निगूढं वर्तन्ते । दिष्ट्या न तावत् सम्प्रहारः संवृत्तः । तदिदानीमयातयामेन समरामृतेन लोचने तर्पयामि । (उपसर्पति ।)

(सर्वे सविनयमुत्थाय यथोचितं कुर्वन्त्युपविशन्ति च ।)

कृष्णः — बार्हद्रथ! वर्ततामसुष्य भगवतः समक्षमावयोर्विवादः ।

जरासन्धः — बाढम् ।

उभौ—(प्रकृतं श्रावयित्वा) तदत्र विवादे भगवानावयोर्निर्णायकः ।

नारदः — (श्रुत्वा स्वगतम्) श्लाघ्योऽयं वाक्कलहोऽपि । एष खलु समरनाटकस्य[1] पूर्वरङ्गः । (प्रकाशम्) यदभिरुचितं महाभागयोः ।

जरासन्धः — (कृष्णं प्रति) भोः[2] प्रस्तूयताम् ।

कृष्णः — ननु प्रस्तुतमस्माभिः (इति पूर्वोक्तमभिधत्ते ।)

जरासन्धः — किं किम् । पुरुषपश्वालम्भनमनाचरणीयं ब्रवीषि । [3]तदसमञ्जसम् । यतः 'क्षत्राय राजन्यम्' इत्युपदेशः ।

कृष्णः — [4]दत्तोत्तरमेतत् प्राच्यैराचार्यैः ।

अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु ।
मनुष्याणां समालम्भो न हि दृष्टः कदाचन ॥ ४६ ॥

इत्यादिना वचननिचयेन ।

नारदः — (श्रुत्वा स्वगतम्) साधु सु(दु)[5]स्तरमुपन्यस्तम् । यतो मधुपर्कपशूपालम्भनादिवदुपेक्षणीयः पूर्वपक्षः । (प्रकाशम्) भो मगध-

१. 'नाट्यस्य' ख.
२. 'भोः श्रूयताम्' ख.
३. 'तदिदं' ख.
४. 'कृतोत्तरमेतत्' ख.
५. 'दुष्करमुत्तरं' ख.

राज ! लभन्तामतिथयो वाञ्छितम् । न हि भवादृशेषु वन्ध्यसङ्कल्पा भवन्त्यर्थिनः ।

जरासन्धः — भगवन्ननुगृहीतोऽस्मि । अतिथिसंन्तोषलाभेन ।

शिष्यः — (क) णिग्गहस्थाने अणुग्गहं मण्णइ ।

अर्जुनः — अहो संवरणनैपुणं मगधराजस्य ।

भीमः — (उरः परामृश्य) हृदय ! किञ्चिदितः परमपि निगूढं सहस्व । शिथिलप्रायो गुरुनियोगनिगलग्रन्थिः ।

जरासन्धः — (स्वगतम्)

विघ्नेन खिद्यते चेतः पात्रलाभाच्च तुष्यति ।
छायातपाभ्यामाश्लिष्टं पर्यायादिव पङ्कजम् ॥ ४७ ॥

(प्रकाशम्)

(तान् प्रति) वृणुत भोः !

नारदः — (सर्वानवलोक्य स्वगतम्)

नरेन्द्रे निःशङ्कं वृणुत वृणुतेत्यात्तवचने
मुरद्वेषी दृष्टिं वितरति मुखे पाण्डुसुतयोः ।
अथायं नेत्राभ्यामनुवदति शौरिं सितहयो
भुजे भीमश्चक्षुस्तिमितयति हृष्यत्तनुरुहः ॥ ४८ ॥

कृष्णः — बार्हद्रथ !

क्रतुरवनिभृतामनग्निसाध्यो
विजयफलो बलशालिनां विनोदः ।

(क) निग्रहस्थाने अनुग्रहं मन्यते ।

---

१. 'सन्तोषनियोगलाभेन' ख.
२. 'संवरणकौशलं' ख.
३. 'वक्षः परामृश्य' ख.
४. 'अतः परमपि निग्रहं' ख.
५. 'शिथिलितप्रायो' ख.
६. 'शृणुत भोः' ख.
७. 'दृष्टीं वित' ख.
८. 'यथायं' ख.
९. 'रुहे' ख.

अशनिरघनगोचरः खलानां
भ्रमणकरः समरः प्रदीयतां नः ॥ ४९ ॥

जरासन्धः — प्रियं नः प्रियं नः ।

नारदः — (स्वगतम्) हन्त ! श्रोत्रयोरयममृतसम्पातः ।

शिष्यः — (क) अम्मो बह्मणाणं अजुत्तकारित्तणं, जं राइणा सद्धं जुद्धं मग्गंति ।

अर्जुनः — साधु सिद्धः सङ्कल्पः ।

भीमः — (हर्षमभिनीय)

उद्दामयुद्धभरनिर्भरमागधेन्द्र-
वक्षःप्रघाणघनघट्टनकर्मठस्य ।
दोर्दण्ड रे ! बकहिडिम्बविमर्दसौख्य-
संख्यातिशायि तव काङ्क्षितमद्य सिद्धम् ॥ ५० ॥

जरासन्धः — (सहर्षं सखेदं च)

तदयमभिमतं मे यत् वरैः सम्प्रहारः
प्रतिभटधुरमेते हन्त विप्रा वहन्ति ।
अमृतमथनकाले कालकूटप्रसूति-
स्त्रिभुवनमिव चित्तं दोषशङ्का दुनोति ॥ ५१ ॥

अहो मगधवंशस्य सन्निमित्तो दुर्यशःकलङ्कः । किं न सम्यगाराधितो भर्गः । कथमीदृशो मे पराक्रमस्य परिपाकः । धिग् बाहोर्भागधेयं यदनुकम्प्येषु परेष्विव प्रहरिष्यतः । (किञ्चिदुच्चैः)

आचारं निजमुज्झतां नरपतिः शास्तेति सम्प्रत्यदो
मा प्रास्तावि जनः ! नः) प्रवादविमुखे येनैष सम्भाव्यते ।

भीमः — (स्वगतम्) सत्यमात्थ नरपतिः शास्तेति ! तदद्य ते दुराचारस्य धर्मात्मजानुजो भीमसेनः शासिता ।

(क) अहो ब्राह्मणानामयुक्तकारित्वं यद्राज्ञा सार्धं युद्धं मार्गयन्ति ।

१. 'संख्य' ख.
२. 'विचिन्त्य सहर्षं सखेदं च' ख.
३. 'संभाव्यते' ख.

जरासन्धः —

हन्तव्या यदमी द्विजा मरणतोऽप्येष प्रवादो गुरुः
सङ्ख्ये सम्मुखतां गतः क इव मे शेषं लभेतायुषः ॥ ५२ ॥

(विचिन्त्य)[1] भगवन् देवर्षे ! पश्यतु भवान्,

पात्रोपसदनेनापि यशोराशिरयं मम ।
प्रासाद इव लग्नेन मधुजालेन दुष्यति ॥ ५३ ॥

तदत्र मे प्रत्यक्षीकृतसकलधर्मसीमानो भवन्तः प्रमाणम् ।

हलधरपृथुवक्षःपीठसङ्घट्टचण्डः
प्रखरपरिघभीमः पाण्डवौ भीमपार्थौ ।
समरशिरसि भङ्क्तुं बद्धसन्धः किमेष
प्रसरतु भुजदण्डः साम्प्रतं ब्राह्मणेषु ॥ ५४ ॥

नारदः — (स्वगतम् ।) अहो इदं सङ्कटस्थानम् ।

न ब्राह्मणेषु प्रहरेति वाच्यं
नैते मया क्षत्रमिति प्रकाश्याः ।
युधो निषेधेऽपि महाननर्थो
न जातु माध्यस्थ्यमहो सुखाय ॥ ५५ ॥

(निश्चित्य) तदेवं तावत् । (प्रकाशम् ।) उचितमेव भवतः पाण्डवेषु प्रतिवीरत्वम् । न पुनर्ब्राह्मणेषु ।

जरासन्धः — का तर्हीदानीं प्रतिपत्तिः ।

नारदः — (कृष्णं पश्यति ।)

कृष्णः — (स्वगतम् ।) किमेतः[2] संवरणेन । तदेवं तावत् । (प्रकाशम्) साधु[3] बार्हद्रथ ! यदि इत्थं ब्राह्मणेषु सानुक्रोशो वर्तते तेन प्रीतः तवापि प्रार्थितं प्रत्युपहरिष्यामि । किं ब्रवीषि ।

नारदः — (स्वगतम्) साधु निक्षिप्तभारोऽस्मि ।

---

१. 'निश्वस्य' ख.
२. 'अतः परं संवर' ख.
३. 'साधु' इति खपाठे न.

जरासन्धः — किं तावत् । प्रार्थितं प्रत्युपहरिष्यामीति ब्रवीषि । तदिदमसमीक्ष्यकारित्वं भवतः । न हि कदाचिदपि बार्हद्रथः परान् प्रार्थयते ।

नारदः — भो बृहद्रथतनय ! साम्प्रतं किञ्चिन्मयानुशास्योऽसि ।

जरासन्धः — ननु शिष्योऽस्मि ।

नारदः — तर्हीदं शृणु ।

वरं नृपेभ्यो ददते द्विजातयो
यथा हि पित्रे तव चण्डकौशिकः ।
अतो भवान्न प्रतिषेद्धुमर्हति
प्रसादमेषां द्युसदां महीस्पृशाम् ॥ ५६ ॥

जरासन्धः— यद्येवं शृणुमस्तावद् । अलङ्घनीयो गुरुनियोगः । इदमिदानीं प्राप्तकालं किमपि प्रार्थ्यते ।

भीमः — (स्वगतम्[1]) प्राप्तकालमेव प्रार्थय ।

जरासन्धः — (स्वगतम् ।) धिक्कष्टमहमपि कार्यवशाद् (आज्ञा ? याच्ञा)रसज्ञः संवृत्तः ।

'म्रियमाणस्य चिह्नानि यानि तान्येव याचके' ।
इति सत्यमवगीयते[3] ।

तथा[4] हि मम,

वाक्यमोष्ठपुटन्यस्तं त्रपया तरलीकृतम् ।
पुष्पं शाखिरिवोद्भिन्नं जिह्वा संहरति स्वयम् ॥ ५७ ॥

---

१. 'स्वगतम्' इति खपाठे ।

२. 'कालं प्रति' क.

३. 'सत्यमेव गीयते' क.

४. 'तथा हि मम' इति खपाठे नास्ति ।

(कथञ्चिदनुसन्धाय प्रकाशम्)

गन्धर्वैर्वा भुजगपतिभिर्दैवतैर्दानवैर्वा
　रक्षोभिर्वा प्रमथपतिभिर्दिग्गजैर्भूमिपैर्वा ।
व्यस्तैरेभिर्युगपदथवा युष्मदिच्छानुरूपं
　योद्धुं वाञ्छाम्यपि भृगुपतौ न प्रहर्तास्मि विप्रे ॥ ५८ ॥

नारदः — सदृशमेतद् भवतः ।

कृष्णः — न खलु वयं मगधराजस्य वाञ्छानुकूलाः ।

जरासन्धः — यद्येवं यैः समराङ्गणमवतरामि ।

कृष्णः — नन्वस्माभिरेव ।

जरासन्धः — मदभिहितेषु कतमे भवन्तः ।

कृष्णः — यतमो भवान् ।

जरासन्धः — अपि यूयं क्षत्रियाः ।

कृष्णः — यथावगतं बार्हद्रथेन ।

जरासन्धः — विशेषं श्रोतुमिच्छामि ।

कृष्णः —

अयमनिलसुतस्ते यश्चिराद् योद्धुमिष्टः
　कुपितबकहिडिम्बध्वंसनो[1] भीमसेनः ।
अयमपि कपिकेतुर्धूमकेतुः परेषां
　तव रिपुरभियोज्यो मध्यमः पाण्डुपुत्रः ॥ ५९ ॥

(जरासन्धः हर्षमभिनीय भीमार्जुनौ पश्यति

नारदः — (सर्वानवलोक्य) सर्वथा सर्वस्यापि [illegible]रेष्वस्वतन्त्र-मन्तःकरणं भविष्यति । तथाहि,

---

१. 'ध्वंसिता' ख.

श्रुत्वा पार्थाविति विकसितं श्लाघयतां वीक्ष्य यो(द्धुं ?द्धुः)
साध्यं सिद्धं स्वयमिति मुहुः स्वीकृतं विस्मयेन ।
गेहं प्राप्ताविति शमपरं द्वेषिणावित्यगाध-
क्रोधाक्रान्तं प्रतिपदमिदं मानसं मागधस्य ॥ ६० ॥

अपि च,

भीमे भुजद्रविणदुर्मदवीरलोक
विश्रामधाम्नि बहुमानविशेषगर्भाः ।
गाण्डीवधन्वनि पुनर्निपतन्त्यमुष्य
द्राग् दृष्टयः स्फुरदनादरभिन्नभावाः ॥ ६१ ॥

जरासन्धः — (सहर्षामर्षगर्वम्) दिष्ट्या भवान् सानुक्रोशो व्योमकेशः । यदत्रैव प्रार्थितपदार्थसमवायः सन्निधत्ते सोऽयमनभ्रो वृष्टिपातः ।

भीमः — (स्वगतम्) सोऽयमनभ्रो वज्रपात इति ब्रूहि ।

जरासन्धः — (कृष्णं प्रति) भो विचक्षण 'मध्यमः पाण्डुपुत्र' इति निरवद्यमिदमवादीः । यतः नायमुत्तमोऽनतिपरिणतपराक्रमत्वात् नाप्यधमः कौरवत्वात् । अतो मध्यम एव ।

कृष्णः — वृथाजल्प जरासन्ध ! किमतः परं पराक्रमस्य परिणतिरस्ति ।

राजन् ! दोर्दण्डदर्पद्रवमुषि धनुषि व्यापृतोच्चण्डबाहौ
वीरे निर्याति तूर्णं त्वयि चलचरणं क्षोणिपृष्ठे लुठित्वा ।
निर्विघ्नं विक्रमाणां शिरसि निजभुजद्वन्द्वमाधाय तत्र
प्रत्यक्षं क्ष्मापतीनां कलय बलवता स्वीकृता केन कृष्णा ॥ ६२ ॥

---

१. 'सहर्षगर्वं' ख.
२. 'भगवान्' क.
३. 'निरवद्यमवादीः' ख.
४. 'बलवता' ख.

जरासन्धः — चिरात् कलितमस्माभिः पूर्वमेकेन फल्गुनेन पश्चात् सर्वैरेव भ्रातृभिः स्वीकृता कृष्णेति ।

कृष्णः — न हि रजोदूषितचेतसः सूक्ष्मधर्मचुञ्चवो भवन्ति भवादृशाः । साध्विदमभिहितवानसि यदुदुष्टं दुष्टं पश्यन्तीति ।

जरासन्धः — अथवा त्वं पाण्डवानुचरो वार्ष्णेयः ।

अर्जुनः — युक्तमुक्तम् । पाण्डवानुचर एवायं, यदस्य वशे वयं वर्तामहे । साध्वी प्रत्यभिज्ञा ते । यतः,

त्वद्गर्वकालकूटोग्रज्वालासंहारशालिनः ।
कृष्णः सङ्कर्षणस्यैष सोदर्यः कंसकर्षणः ॥ ६३ ॥

जरासन्धः — रे रे! कंसकर्षण इति मत्पुरत इदानीं श्लाघ्यते । पश्य,

सामग्रीं साम्प्रतं यत् प्रथयति मथुरा विन्ध्यकान्तारभूमे-
रन्तर्गोमन्तसत्रं चिरमचरदयं यच्च साकं किरातैः ।
किञ्चान्यद्बिभ्रतीमे जलमनुजदशां सर्वदाशार्हवीराः
पर्याप्तः किं न कंसोन्मथनविधिमहापातकस्यैष पाकः ॥ ६४ ॥

(विहस्य) 'एकः पापानि कुरुते फलं भुङ्क्ते महाजनः' इति सत्यमुदाह्रियते । यदस्य कृते सर्वे वृष्णयः समुन्मूलिताः ।

अर्जुनः — अहो महीपतेरर्थशास्त्रार्थपारगत्वं यद्विजिगीषोर्दुर्गसङ्ग्रहणं गर्हयसि । किं न वेत्सि मुरनरकबाणचाणूरकंसकालिययवनप्रभृतिदुर्दान्तभञ्जनजनितभयविस्मयानि जनार्दनस्य चरिताद्भुतानि ।

---

१. 'ननु चिरात्' ख.
२. 'साधु' इति ख पाठे न.
३. 'यददुष्टमपि दुष्टं' ख.
४. 'अथ त्वं' ख.
५. 'वयम्' इति खपाठे न.
६. 'साध्वी च प्रत्य' ख.
७. 'अपि च किं न' ख.
८. 'तजनविस्मयानि' ख.

तस्मिन्नधत्त समये रमणी तदीया
गर्भं समध्युषितमात्मविदात्मजेन ।
तस्यात्मवित्त्वमधिगर्भमवस्थितस्यै-
वाधायि साधु मुनिना किल नारदेन ॥ १९ ॥

तस्मिन्निति । तस्मिन् समये तादृश्यामवस्थायां तदीया तस्य हिरण्यकशिपो रमणी भार्या गर्भमधत्त धृतवती । कीदृशम् । आत्मानं परमात्मतत्त्वं वेत्तीति तादृशेनात्मजेन पुत्रेणाध्युषितमधिष्ठितम् । तस्यात्मवित्त्वमेव स्फुटयति । अधिगर्भं गर्भे अवस्थितस्य वर्तमानस्यैव पुत्रस्यात्मवित्त्वमात्मतत्त्वं नारदेन मुनिनाधायि सम्यगुपदिष्टम् । किलेति प्रसिद्धौ । साध्विति सम्यगेवेत्यर्थः ॥ १९ ॥

प्राचीव पूर्णहरिणाङ्कमशेषलोक-
प्रह्लादकारणमसूत सुतं तदा सा ।
प्रह्लाद इत्यथ यथार्थममुष्य नाम
क्षेमङ्करं कथयतामपि सम्बभूव ॥ २१ ॥

प्राचीति । सा हिरण्यकशिपोर्भार्या प्राची दिक् पूर्णहरिणाङ्कं पूर्णचन्द्रमिवाशेषाणां लोकानां जनानां प्रह्लादकारणमानन्दहेतुभूतम् । उभयसाधारणमिदम् । तदा तस्मिन् काले असूत प्रसूतवती । अथ जननानन्तरमेवामुष्य सुतस्य प्रह्लाद इति यथार्थम् । ह्लादि सुखे चेति धातुः । सर्वजनसुखहेतुत्वाद(र्थाबा? र्थवन्ना)म । कथयतामपि प्रह्लाद इति पठतामपि क्षेमङ्करं कुशलप्रदं सम्बभूव सम्भूतम् । किं पुनस्तद्दर्शनसम्भाषणादिकमनुभूतवतामिति भावः ॥ २० ॥

कान्त्येव साधुजनबोधकृता दिनेशः
शान्त्या सह व्यवृधदाहितविष्णुभक्त्या ।
मैत्र्यादिभिश्चतसृभिश्च स भावनाभिः
स्वस्योपमातृभिरिवानिशमाहतोऽभूत् ॥ २१ ॥

कान्त्येति । दिनेशः सूर्यः कान्त्या स्वतेजसेव साधुजनानां सज्जनानां बोधकृता आत्मज्ञानमुपपादयन्त्या । सूर्यपक्षे जागरत्वकारिण्या । आहित-

विष्णुभक्त्या आहिता सम्यग्विहिता विष्णुभक्तिर्यया तादृश्या शान्त्या शमगुणेन । अन्यत्र आहितस्य मण्डलान्तर्वर्तिनो विष्णोर्भक्त्या विनयेन प्रवर्तमानयेति बोध्यम् । तादृशशमगुणेन सहैव व्यवृधद् विवृद्धवान् । यथा यथा वपुः पुष्णाति तथा तथास्य विष्णुभक्तिकारी शमगुणोऽपि पुष्टिमध्यगच्छदित्यर्थः । स प्रह्लादश्चतसृभिर्मैत्र्यादिभिर्भावनाभिश्चित्तप्रसादसाधिनीभिरनिशमहर्निशमादृतोऽभूदनुसृतोऽभूत् । मैत्र्यादयस्तु मैत्री, अनुकम्पा, मुदिता, उपेक्षेति चतस्रः । आसां विषयविभागमाह प्रबोधचन्द्रोदये —

'ध्यायन्ति मां सुखिनि दुःखिनि चानुकम्पां
पुण्यक्रियेषु मुदितां कुमतावुपेक्षाम् ।
एवं प्रसादमुपयाति हि रागलोभ-
द्वेषादिदोषकलुषोऽप्ययमन्तरात्मा ॥'

इति । अत्रोपमामाह अस्योपमातृभिरिवेति । उपमातरो धात्र्यः यथार्भकमुपलालयन्त्यः पोषयन्ति तथेत्यस्य मैत्र्यादिष्वत्यन्तानुकूल्यं दर्शितम् ॥ २१ ॥

दृष्ट्वात्मजं कुलविलक्षणशीलमेनं
नातिप्रहृष्टहृदयोऽजनि दानवेन्द्रः ।
आत्मप्रियङ्करगुणप्रवणो हि लोको
नात्मीयतां विचिनुते परकीयतां वा ॥ २२ ॥

दृष्ट्वेति । दानवेन्द्रो हिरण्यकशिपुः कुलविलक्षणं दैत्यकुलविसदृशं शीलं स्वभावो यस्य तादृशमेनमात्मजं दृष्ट्वा नातिप्रहृष्टमनतिसन्तुष्टं हृदयं यस्य तथाजनि जातः । उक्तमर्थं समर्थयते । आत्मप्रियङ्करेषु स्वप्रीतिकारिषु गुणेषु प्रवणस्तत्परो लोकस्तामसराजसप्रियो जनः आत्मीयतामात्मसम्बन्धित्वं परकीयतां परसम्बन्धित्वं वा न विचिनुते नान्विच्छति । न विचारयतीत्यर्थः । हिर्येस्मादर्थे । अत आत्महितदौरात्म्यादिगुणाभावादस्मिन्नौदासीन्यमिति भावः ॥ २२ ॥

अध्यापिपद् गुरुभिरेनमशेषधर्म-
प्रध्वंसशालि स कुलव्रतमात्मनीनम् ।
यत्तु त्रयीवचनविस्तरमप्रमाणं
***मत्तप्रसुप्तजनजल्पितकल्पमाह ॥ २३ ॥**

---

*'सुप्तप्रमत्त' इति पाठो [illegible]पलभ्यते ।

अध्यापिपदिति । स हिरण्यकशिपुरेनं प्रह्लादं गुरुभिः शुक्रादिभिः प्रयोज्यकर्तृभिरात्मनीनम् आत्मनो हितम् । आत्मन्विश्वजनेत्यादिना खः । 'आत्माध्वानौ खे' इति प्रकृतिभावः । अशेषाणां धर्माणां प्रध्वंसेन प्रणाशेन हेतुना शालि श्लाघ्यम् । शल श्लाघायामिति धातुः । कुलव्रतमसुरकुलसमयः । तदध्यापिपद् ग्राहयामास । कीदृशं तदिति चेदत्राह— यत् कुलव्रतं तु त्रयी-वचनविस्तरं वेदवाक्यप्रपञ्चमप्रमाणमाह । न प्रमाणमिति ब्रवीति । अप्रमाणत्वे हेतुमाह । सुप्तानां य उत्स्वप्नप्रलापः मत्तानां मद्यपानक्षीबानां यश्चासम्बन्ध-प्रलापः तत्कल्पं तेन प्रायशस्तुल्यम् । उन्मत्तजल्पिततुल्यं वा । न तत्र किञ्चिद् ग्राह्यमस्तीति भावः । इत्याहेति नास्तिकमतानुसारेणोद्घो-षयतीत्यर्थः ॥ २३ ॥

प्रह्लादचेतसि विवेकघने विशाले
विद्यावभासिनि विमोहतमोविहीने ।
धर्म्येतरा गुरुगिरोऽपि सरोजपत्र
जम्बालिताम्बुकणिका इव नाभिलेगुः ॥ २४ ॥

प्रह्लादेति । विवेकेन सदसद्वस्तुविचारेण घने सान्द्रे विशाले विस्ता-रशालिनि विद्यया परमार्थज्ञानेनावभासिनि प्रकाशमाने । विमोहो वैचित्त्यम् । तदाहुः — 'मोहस्त्वसत्ये सत्यत्वबुद्धिर्दुःखे सुखभ्रमम् । विनात्मन्यात्मबो-धश्च' इति । तद्रूपेण तमसा विहीने विरहिते प्रह्लादस्य चेतसि धर्म्येतरा अधर्मप्राया गुरूणां गिरोऽपि । अर्थकामावेव पुरुषार्थौ । धूर्तप्रलापत्रयीतन्त्रम् । मरणमेवापवर्गः । नास्ति परलोकः । ऐहिकमेव सुखम् । कणिकानां जम्बालितत्त्वं तास्तात् (?) । यथाब्जपत्रे न लगन्ति तथास्य चेतसि गुरुगिरो नाभिलग्ना बभूवुरित्यर्थः ॥ २४ ॥

पुत्रं कदाचन मुदा स पदावनम्रं
सस्नेहमङ्कमधिरोप्य पितान्वपृच्छत् ।
वत्साभिधत्स्व गुणिनोऽस्य गुरोः सकाशा-
दध्येयवस्तु किमधीतमये त्वयेति ॥ २५ ॥

पुत्रम् इति । स हिरण्यकशिपुः कदाचन कस्मिंश्चिद्दिवसे मुदा तद्विद्याधिगमप्रीत्या पदावनम्रं पदयोः प्रणामशीलं पुत्रं प्रह्लादं सस्नेहं यथा

भवति तथाङ्कमारोप्य पिता जनयितान्वपृच्छदनुयुक्तवान् । हे वत्स! अभिधत्स्व कथय। गुणिनो गुणवतोऽस्य गुरोः शुक्रस्य सकाशादध्येयमध्येतुमर्हं किं वस्तु त्वयाधीतं तदभिधत्स्व । अये इति ससान्त्वनमाभिमुख्यकरमव्ययम् । इत्येवंप्रकारमपृच्छदिति सम्बन्धः ।। २५ ।।

सोऽपि व्यजिज्ञपदभिज्ञतमा यदाप्त्यै
सर्वात्मना तनुभृतः सततं यतन्ते ।
एकैव लम्भयति या पुरुषार्थमग्र्यं
सा विष्णुभक्तिरनघाधिगता मयेति ।। २६ ।।

सोऽपीति । प्रह्लादोऽपि व्यजिज्ञपद् विज्ञापितवान् । किमिति । अभिज्ञतमा अतिशयेन विद्वांसस्तनुभृतो शरीरिणो यदाप्त्यै यस्या विष्णुभक्तेरधिगमाय सर्वात्मना वाङ्मनःकायप्रवृत्त्या सततमनवरतं यतन्ते यत्नं कुर्वन्ति । किञ्च या विष्णुभक्तिः एका केवलैवान्यसाहाय्यानपेक्षमेवाग्र्यं पुरुषार्थं मोक्षं लम्भयति प्रापयति । भक्तिमन्तमिति शेषः । तदुक्तम् – 'विष्णौ भक्तिः केवला मुक्तिहेतुः' इति । तथाभूता अनघा निर्दोषा अघनाशिनीत्यर्थः । विष्णुभक्तिर्मयाधिगताधीतेयं दृढीकृता । नात्र कश्चिद्विसंवाद इति भावः । इति व्यजिज्ञपदिति संबन्धः ।। २६ ।।

आकर्ण्य कर्णपरुषं तदघूर्णत द्रा-
गुच्चैर्जहास निटिले भ्रुकुटिं बबन्ध ।
निस्त्रिंशमाशु निरकोशयदक्षिभासा
धक्ष्यन्निवैक्षत स रूक्षमुवाच चैनम् ।। २७ ।।

आकर्ण्येति । स हिरण्यकशिपुस्तद्विज्ञापनं कर्णपरुषं कर्णयोर्दुःसहम् आकर्ण्य श्रुत्वा द्रागघूर्णत क्षिप्रं कम्पितशरीरो बभूव । उच्चैर्जहास हसितवान् । निटिले ललाटे भ्रुकुटिं बबन्ध । आशु निस्त्रिंशं खड्गं निरकोशयद् निष्कोशं कृतवान् । कोशादुद्धृतवानित्यर्थः । अक्षिभासा नेत्रत्विषा धक्ष्यन् दग्धुं प्रवृत्त इव ऐक्षत ईक्षितवान् । रूक्षं क्रूरं यथा तथा एनं प्रह्लादमुवाचोक्तवांश्च ।। २७ ।।

किं किं ब्रवीषि कुलपांसन हिंसनीयो
बालोऽपि काममसि का ममता ममापि ।
जात्यैव दैत्यकुलवैरिणि यस्य हास्या
भक्तिस्तवाजनि स वा कथमस्यवध्यः ॥ २८ ॥

किमिति । हे कुलपांसन कुलदूषक ! किं किं ब्रवीषि । कोपद्योतिका द्विरुक्तिः । त्वं बालः सन्नपि कामं तथा भवतु । का क्षतिरिति भावः । हिंसनीयो वध्यः । ममापि का ममता ममत्वम् । तवास्मासु ममत्वं नास्त्येव । (तव ? त्वयि) ममापि तथेत्यर्थः । यस्य तव जात्यैव निसर्गत एव दैत्यकुलवैरिणि सुरवंशद्वेषिणि हास्या हसितुं योग्या परिहसनीया भक्तिरजनि सञ्जाता । स वा तादृशस्त्वमथवा कथमवध्योऽसि कथमनिग्राह्यो भवसि ॥ २८ ॥

जिह्रेति किं न रसना पितृपूर्वजस्य
व्यापादके द्विषति भक्तिरिहेति वक्तुम् ।
वज्रात्मिकेयमथवा तव विष्णुनाम्ना-
मुच्चारणेऽपि न विदीर्यति चाधुनापि ॥ २९ ॥

जिह्रेतीति । पितृपूर्वजस्य तव पितुर्ममाग्रजस्य हिरण्याक्षस्य व्यापादके हिंसितरि द्विषत्यस्मच्छत्रौ विष्णौ इह भक्तिर्विद्यत इति वक्तुं तव रसना जिह्वा किं न जिह्रेति लज्जते । अथवा युक्तमेव वा । तवेयं रसना वज्रात्मिकैव वज्रेण निर्मितैव नियतम् । या रसनाधुनापीदानीमपि विष्णुनाम्नामुच्चारणे सत्यपि न विदीर्यति न सहसधा विदीर्यति । अवज्रमयी चेत्तदुच्चारणप्रसङ्ग एवादरिष्यदिति भावः ॥ २९ ॥

प्रह्वामरातिगुणवर्णनसाहसिक्ये
जिह्वां छिनत्तु तव मद्भुजदण्डबन्धुः ।
कृत्तारिमांसरुधिरासववीरमाणः
प्राणापहारविधिनीतघृणः कृपाणः ॥ ३० ॥

प्रह्वामिति । मद्भुजदण्डयोर्मम दोर्दण्डयोर्बन्धुः सततसंसर्गीव सखा कृपाणः खड्गः । अरातेः शत्रोः विष्णोर्गुणवर्णनमीदृशस्तादृश इति गुणप्रशंसा (तद्)रूपे साहसिक्ये साहसे विषये प्रह्वां प्रवणां तत्परामित्यर्थः । तादृशीं तव जिह्वां छिनत्तु द्विधा करोतु । कममयारसकुर्यो भीदृ । कीदृशः

कृपाणः । कृत्तस्य खण्डितस्यारिगात्रस्य शत्रुशरीरस्य यद्रुधिरं तस्यासवस्य मद्यस्य वीरपाणः । 'वीरपाणं तु यत्पानं वृत्ते भाविनि वा रणे' इत्यमरः । •साहक्पानं कृतवान् । किञ्च प्राणापहारविधौ प्राणविनाशकर्मणि वीतघृणो निष्करुणः । अनेनास्य व्यवसिते कर्मणि नास्त्यौदासीन्यमिति दर्शितम् ॥ २० ॥

कः कोऽत्र भो मम तनूजमपि प्रवृद्धा-
वात्मद्रुहं निहत दैत्यभटास्तदेनम् ।
कः संशयोऽत्र भवतां न विलूयते कि-
मात्मोदयाय गडुरात्मशरीरजोऽपि ॥ २१ ॥

क इति । अत्र कस्कः । वर्तमान इति शेषः । भो दैत्यभटास्तत्तस्माद्धेतोर्मम तनूजमपि पुत्रमपि प्रवृद्धौ सत्यामात्मद्रुहं वर्धमानोऽसावात्मानं मामेव द्रोक्ष्यतीत्यर्थः । एवंविधमेनं प्रह्लादं निहत निगृह्णीध्वम् । हन्तेर्लोटि मध्यमपुरुषबहुवचनमेतत् । अत्रात्मजहनने भवतां कः संशयः । सन्देहो न कर्तव्य इत्यर्थः । अत्र हेतुमाह । आत्मशरीरजोऽपि स्वगात्रसमुद्भूतोऽपि गडुर्मांसोच्छूनतारूपो व्याधिविशेषः । आत्मोदयाय स्वस्य नीरोगतारूपाभ्युदयार्थं किं न विलूयते । किं न छिद्यते । छिद्यत एवेत्यर्थः । अत्रापि प्रवृद्धावात्मद्रुहमिति विभक्ति(वि)परिणामेनानुषज्यते ॥ २१ ॥

सक्रोधमित्थमभिधाय सुतं विकर्ष-
न्नङ्कादधिक्षिति तमक्षिपदक्षमोऽसौ ।
विद्वानपि स्वहृदयाय न रोचते यो
जीवोऽयमश्मसदृशः खलु दुष्प्रभूणाम् ॥ २२ ॥

सक्रोधम् इति । असौ हिरण्यकशिपुः सक्रोधं सरोषमित्थमभिधायोक्त्वा अक्षमः क्षमारहितः सुतमङ्काद्विकर्षन् करे गृहीत्वा बलादाकर्षन्नधिक्षिति क्षितौ तमक्षिपत् प्रक्षिप्तवान् । इदं चास्य साहसकारित्वं समर्थयते । दुष्प्रभूणां दुष्टानां प्र(भूषणतया ? भूणां तु यो) जीवः प्राणी विद्वानपि पण्डितः सन्नपि स्वहृदयाय न रोचते रुचितो भवति । स्ववाञ्छानुगुणो न भवति । सोऽयं जीवोऽश्मसदृशः पाषाणतुल्यः खलु । अश्मानमवनौ क्षेप्तुं कस्यापि न कृपा भवति । तद्वदेवासौ दुष्टः स्वसुतं प्रक्षिप्तवानित्यर्थः ॥ २२ ॥

शूलैर्गदाभिरसिभिर्मुसलैः शिलाभि-
र्दन्तैर्नखैः स्वमभिजघ्नुषि किङ्करौघे ।
प्रीतिप्रसन्नवदनः सरसानपाङ्गान्
माल्यैरिवार्चयति सन्निदधे कुमारः ॥ ३३ ॥

शूलैरिति । कुमारः प्रह्लादः शूलादिभिः स्वमात्मानमभिजघ्नुषि अभितो हननं कृतवति किङ्कराणामोघे समूहे विषये प्रीत्या प्रसन्नवदनः माल्यैः सुरभिमालागणैः स्वमर्चयति जन इव सरसानपाङ्गान् सस्नेहान् कटाक्षान् सन्निदधे समर्पितवान् । अनेनास्य दयागुणातिशय उक्तः । उक्तं च प्रबोधचन्द्रोदये

'क्रुद्धे स्मेरमुखावधीरणमथाविष्टे प्रसादोदयो
व्याक्रोशे कुशलोक्तिरात्मदुरितच्छेदोत्सवस्ताडने ।
धिग्जन्तोरजितात्मनोऽस्य महती दैवादुपेता विपद्
दुर्वारेति दयारसार्द्रमनसः क्रोधस्य कुत्रोदयः ॥'

इति । क्षमावतः स्वभावोऽयमिति द्रष्टव्यम् ॥ ३३ ॥

सर्पैरदंशयदघातयदुग्रदन्तै-
र्दन्तावलैर्विषमपाययदिन्द्रशत्रुः ।
एनं भृगौ पुनरपातयदद्वितीय-
ब्रह्मैकतानहृदयो न चचाल बालः ॥ ३४ ॥

सर्पैरिति । इन्द्रशत्रुः हिरण्यकशिपुरेनं प्रह्लादं सर्पैरदंशयद्दंशितवान् । उग्रदन्तैस्तीक्ष्णरदनैर्दन्तावलैर्गजैरघातयद् घातितवान् । विषमपाययत् पायितवान् । पुनरेभिर्व्यापारैरप्यनुज्झितप्राणं भृगावपातयत् । भृगुपतनं नाम पर्वताग्रमारोप्याधः पतनम् । तदपि कारयामास । तस्मिन्नपि कृते बालो शिशुरपि ब्रह्मैकतानं ब्रह्मणि नितरां प्रवणं हृदयमस्येति तथाभूतः । एकतानोऽनन्यवृत्तिरित्यमरः । सर्वात्मना परमे ब्रह्मणि निलीनहृदय इत्यर्थः । हेतुगर्भं चेदं विशेषणम् । ब्रह्मणि निलीनहृदयत्वाद् न चचाल न चलितवान् । तदुक्तम् —

'परं परं ब्रह्म सुहाणभाविण
ण बाहिरं बाहकवीव देहिण' इति ॥ ३४ ॥

शक्नोति यन्न शतकोटिरपि प्रभेत्तुं
यत् कालतोऽपि नहि जीर्यति देशतो वा ।
तद्वर्म शर्मघटितं हरिभक्तिसंज्ञं
यं त्रायते स्म पृथुकस्य कुतोऽस्य भीतिः ॥ ३५ ॥

... ...प्रभेत्तुं प्रभङ्क्तुं न शक्नोति न प्रभवति । यद्वर्म कालतो देशतो वापि कालदेशाभ्यामपि नहि जीर्यति वयोहानिं न प्राप्नोति । तत् तादृशं शर्मणा आनन्देन घटितं युक्तं हरिभक्तिसंज्ञं विष्णुभक्तिनामकं वर्म कवचं यं त्रायते स्म ररक्ष । अ(स्य ? न्य)वर्मणः शस्त्रभेद्यत्वमपि कदाचित्स्यादेव । अस्य तु विष्णुभक्तिनाम्नः कवचस्य वज्रेणाप्यभेद्यत्वमिति व्यतिरेकः । तादृशस्यास्य पृथुकस्यार्भकस्य । पृथुकौ चिपिटार्भकौ इत्यमरः । कुतः कस्माद्विषयाद् भीतिः । न कुतश्चिदपीत्यर्थः ॥ ३५ ॥

भूयोऽपि तं वरुणपाशनियन्त्रिताङ्गं
दैत्योऽध्यशाययदसौ वसतिं गुरूणाम् ।
बन्धं विनारमत यस्य मनो मुकुन्दे
तस्यार्भकस्य तु कियानिह देहबन्धः ॥ ३६ ॥

भूय इति । असौ दैत्यो हिरण्यकशिपुः भूयोऽपि पुनरपि तं प्रह्लादं वरुणपाशेन नियन्त्रिताङ्गं दृढबद्धसर्वावयवं कृत्वा गुरूणां वसतिं शुक्रभवनमध्यशाययत् । तत्र क्षिप्तवानित्यर्थः । किमस्य बन्धनेन हीयत इत्याह । यस्यार्भकस्य मनो बन्धं विना सङ्गमन्तरेण अव्यवधानेनेत्यर्थः । मुकुन्दे विष्णौ अरमत रतिमधिगतम् । तस्य तादृशस्यार्भकस्य तु इह गुरुगृहे देहबन्धः शरीरमात्रनियमनं कियान् किंयत्प्रमाणम् । असार इत्यर्थः । भगवति नीरोधे निलीनमस्य मन इदं बाह्यबन्धनं न जानातीति भावः ॥ ३६ ॥

तत्संस्तवादसुरबालकुलानि सर्वा-
ण्यात्मावबोधपरिपूतमनांस्यभूवन् ।
रूढानि किं न परितः सुरभिद्रुमस्य
प्रायस्तृणान्यपि भवन्ति सुगन्धवन्ति ॥ ३७ ॥

तद् इति । तस्य अर्भकस्य संस्तवात् संपर्कात् परिचयाद्धेतोः सर्वाणि निश्शेषाण्यसुरबालानां कुलानि वृन्दान्यात्मावबोधेनात्मज्ञानेन हेतुना परिपूत-मनांसि विष्णुभक्तिविशोधितचित्तान्यभूवन् । अत्र दृष्टान्तमाह—सुरभिद्रुमस्य चन्दनचम्पकादिसुगन्धिवृक्षस्य परितः समन्ततो रूढान्यङ्कुरितानि तृणान्यपिप्रायः सुगन्धवन्ति सुरभिगन्धशालीनि किं न भवन्ति । तथा भवन्त्येवेत्यर्थः ॥ ३७ ॥

नारायणाच्युत हरे मधुसूदनेति
प्रोच्चार्यमाणरमणीयमुकुन्दनाम्नाम् ।
उद्दामभक्तिरसनिर्भरमर्भकाणां
वृन्दं मुहुर्मुनिगृहान् मुखरीचकार ॥ ३८ ॥

नारायणेति । नारायणेत्यादीनि प्रोच्चार्यमाणानि प्रकर्षेणोच्चैरुदीर्य-माणानि रमणीयानि भक्तजनमनोहराणि मुकुन्दनामानि विष्णोः सहस्राधिकानि नामानि यैस्तादृशानामर्भकाणामसुरबालानामुद्दामेनोत्कृष्टेन भक्तिरसेन भगवद् भावनात्मना सुखेन निर्भरं सम्पूर्णं वृन्दं समूहः मुनिगृहान् शुक्रनिकेतनं मुहुः पुनः पुनः मुखरीचकार सशब्दघोषमकरोत् ॥ ३८ ॥

श्रुत्वा हिरण्यकशिपुः श्रुतिदुःसहं त-
च्चिन्तामधादहह विष्णुपरत्वमेतत् ।
एकत्र लग्नमपि दैत्यकुलं समस्तं
व्याप्नोत्यलर्कविषवत् सकलं शरीरम् ॥ ३९ ॥

श्रुत्वेति । हिरण्यकशिपुः श्रुतिदुःसहं कर्णयोरसहमरुन्तुदप्रायं तद्विष्णु-नामोच्चारणं श्रुत्वा चिन्तामधादचिन्तयत् । अहहेत्यमर्षद्योतकम् । एतदत्र प्रवर्तमानं विष्णुपरत्वं विष्णुभक्तिरेकत्र लग्नमपि प्रह्लादमात्रे प्रथममुद्भूतमपि समस्तं निश्शेषं दैत्यकुलमसुराभकसङ्घं व्याप्नोति । ... ... तद्वदिदमपीत्यर्थः ॥ ३९ ॥

नानास्त्रशस्त्रनिहतोऽपि विहीयतेऽसौ
नो वज्रलेपघटितैरिव जीवबन्धैः ।
आश्लिष्यते प्रतिमुहुर्बहु विष्णुभक्त्या
बालोऽपि हन्त विटपी विषवीरुधेव ॥ ४० ॥

नानेति । असौ प्रह्लादो नानाविधैरस्त्रशस्त्रैर्निहतः महतः सन्नपि जीव बन्धैर्न विहीयते प्राणैर्न विमुच्यते । अतो वज्रलेपघटितैरिव अष्टबन्धयोगद्रव्य

दृढीकृतैरिव प्रतिमुहुः पुनःपुनरपि विष्णुभक्त्या बालोऽप्यसौ बहाश्लिष्यते दृढमुपगूह्यते । हन्त कष्टमिदम् विषवीरुधा विषवल्ल्या बालविटपीव । तया समाश्लिष्टो विटपी तत्क्षणं शुष्यत्येव । तद्वद् विष्णुग्रहग्रस्तेनानेनास्माकं न किञ्चिदपि प्रयोजनमस्तीति भावः ॥ ४० ॥

पप्रच्छ चैनमुपसृत्य स दैत्यराजो
रे मूढ कस्तव तथापटुराश्रयोऽभूत् ।
यद्गौरवादहितखण्डनपण्डितान-
प्यस्मानहो भण तृणाय न मन्यसे त्वम् ॥ ४१ ॥

पप्रच्छेति । स दैत्यराजो हिरण्यकशिपुरेनं प्रह्लादमुपसृत्य उपगम्य पप्रच्छ पृष्टवांश्च । किमिति—रे मूढ दुर्बुद्धे ! तथापटुस्तादृक्समर्थः कस्तवाश्रयोऽभूदवलम्बनं जातः । यद्गौरवाद् यस्य गुरुत्वाद्धेतोरस्मानपि तृणाय न मन्यसे । त्वं तृणमपि (न) कल्पयसे । कीदृशान्—अहितखण्डने शत्रुविदलने पण्डितान् समर्थान् । अहो आश्चर्यमिदम् । भण शत्रुप्रमथनचतुरेभ्योऽस्मदपि बलीयांसं कतममवष्टभ्यास्मान्न बहुमन्यस इत्येतद् ब्रूहीत्येवं पप्रच्छेति सम्बन्धः ॥ ४१ ॥

अस्त्याश्रयः स तु ममैव न केवलस्य
लोकत्रयस्य स गतिः स गतिस्तवापि ।
व्याप्तिक्रियावचनविष्णुपदाभिधेयः
सोऽयं हरिः शरणमित्ययमप्यवादीत् ॥ ४२ ॥

अस्तीति । अयं प्रह्लादोऽप्यवादीद् उक्तवान् । किमिति — आश्रयोऽस्ति । तथापटुरवलम्बभूतः कश्चिदस्ति । अस्तीति सत्पदवाच्यः स एव । स तु केवलस्य ममैव नाश्रयः । कस्य तर्हि । लोकत्रयस्य त्रैलोक्यवासिनो जनस्य स गतिः स एवाधारः । तवापि स एव गतिः शरणं नान्यः । स क इति चेदाह — व्याप्तिक्रियावचनेन विष्णुपदेनाभिधेयः अभिधातुं शक्यः । अथवा 'विष्लृ व्याप्ता'विति धातोरभिधेयोऽर्थः स एव । तदुक्तम् "विश्वव्याप्तिवहेतोर्जगति सुमतिभिर्विष्णुरित्युच्यते यः" इति । सोऽयं तादृक्प्रभावो हरिः दुरितानि हरतीति हरिपदाभिधेयोऽस्ति मम शरणं रक्षिता येन तव दुर्व्यवसायान्न बिभेमीति भावः ॥ ४२ ॥

यद्येवमद्य तव विष्णुरशेषवस्तु-
व्यापी निवारयतु शस्त्रमिदं मदीयम्।
इत्थं सहासमभिधाय सरोषडम्भः
स्तम्भे हिरण्यकशिपुः प्रजिघाय शस्त्रम्॥ ४३॥

यदीति। एवं यदि व्याप्तिक्रियावचन इति यथा त्वयोक्तं स तथा चेत् तर्ह्यद्य अशेषवस्तुषु व्यापी व्यापनशीलस्तव विष्णुर्मदीयमिदं शस्त्रं खड्गं निवारयतु रुणद्धु वपुषि निपतनान्निरस्यतु। सरोषडम्भः रोषेण डम्भेन च सहितः। 'डम्भस्त्वनृतवाग्वृत्त्या पौरुष(खानं? ख्यापनं)निजम्' इति हि तल्लक्षणम्। हिरण्यकशिपुरित्थं सहासम् उच्चैः प्रहसन्नभिधायोक्त्वा स्तम्भे सभामण्डपस्थूणायां शस्त्रं प्रजिघाय प्रयुक्तवान्। शस्त्रेण स्तम्भे प्रहृतवानित्यर्थः॥ ४३॥

पर्जन्यजन्यकटुगर्जिततर्जनोर्जः-
स्फूर्जत्तरस्फुटनिरुद्धकुलाद्रिरन्ध्रः।
दिक्कुम्भिकर्णकुहरत्रुटनप्रवीणः
स्थूणोदरादजनि कोऽपि तदा निनादः॥ ४४॥

पर्जन्येति। तदा तत्प्रहरणसमये स्थूणोदरात् स्तम्भस्यान्तर्भागात् कोऽपि ईदृगिति वक्तुमशक्यो निनादः शब्दोऽजनि जातः। पर्जन्यात् प्रलयघनाद् जन्यस्य जातस्य 'भव्यगेय' इत्यादिना कर्तरि कृत्यः। कटोः क्रूरस्य गर्जितस्य स्तनितस्य तर्जनेन भर्त्सनेनोर्जसा बलेन। स्वनमहिम्नेत्यर्थः। स्फूर्जत्तरः अतिशयेन प्रवृद्धः। किंच स्फुटं यथा भवति तथा निरुद्धानि कुलाद्रीणां रन्ध्राणि येन तादृशः। किंच दिक्कुम्भिनामाशान्तदन्तिनां कर्णकुहराणां त्रुटने भञ्जने प्रवीणः समर्थः। एवं यत्किंचिदव्यक्तमेवेति भावः॥ ४४॥

यच्छ्राविणो दितिसुताः कतिचिन्मुमूर्च्छुः
केचिन्निपेतुरवनौ लुलुठुस्तथान्ये।
एके विलेपुरपरे रुरुदुः परे तु
क्षिप्रं प्रदुद्रुवुरसूनितरे निरासुः॥ ४५॥

यद् इति। यच्छ्राविणो यस्य निनादस्य श्रोतारः कतिचिद्दितिसुता दैत्या मुमुर्च्छुर्मोहमुपगताः। केचिदवनौ निपेतुः पतितवन्तः। तथान्ये

लुलुठुः अवनावेव लुठनं चक्रुः । एके विलेपुः परिदेवनं चक्रुः । अपरे रुरुदुः क्रन्दितवन्तः । परे तु क्षिप्रमाशु प्रदुद्रुवुः तस्मात् प्रदेशात् पलायितवन्तः । इतरे असून् प्राणान् निरासुस्त्यक्तवन्तः । निष्पूर्वादस्यतेर्लिट् ॥ ४५ ॥

सम्भ्रान्तचक्षुरथ दिक्षु विदिक्षु च द्रा-
गीक्षाम्बभूव स यदा चकितोऽसुरेन्द्रः ।
स्तम्भादलक्ष्यत तदा बहिरुग्रदंष्ट्रा-
कोटिः सटावलिजटालमुखो नृसिंहः ॥ ४६ ॥

सम्भ्रान्तेति । अथ निनादश्रवणादनन्तरं सोऽसुरेन्द्रो हिरण्यकशिपुः यदा यस्मिन् काले येन चकितो भीतः सम्भ्रान्तचक्षुरनवस्थितनेत्रप्रचिः दिक्षु विदिक्षु च द्राक् क्षिप्रं ईक्षाम्बभूव । कुत एष शब्दः प्रवर्तत इति सर्वत्र चक्षुर्व्यापारं कृतवान् । तदा तस्मिन् काले नृसिंहः नरसिंहरूपो भगवान् महाविष्णुः स्तम्भाद् बहिरलक्ष्यत । सर्वजनैरिति शेषः ॥ ४६ ॥

अथ त्रिभिः श्लोकैरस्य विग्रहं विशिनष्टि —

तप्तारकूटकपिशाक्षिपुटस्फुटोद्य-
ज्ज्योतिश्छटारुणपटापिहितान्तरिक्षम् ।
उत्तालतालपृथुदीर्घभुजासहस्र-
प्रान्तस्फुरन्नखशिखालिखिताम्बुवाहम् ॥ ४७ ॥

तप्तेति । तप्तमनलाध्मातम् आरकूटं ताम्रलोहं तद्वत् कपिशयोस्ताम्रयोरक्षिपुटयोर्नेत्रान्तर्भागयोः स्फुटं यथा तथोद्यतामुद्गच्छतां ज्योतिषां छटा समूहः तद्रूपेणारुणपटेन कुसुम्भादिरक्तवस्त्रेणापिहितमाच्छादितमन्तरिक्षमाकाशो यस्य । उत्तालानामुन्नतानां तालद्रुमाणामिव पृथुदीर्घाणां स्थूलायतानां भुजानां सहस्रस्य प्रान्तेष्वग्रेषु स्फुरन्तीभिर्नखशिखाभिर्नखरशिखरैः लिखिता लीढा अम्बुवाहा मेघा यस्य ॥ ४७ ॥

जृम्भाविदीर्णमुखगह्वरलम्बमान-
जिह्वामहाभुजगवल्गितदुर्निरीक्षम् ।
प्रालेयपाण्डुरुचिभासुरकेसराली-
केलीविधूननविसंस्थुलमांसलांसम् ॥ ४८ ॥

जृम्भेति। संबाहूत्क्षेपं यो गात्रविनामः सा जृम्भा नाम। जभि जृभी गात्रविनाम इति धातुः। तया सह विदीर्णे व्यात्ते मुखगह्वरे लम्बमानस्याधस्तात् प्रवर्तमानस्य जिह्वारूपस्य महाभुजगस्य वल्गितेन भ्रमणेन दुर्निरीक्षं (भीतिं कृत्वा ?) दुरालोकम्। प्रालेयपाण्डुवा हिमशुभ्रया रुच्या भासुरायाः केसराल्या मुखलोमपङ्क्तेः केलीविधूननेन विसंस्थुलौ दन्तुरौ मांसलौ पृथू अंसौ स्कन्धभागौ यस्य ॥ ४८ ॥

स्थूलह्रसिष्ठतरकण्ठमकुण्ठनाद-
विद्रावितादिवनसञ्चरसत्त्वजालम्।
तत्तादृशं कमपि विग्रहमुग्रमुच्चै-
रग्रे हिरण्यकशिपुः सभयं ददर्श ॥ ४९ ॥

स्थूलेति। स्थूलः पृथुः ह्रसिष्ठतरोऽतिशयेन ह्रस्वश्च कण्ठो यस्य। अकुण्ठैरत्युच्चैः नादैः कण्ठरवैः विद्रावितं भयपलायितमद्रिवनसंचरं सञ्चारस्थानं यस्य तथाभूतं सत्त्वजालं सिंहव्याघ्रादिवनजन्तुसमूहो येन। तत्तादृशं तथाभूतं कमप्यनिर्देश्यम् उग्रं भयानकं विग्रहं भगवतो नरसिंहशरीरं हिरण्यकशिपुरग्रे पुरोभागे सभयं सत्रासं ददर्श दृष्टवान् ॥ ४९ ॥

हंहो! स एष खलु विष्णुरधृष्णुरस्म-
त्रस्यन्नदर्शनमगादियतोऽपि कालान्।
योऽसौ स संप्रति समक्षमुपैति दिष्ट्ये-
त्यभ्यापतद् भ्रमितचण्डगदः स दैत्यः ॥ ५० ॥

हंहो इति। हंहो आश्चर्यमिदम्। स खलु स एव विष्णुरेषः। योऽस्मदस्माकं सकाशात् त्रस्यन् भीतः सन्नधृष्णुरप्रगल्भ इयत एतावतः कालानप्यदर्शनमगात् क्वापि निलीनवान्। स तादृशोऽसौ संप्रतीदानीं दिष्ट्या दैवगत्या समक्षमुपैत्यस्मत्प्रत्यक्षतां प्राप्नोति। अस्यासन्नविनाशावसरत्वाद्दैवेनैव दर्शित इति भावः। इत्येवं जल्पन् दैत्यः स हिरण्यकशिपुः भ्रमिता कराञ्चले व्यावल्गिता चण्डा क्रूरा गदा येन। तथा सन्नभ्यापतत् भगवतोऽभिमुखमागतवान् ॥ ५० ॥

दोर्यन्त्रमध्यपतितोऽपि हरेस्ततः स
प्रभ्रश्य तत्क्षणगृहीतमहासिचर्मा ।
वल्गन्नफल्गुपटिमा विविधप्रकारं
भूयोऽप्यभीरभिससार तथोग्रमेनम् ॥ ५१ ॥

दोरिति । स दैत्यो हरेर्नृसिंहस्य दोर्यन्त्रमध्ये पतितः सन्नपि ततो दोर्यन्त्रमध्यात् प्रभ्रश्य प्रभ्रष्टो भूत्वा । बलादाकृष्टस्वशरीरः सन्नित्यर्थः । तत्क्षणमेव तदानीमेव गृहीतमहासिचर्मा करधृतखड्गफलकः । विविधप्रकारं नानाप्रकारं वल्गन् पतनोत्पतनमण्डलभ्रमणादिशरीरव्यायामविचेष्टितानि प्रदर्शयन् । अफल्गुपटिमा गुरुतरसङ्ग्रामसमर्थ इत्यर्थः । भूयोऽपि पुनरपि । अभीर्निर्भयः सन् तथोग्रं तत्तादृग्भयङ्करमप्येनं नृसिंहम् अभिससाराभिमुख्येनोपसृतवान् ॥ ५१ ॥

अग्रेऽभिपत्य कृतविग्रहमुग्रशस्त्र-
व्यग्राग्रहस्तमतिदुर्ग्रहमग्रहीत्तम् ।
द्वारस्थितो नृहरिराशु निजोरुभागे
घोरप्रहारशतविक्षतमाक्षिपच्च ॥ ५२ ॥

अग्रे इति । नृहरिर्नरसिंहोऽग्रेऽभिपत्य स्वपुरोभागे समभिसृत्य उग्रेण शस्त्रेण खड्गेन व्यग्रः समसितोऽग्रहस्तो हस्ताग्रं यस्य । तथा कृतविग्रहं विहितयुद्धम् अतिदुर्ग्रहं ग्रहीतुमत्यन्तमशक्यमपि तं दैत्यम् अग्रहीत् गृहीतवान् । द्वारस्थितः गृहस्यान्तर्बहिश्चायं न निग्राह्य इत्यादिवरलाभममोघयितुमिदम् । घोरेण प्रहारशतेन विक्षतं विच्छिन्नसकलावयवमेनं निजे ऊरुभागेऽक्षिपच्च क्षिप्तवांश्च । भूम्यन्तरिक्षयोरप्यवध्यत्ववरपरिजिहीर्षयेदमपि ॥ ५२ ॥

वक्षः शिलाकठिनमस्य दृढास्थिकूट-
स्फोटोच्चलच्चटचटारवभैरवं तत् ।
वज्रादपि स्थिरखरैर्नखरैर्व्यदारी-
दुद्गल्वरक्षतजपिच्छिलमुच्चकैः सः ॥ ५३ ॥

वक्षः इति । स नृहरिरस्य ऊरौ क्षिप्तस्य हिरण्यकशिपोः । तत् तथा वक्ष्यमाणविशेषणविशिष्टं वक्ष उरःस्थलम् । वज्रादपि स्थिरैः कठिनैः खरैस्तीक्ष्णैर्नखरैः व्यदारीद् द्विधा विदारितवान् । कीदृशं वक्षः । शिलाकठिनं पाषाणवत् कर्कशम् । दृढस्य स्थिरतरस्यास्थिकूटस्यास्थिसङ्घातस्य

स्फोटात् त्रुटनादुच्च ञ्चोद्गच्छता चटचटारवेण भैरवं शृण्वतां भयङ्करम् । उच्चकै-रूर्ध्वम् उद्गत्वरेणोत्पतनशीलेन क्षतजेन पिच्छिलमार्द्रीभूतम् ॥ ५३ ॥

मस्तिष्कपङ्कबहलाद्दलितास्थिनाला-
दुद्धातचित्तकमलादसुराधिपस्य ।
आदाय स क्षतजतोयमुरस्तटाका-
दुच्चण्डगर्जितमपान्मुहुरिद्धकोपः ॥ ५४ ॥

मस्तिष्केति । स नृहरिरिद्धकोपः प्रवृद्धामर्षः सन् असुराधिपस्योर-स्तटाकादुरस एव तटाकात् क्षतजं रुधिररूपं तोयमादाय कराञ्जलिपुटे गृहीत्वा उच्चण्डगर्जितं क्रूरतरसिंहनादं यथा भवति तथा मुहुः अनेकवारं अपात् पीतवान् । इद्धकोपाग्निनिर्वापणार्थेदं तोयपानम् । उरसस्तटाकत्वेन रूपणात् तदनुगुणानि विशेषणान्याह । मस्तिष्कं वसा द्रूपेण पङ्केन कर्दमेन बहलात् सान्द्रात् । दलितास्थिनालात अस्थिरूपबिसकाण्डात् । उद्धातमुद्धूतं चित्तमेव कमलं यस्मात्तादृग्भूतादुरस्तटाकादिति सम्बन्धः ॥ ५४ ॥

अङ्गानि चन्द्रकरशुभ्रतनूरुहाण्य-
प्यस्रच्छटाच्छुरणकर्बुरकान्तिभून्ति ।
सन्ध्यातपारुणिमशारितशारदाभ्र-
विभ्रान्तिकृन्ति विभुराबिभरांबभूव ॥ ५५ ॥

अङ्गानीति । विभुर्भगवान् नृसिंहः अङ्गानि स्वशरीरावयवान् चन्द्रकरा इव शुभ्रा(णि) धवला(स्त ? नि त)नूरुहाणि रोमाणि येषां तथाभूतानि अपि अस्रच्छटाः रुधिरप्रवाहस्य छुरणेन सम्पर्केण हेतुना कर्बुरकान्तिभून्ति सिति-मारुणिमशबलितां कान्तिं वहन्ति सन्ति । सन्ध्यातपस्यारुणिम्ना शोणिम्ना शारितानां शबलितानां शारदानां शरत्समयसम्भूतानां अभ्राणां वारिवाहानां सम्बन्धिनीं विभ्रान्तिं भ्रमं कुर्वन्तीति तथाभूतानि । सन्ध्यारागानुलिप्तशारद-वारिदाः किममूनीति सन्देहकारीणीत्यर्थः । तादृशान्यङ्गानि आबिभरांबभूव आभरणस्थानितया धारयामास ॥ ५५ ॥

उत्तालमांसलतमांसगलावसक्त-
रक्तस्रुदान्त्रगुणभूषणभूषिताङ्गः ।
अक्षान्तरोषमविपाटलमक्षियुग्मं
चिक्षेप दिक्षु स दिधक्षुरिव त्रिलोकीम् ॥ ५६ ॥

उत्तालेति । स नृहरिस्त्रिलोकीं दिधक्षुरिव दग्धुमिच्छुरिव अक्षान्तरोषमप्रशान्तकोपं यथा भवति तथा अतिपाटलमत्यन्तारुणमक्षियुग्मं दिक्षु सर्वाशासु चिक्षेप प्रेरितवान् । कीदृशः स विभुः । उत्तालयोरुन्नतयोर्मांसलतमयोरतिशयेन पृथ्वोरंसयोः स्कन्धयोर्गले कण्ठे चावसक्तैराबद्धैः रक्तस्रुद्भिः शोणितमुद्वमद्भिरान्त्रगणैरान्त्रमालाभिरेव भूषणैरलङ्कारसाधनैर्भूषितान्यलङ्कृतान्यङ्गानि यस्य तादृश इति । किमतः परं भयानकस्थानमिति भावः ॥ ५६ ॥

हित्वा हिरण्यकशिपोर्व्यसु तच्छरीरं
प्रोत्थाय दैत्यपटलं निखिलं चखाद ।
इत्थं भयानकतनुर्दनुजारिसिंहः
संहाररुद्रमपि स द्रुतमत्यशेत ॥ ५७ ॥

हित्वेति । दनुजारिसिंहो नरसिंहमूर्त्तिर्भगवान् महाविष्णुर्हिरण्यकशिपोः तद् व्यसु विगतप्राणं शरीरं हित्वा परित्यज्य प्रोत्थाय निखिलं निश्शेषं दैत्यपटलं दानवसमूहं चखाद भक्षितवान् । इत्थमुक्तप्रकारेण भयानकतनुर्भयङ्करशरीरः संहाररुद्रं कालरुद्रमूर्त्तिं भगवन्तं श्रीपरमेश्वरमपि द्रुतं क्षिप्रं अत्यशेत स नृसिंहमूर्त्तिरित्यर्थः ॥ ५७ ॥

तत्तादृशं तमभिसर्तुमपारयद्भिः
सञ्चोदितः शतधृतिप्रमुखैरमर्त्यैः ।
भक्तोत्तमः स खलु निर्भयमर्भकोऽपि
प्रह्लाद एत्य हरिमस्तुत वस्तुतोऽमुम् ॥ ५८ ॥

तद् इति । शतधृतिप्रमुखैर्ब्रह्मादिभिरमर्त्यैस्तत्तादृशं तथा भीषणस्वरूपं नृसिंहमभिसर्तुमाभिमुख्येनोपेतुमपारयद्भिरसमर्थैः सद्भिः सञ्चोदितो नियुक्तोऽर्भकोऽपि अत्यन्तशिशुरपि भक्तोत्तमो विष्णुभक्तेष्वग्रगण्यः स खलु प्रह्लादो निर्भयं भयरहितं यथा तथा एत्य प्राप्य । भक्तोत्तमत्वमत्र भयराहित्यहेतुः । हरिममुं नृसिंहं वस्तुतस्तत्त्वतोऽस्तुत स्तुतवान् ॥ ५८ ॥

जागर्ति जाग्रति जगज्जगदीश यस्मिन्
यस्मिन् पुनः स्वपति तत् स्वपिति त्रिधामन् ।
द्वैतभ्रमस्य विषयः स कथं भवान् स्या-
त्तस्मै नमोऽस्तु भगवन् परमात्मने ते ॥ ५९ ॥

जागर्तीति । हे त्रिधामन् ! ब्रह्मविष्णुशिवात्मधामत्रयमवलम्बमान हे जगदीश! यस्मिन् भवति जाग्रति योगनिद्रामपनीय स्थिते सति जगत् त्रिभुवनमिदं जागर्ति चैतन्ययुक्तं भवति । यस्मिन् पुनः स्वपति निद्रायमाणे सति तज्जगत् स्वपिति निश्चेष्टं भवति । भवतो निद्राकाल एव प्रलयकाल इति भावः । तत्तादृशो भवान् द्वैतभ्रमस्य जीवात्मपरमात्मत्वेन द्विधा द्वैतं तद्रूपस्य भ्रमस्य । परमात्मनः पृथगमूनि जीवस्वरूपाणीति भ्रान्तेर्विषयः कथं स्यात् । अद्वैतसदानन्दब्रह्मैव भवानित्यर्थः । हे भगवंस्तस्मै तादृङ्महिम्ने परमात्मने ते नमोऽस्तु । सर्वात्मना प्रह्वो भवामि ॥ ५९ ॥

प्रमोहार्णवे मज्जनं यज्जनानां
  भ्रमाधायिमायासमायातमेतत् ।
शमं याति यद्यस्य तत्त्वावबोधा-
  न्नमस्ते हरे नारसिंहाय तस्मै ॥ ६० ॥

प्रमोहेति । प्रमोहार्णवे संसारसागरे जनानां यन्मज्जनमवगाहनं तद् भ्रमाधायिन्या भ्रममुपपादयन्त्या मायायाः सकाशात्समायातं सम्प्राप्तम् । एतद् यस्य ब्रह्मस्वरूपस्य भगवतस्तत्त्वावबोधे परमार्थज्ञाने सति तन्मोहार्णवनिमज्जनं शमं याति प्रशाम्यति । तदुक्तम् —

'शुक्तौ रूप्यमिव स्रजीव भुजगः स्वात्मावबोधे हरा-
वज्ञाते प्रभवत्यथास्तमयते तत्त्वप्रबोधोदयात् ।'

इति । हे हरे नारसिंहाय नरसिंहरूपिणे तस्मै तथाभूतप्रभावाय ते नमोऽस्तु ॥ ६० ॥

अमूर्त्तिः स्वतो यद्यपि त्वं तथापि
  प्रपन्नार्त्तिविध्वंसनायात्तमूर्त्तिः ।
जले चन्द्रवद्भ्रान्तये कल्पसे यो
  नमस्ते हरे नारसिंहाय तस्मै ॥ ६१ ॥

अमूर्तिरिति । यस्त्वं स्वतः स्वभावेनामूर्तिर्मूर्त्तिरहितो निष्कलब्रह्मात्मा यद्यपि तथापि प्रपन्नानां शरणं प्राप्तानां जनानामार्त्तिविध्वंसनाय संसारदुःखप्रशमनार्थमात्तमूर्तिर्गृहीतशरीरः सकलविग्रहः । भगवतः सर्वाङ्गसौन्दर्यविभावनं हि जनानां भक्तिहेतुः । भक्तिस्तु मुक्तिहेतुरिति भक्तानुग्रहार्थं विग्रहस्वीकारः ।

तथा सन् भ्रान्तये विष्णुः, शिवो, ब्रह्मा, शाक्ता, षण्मुख इत्याद्यनेकस्वरूपभ्रमाय कल्पसे समर्थो भवसि। जले चन्द्रवत् कूपतटाककासारसरिदादिसर्वसलिलेषु पृथक् पृथक् प्रतिबिम्बितत्वादेकोऽप्यनेक इव प्रतिभाति चन्द्रः। तद्वत्तव मूर्त्तिरपीत्यर्थः ॥ ६१ ॥

तिले तैलवद्वस्तुषु व्याप्तमेकं
गुणैरप्यनालीढमानन्दसान्द्रम्।
महत्तन्महो यस्य विश्वस्य कर्त्रे
नमस्ते हरे नारसिंहाय तस्मै ॥ ६२ ॥

तिले इति। यस्य तद्वत् तथा प्रसिद्धं महत् प्रभूतं महस्तेज आनन्दसान्द्रं परमानन्दरूपं सच्चिदात्मकमेकमद्वितीयं वस्तुषु नरतिर्यक्स्थावरादिषु तिले तैलं यथा तथा सर्वत्र व्याप्तं गुणैः सत्त्वरजस्तमोभिरप्यनालीढमस्पृष्टम् तादृशं महो जयतीति शेषः। तस्मै ते विश्वस्य कर्त्रे चराचरप्रपञ्चस्य प्रकटयित्रे नमः ॥ ६२ ॥

श्रुतिः पूर्वतो भावनं तत्परस्तात्
ततश्चोपरिष्टान्निदिध्यासनं च।
प्रयत्नत्रयेणामुना यत्प्रबोधो
नमस्ते हरे नारसिंहाय तस्मै ॥ ६३ ॥

श्रुतिरिति। श्रुतिर्वृद्धमुखेभ्यः श्रवणं पूर्वतः प्रथमम्। तत्परस्तादुपरि भावनं श्रुतस्यार्थस्यात्मनि दृढीकरणम्। ततश्चोपरिष्टाद् भावनानन्तरं निदिध्यासनं तत्त्वदर्शनमेव। अमुना श्रवणमनननिदिध्यासरूपेण प्रयत्नत्रयेण यत्प्रबोधो यस्य भवतस्तत्त्वज्ञानम्। भवतीति शेषः। तदुक्तम् —

'वृद्धेभ्यस्तावदाकर्णनमथ च पुनर्भावनं सावधानं
भावापत्तौ निदिध्यासनमिति मुनयो यत्कृते यत्नमाहुः।'

इति। तस्मै ते नमः ॥ ६३ ॥

परं निष्क्रियं निष्कलं निष्कलङ्कं
परिज्ञेयमेकेन भक्तिग्रहेण।
सदाभास्वरं ब्रह्म यस्मिन्मयं त-
न्नमस्ते हरे नारसिंहाय तस्मै ॥ ६४ ॥

परम् इति । सदाभास्वरं सर्वकालेषु भासनशीलं चिन्मयं ज्ञानस्वरूपं परं प्रकृतेः परस्ताद्वर्तमानं यन्निर्व्यापारं निष्कलङ्कं निर्दोषं भक्तिग्रहेण भक्तिस्वीकारेण एव केवलेन परिज्ञेयं ज्ञातुं शक्यं न तु शास्त्रादिग्रहेण । शास्त्रस्य तु साङ्ख्याद्यनेकमतप्रपञ्चभिन्नभिन्नत्वाद् दुरवबोधत्वम् । प्रेमात्मिकाया भक्तेस्तु परमेकस्या एव भगवत्तत्त्वविज्ञानं सिद्ध्यतीत्यर्थः । तत् तादृशं ब्रह्म यः यस्त्वमेव । तस्मै ते नरसिंहरूपाय नमः ॥ ६४ ॥

उपसंहरति —

एवंप्रायस्तवपदनवस्रग्भिरभ्यर्चयन्तं
प्रह्लादं तं प्रमुदितमनाः शान्तरोषोऽनुगृह्णन् ।
यः कारुण्यादभयमददल्लोकनाथस्त्रिलोक्यै
सोऽयं विष्णुः प्रशमयतु वो नारकं नारसिंहः ॥ ६५ ॥

एवमिति । यो विष्णुरेवंप्रायाभिः स्तवपदनवस्रग्भिः स्तुत्यक्षरनूतनमाल्यैरभ्यर्चयन्तमाभिमुख्येन स्थित्वा पूजयन्तं प्रह्लादं प्रमुदितमनाः प्रहृष्टधीः शान्तरोषः प्रशमितकोपः सन्ननुगृह्णन् अनुग्रहं प्रदिशन् कारुण्याद्धेतोस्त्रिलोक्यै लोकत्रयवासिभ्यो जनेभ्यः अभयमददत् । लोकत्रयकण्टकं हिरण्यकशिपुं हत्वा भीत्यभावं दत्तवान् । सोऽयं तथाभूतप्रभावो लोकनाथो लोकानामीश्वरो निजाभिमतवस्तुयाच्ञाविषय आशिषः प्रयोक्ता विष्णुर्विश्वव्यापी भगवान्नारसिंहो नरसिंहमूर्तिर्वो युष्माकं नारकं दुरितं प्रशमयतु । नरकमेव नारकम् । 'स्यान्नारकस्तु नरकः' इत्यमरः । प्रार्थनायां लोट् । तादृग्भूतप्रभावो भगवान् नारायणो भवतामघप्रशमनपूर्वकमानन्दरूपं मङ्गलं सम्पादयतु इति सिद्धम् ॥ ६५ ॥

इति विष्णुविलासव्याख्यायां
चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

अथ वामनावतारं प्रस्तौति —

अथ महाबलिना बलिना रणे
निजसुतेषु जितेषु सुपर्वसु ।
अदितिरेत्य कदाचन काश्यपं
प्ररुदती वदति स्म पतिं सती ॥ १ ॥

अथेति । भगवतो नरसिंहावतारादुपरि काले निजसुतेष्वात्मीयापत्येषु सुपर्वसु पुरन्दरादिदेवेषु बलिना बलवता महाबलिना रणे देवासुरसमरे जितेषु पराभूतेषु सत्सु अदितिः कदाचन कस्मिंश्चित्समये पतिं भर्तारं काश्यपमेत्य प्राप्य प्ररुदती सती वदति स्म उक्तवती ॥ १ ॥

अविनयैरिव शास्त्रपरिश्रमा
मधुमदैरिव वा सहजा गुणाः ।
मम सुता भगवन् मघवन्मुखा
दितिसुतैः स्वपदादपवाहिताः ॥ २ ॥

अविनयैरिति । हे भगवन् ! मघवन्मुखा इन्द्रादयो मम सुता दितिसुतैः बलिप्रमुखैरसुरैः स्वपदादात्मीयस्थानात् स्वर्गादपवाहिता निराकृताः । किमिव । अविनयैः प्रशमाभावैः शास्त्रपरिश्रमा इव व्याकरणतर्कवेदान्तादिशास्त्रेषु परिचया अभ्यासा इव । अविनयो हि विद्यां विफलीकरोति । मधुमदैर्मद्यपानजनितैर्मदैः सहजा गुणा इव वा । मधुमदो हि स्वभावं विपर्यस्यति ॥ २ ॥

अहमिदं प्रवदामि न केवलं
ममतया मतया महतामपि ।
इह न कस्य शुचे गुणशालिनां
परिभवोऽरिभवोऽयमहेतुकः ॥ ३ ॥

अहमिति । महतां महाजनानामपि मतयाभिप्रेतया ममतया ममत्वेन पुत्रा इति स्नेहेन हेतुना केवलमहमिदं न प्रवदामि । किं तर्हि । इह अस्मिन् लोके अहेतुको निष्कारणोऽरिभवः शत्रोः सकाशादुद्भूतः गुणशालिनां गुण-

वतां जनानां परिभवः पराजयः कस्य जनस्य शुचे दुःखाय न भवति । सर्वस्यापि दुःखमुत्पादयेदित्यर्थः ॥ ३ ॥

वसुभिरेष वृषण्वसुभिर्वृषा
विरहितोऽपि तथा न दुनोति मां
निभृतहासनिकुञ्चितलोचनं
प्रमदशोभि यथा वदनं दितेः ॥ ४ ॥

वसुभिरिति । एष वृषा शक्रो वृषण्वसुभिर्वसुभिः । 'वृषण्वसु धनाधैन्द्रम्' इत्यमरः । विरहितोऽपि वियुक्तोऽपि तथा तादृक्प्रकारं मां न दुनोति न दुःखयति । यथा यादृक्प्रकारं दितेर्मम सपत्न्या वदनं मां दुनोति । कीदृशम् । निभृतेन निगूहितेन हासेन परिहासस्मितेन निकुञ्चिते सङ्कोचिते लोचने यस्य । प्रमदो हर्षस्तेन शोभितुं शीलमस्येति । तथा न पीडयति । न(ष्ट) सर्वस्वेऽपि मम पुत्र इत्यर्थः ॥ ४ ॥

नञिवयुक्तनयेन नयेत मा-
मदितिमत्र भवान् दितितुल्यताम् ।
यदिह निम्नतले विनिपेतुषां
समतलाधिगमोऽपि समुन्नतिः ॥ ५ ॥

नञिवेति । अत्र भवानदितिं मां दितितुल्यतां दित्या सदृशत्वं नयेत प्रापयतु । तत् कथमिति चेदुच्यते । नञिवयुक्तनयेन । तत्सादृश्यं तदन्यत्वमित्यादिना नञः षडर्थाः सन्ति । तेषां मध्ये तत्सादृश्यं योऽर्थो नञस्तस्यार्थस्य स्वीकारो नञिवयुक्तन्यायः । अब्राह्मण इत्युक्ते ब्राह्मणसदृश इत्यर्थः । तद्वददितिरित्युक्ते दितिसदृशीत्यर्थः संभवत्येव । अयं हि नञ इवार्थः । तदभ्युपगमेन मां दितिसदृशीं करोतु भवानित्यर्थः । ननु तत्सदृशीकरणेन तव किमायातीति चेदत्राह— इह लोके निम्नतले कूपाद्यधःस्थले विनिपेतुषां विनिपतितानां समतलस्याधिगमः समस्थले प्राप्तिरपि समुन्नतिरुच्चैःपदाधिगमः । यत् तस्मादिदमुक्तमित्यर्थः । अत इदानीं दितितुल्यत्वलाभादेवोत्कृष्टतां लप्स्यत इति भावः ॥ ५ ॥

अथ मुनिर्निजगाद कृतं शुचा
भवतमामदिते धृतिशालिनी ।
तनुभृतामहितं च हितं च य-
न्नियतिराकलयत्यनवस्थितम् ॥ ६ ॥

अथेति । अथानन्तरं मुनिः काश्यपो निजगाद निगदितवान् । हे अदिते शुचा कृतं दुःखेनालम् । धृतिशालिनी धैर्ययुक्ता भवतमाम् अतिशयेन धीरा भव । यद्यस्माद्धेतोर्नियतिः कालस्वरूप ईश्वरः तनुभृतां शरीरिणाम् । अहितमप्रियं च हितमिष्टं च अनवस्थितं व्यवस्थारहितमाकलयत्युत्पादयति । कदाचित् किञ्चिदनुभावयतीत्येव । तादृगदृष्टमपरिज्ञेयमेवेति भावः ॥ ६ ॥

उपदिशामि विशालविलोचने
सपदिसिद्धिविधायि पयोव्रतम् ।
इदमितश्चतुरोऽष्ट च वासरान्
समनुतिष्ठ समाधिमती सती ॥ ७ ॥

उपदिशामीति । हे विशालविलोचने सुन्दरि सपदि क्षिप्रमेव सिद्धिविधायि समीहितकार्यस्य सर्वस्यापि सिद्धिं कुर्वत् पयोव्रतं नाम व्रतविशेषमुपदिशामि त्वां ग्राहयामि । इदं व्रतं इतोऽस्माद्दिवसादारभ्य चतुरोऽष्ट च वासरान् द्वादशदिनानि समाधिमती नियमवती सती समनुतिष्ठ सम्यग्विधेहि ॥ ७ ॥

प्रवरमन्त्रजपेन जनार्दनो
भृशतरं त्वयि तुष्टिमवाप्स्यति ।
इति वदन्नचिरादुपादिष्टवा-
नादितये मुदितः स पयोव्रतम् ॥ ८ ॥

प्रवरेति । प्रवरस्य प्रकृष्टतमस्य मयोपदेक्ष्यमाणस्य मन्त्रस्य जपेन हेतुना जनार्दनो भगवान् महाविष्णुस्त्वयि भृशतरमत्यर्थं तुष्टिमवाप्स्यति प्रसन्नो भविष्यति । तत्प्रसादानन्तरमेव समीहितसिद्धिरिति भावः । इति वदन् काश्यपोऽचिरात् क्षिप्रमदितये मुदितः सन् पयोव्रतमुपादिष्टवान् । तन्मन्त्रोपदेशं कृतवानित्यर्थः ॥ ८ ॥

तदुपदिष्टमनुत्तममादरा-
दिदितिराशु समारभत व्रतम् ।
विमलपूतमनोमुकुरोदर-
प्रकटबिम्बितविष्णुपदाम्बुजा ॥ ९ ॥

तदिति । अदितिस्तदुपदिष्टं तेन काश्यपेनोपदिष्टमनुत्तममतिशयेनोत्तमम् । अस्मादपरमुत्तमं नास्तीत्यनुत्तमम् । व्रतं पयोव्रतमादरादास्तिक्येनाशु समारभतारब्धवती । कीदृशी । विमले निर्दोषे पूते विशुद्धे मनस्येव मुकुरोदरे दर्पणोदरे प्रकटं यथा भवति तथा बिम्बितं प्रतिफलितं विष्णुपदाम्बुजं यस्याः । ध्यानदृष्ट्या हृदि स्फुटप्रदर्शित(पर ? हरि)चरणाम्बुजाभूदित्यर्थः ॥ ९ ॥

अवासितौ नियमस्य तदग्रत-
स्तरुणनीलवलाहकमेचकम् ।
धृतगदारिदराब्जचतुर्भुजं
मधुरिपुर्वपुराविरभावयत् ॥ १० ॥

... ... धृतगदारिदराब्जानि कौमोदकीसुदर्शनपाञ्चजन्यपद्मानि ... ...चत्वारो भुजा यस्य तादृशम् । इदं श्रीवत्सकौस्तुभवनमालापीताम्बरमकरकुण्डलमणिमयकटकाङ्गदादेरप्युपलक्षणं द्रष्टव्यम् ॥१०॥

हरिहयारिपराभवनुत्तये
तव सुतो भवितास्मि तपोधने ।
इति वदन्नदितिं मुदितां व्यधा-
त्तदनु तत्क्षणमन्तरधाच्च सः ॥ ११ ॥

हरिहयेति । हे तपोधने ! तवानेन तपसा सन्तुष्टोऽस्मीति संबुद्ध्यभिप्रायः । हरिहयस्येन्द्रस्यारेः शत्रोर्महाबलेः सकाशाद् यः पराभवः पराजयः तस्य नुत्तये अपनोदनार्थमहं तव सुतो भवितास्मि त्वद्गर्भमाविश्य जनिष्यामि । इति वदन्नदितिं मुदि । प्रीतां व्यधात् । स मधुरिपुस्तदनन्तरं तत्क्षणं क्षिप्रमेवान्तरधाच्चान्तर्हितोऽभवच्च ॥ ११ ॥

मुनिकुलप्रवरस्य तपस्यतो
मनसि सन्निहितो मधुसूदनः ।
अदितिगर्भमथो स समक्रमी-
दवृधदत्र च विश्वमुदा समम् ॥ १२ ॥

मुनीति । मधुसूदनः तपस्यतः तपसि वर्तमानस्य मुनिकुलप्रवरस्य काश्यपस्य मनसि सन्निहितः सान्निधानं कुर्वन् अथो तदनन्तरमदितेर्गर्भं समक्रमीत् समाक्रान्तवान् । अत्रादितिगर्भे विश्वेषां जनानां मुदा हर्षेण सम सोऽवृधच्च क्रमेण ववृधे च ॥ १२ ॥

श्रवणसम्मिलिते हरिवासरे
भुवनशोकतमोपहमुज्ज्वलम् ।
अदितिरेनमसूत चतुर्भुजं
हरिदिवेन्द्रधवा च दिवाकरम् ॥ १३ ॥

श्रवणेति । अनन्तरमदितिः श्रवणसम्मिलिते हरिवासरे श्रवणद्वाद-श्यामेनं चतुर्भुजं मधुसूदनमसूत प्रसूतवती । कीदृशम् । भुवनानां लोकानां शोकरूपं तमो हन्तीति तथाभूतमुज्ज्वलं दीप्यमानम् । चतुर्भुजमित्यन्यस्यापि भगवच्चिह्नस्योपलक्षणम् । इन्द्रो धवो भर्ता यस्याः सा इन्द्रधवा हरित् प्राची दिक् दिवाकरं सूर्यमिव । अत्रापि चतुर्भुजमित्यनुषज्यते । सूर्यस्य विष्णुस्वरू-पत्वात् ॥ १३ ॥

कटककुण्डलहारकिरीटिने
करधृतारिगदाम्बुजकम्बवे
नवकलायरुचे वनमालिने
नतिमकुर्वत पुष्पकिराः सुराः ॥ १४ ॥

कटकेति । पुष्पाणि किरन्ति वर्षन्तीति पुष्पकिराः । 'इगुपधाज्ञाप्री-किरः कः' इति कप्रत्ययान्तः । सुरा देवा कटककुण्डलादीन्यस्य सन्तीति तादृशाय । करैर्धृता अर्यादयश्चक्रादयो येन । नवकलायरुचे नूतनतापिञ्छद्युतये वनमालिने तस्मै भगवते नतिमकुर्वत नमस्कारमकुर्वन् ॥ १४ ॥

जय जयाच्युत विश्वपते विभो
फलवदातनुषे जनुरावयोः ।
अदितिकाश्यपयोरिति नम्रयो-
रयमलक्षि पटुर्वटुवामनः ॥ १५ ॥

जयेति । च्युतिर्न भवतीत्यच्युतः । हे अच्युत विश्वेषां पते विभो-विश्वव्याप्त ! त्वं जय जय । आवयोरदितेर्मम च जनुर्जननं फलवदातनुषे सफलं करोषि इत्येवं स्तुत्वादितिकाश्यपयोर्नम्रयोर्नमनशीलयोः कृतनमस्कारयोः सतोरेव अयं चतुर्भुजोऽपि पटुर्विदग्धो वटुर्वामनरूपो माणवकरूपोऽलक्षि लक्षितोऽभूत् ॥ १५ ॥

अथ कृतोपनयः परमेष्ठिना
विधिवदाहितकृत्यतयोज्ज्वलः ।
अजिनदण्डकमण्डलुमण्डितो
भृशमशोभयदाश्रममादिमम् ॥ १६ ॥

अथेति वटुवामन इत्यनुवर्तते । अथानन्तरं परमेष्ठिना ब्रह्मणा कृतोपनयः विहितोपनयनविधिः विधिवद्यथाविधि आहितकृत्यतया समनुष्ठितब्रह्मचर्याश्रमकर्मतयोज्ज्वलो दीप्ततेजा अजिनेन कृष्णाजिनेन दण्डेन पलाशदण्डेन कमण्डलुना जलपात्रेण मण्डितोऽलङ्कृतः सन् आदौ भवमादिममाश्रमं ब्रह्मचर्याश्रमं भृशमत्यर्थमशोभयत् शोभितं कृतवान् ॥ १६ ॥

तुरगमेधमहाध्वरदीक्षितो
बलिरसौ निवसत्युपनर्मदम् ।
इति निशम्य स कैतववामनः
प्रचलति स्म ततः पितरौ नमन् ॥ १७ ॥

तुरगेति । स कैतववामनः कपटवटुः । असौ बलिर्महाबलिर्दानवेन्द्र उपनर्मदं नर्मदाया रेवायाः समीपे तुरगमेधे अश्वमेधनाम्नि महाध्वरे महाक्रतौ दीक्षितः कृतदीक्षाप्रवेशो निवसतीति निशम्य मुनिजनमुखादाकर्ण्य पितरौ नमन्नदितिकाश्यपौ प्रणम्य । तदनुज्ञां प्रतिगृह्णन्नित्यर्थः । ततस्तस्मान्मारीचाश्रमात् प्रचलति स्म प्रतस्थे । १७ ॥

दरविकस्वरपङ्कजकुड्मला-
त्समुपचित्य परागभरं वहन् ।
तमथ भृत्य इवाध्वरुजं नुद-
न्ननुजगाम विभातसमीरणः ॥ १८ ॥

दरेति । अथानन्तरं विभातसमीरणः प्रभातवायुर्दरविकस्वरादीषद्विकसनशीलात् पङ्कजकुड्मलात्सकाशात् परागभरं सुमनोरजोरूपं भरं भारं समुपचित्य सम्यक् सञ्चितं कृत्वा वहन् भृत्य इव । यथा भृत्यः स्वामिनि प्रचलिते तस्य नित्योपकरणभाण्डं समूहीकृत्य शिरसि वहन्ननुगच्छति तथानुजगामानुगतवान् । अत्र च वायोरानुकूल्येनानुगमनं गच्छतः कार्यसिद्धिं सूचयेदित्येतदपि ध्वनितम् ॥ १८ ॥

विगतनिद्रविशृङ्खलनिष्पतत्-
पतगपक्षपरिक्षुभितैर्द्रुमैः ।
मधुपझङ्कृतिमङ्गलवादिभिः
स्वकुसुमैरधिवर्त्ममपूजि सः ॥ १९ ॥

विगतेति । कैतववामनः अधिवर्त्म वर्त्मनि । अव्ययीभावः । अनश्चेति समासान्तः । द्रुमैः वृक्षैः स्वकुसुमैरपूजि पूजितः । कीदृशैः । विगतनिद्रं प्रातरेव निद्रामपहाय विशृङ्खलमप्रतिबन्धं यथा तथा निष्पततामुपगच्छतां पतगानां पक्षिणां पक्षैर्गरुन्मरुद्भिः परिक्षुभितैः परिकम्पितैः । मधुपानां झङ्कृत्या कलकलेन मङ्गलवादिभिः कुशलस्तोत्रपाठकैः ॥ १९ ॥

प्रकथनौपयिकीमपनिद्रतां
शुककुलाय कुलायजुषे दिशन् ।
मुरजनादघनोऽस्य मनोऽहरत्
कलकपोतकपोतगलध्वनिः ॥ २० ॥

प्रकथनेति । कलो मधुरः कपोतकपोतानां पारावतशिशूनां गलध्वनिः कण्ठनादोऽस्य वामनस्य मनोऽहरत् अहृत । मनोमोदं चकारेत्यर्थः । मुरजस्य मृदङ्गस्य नाद इव घनः सान्द्रः । कुलायजुषे कुलायवर्तिने शुककुलाय शुकसमूहाय प्रकथनौपयिकीं प्रकथनस्य प्रजल्पनस्यौपयिकीं उपयोगभूतामप-

निद्रतां प्रबोधं दिशन् प्रतिपादयन् । कपोतशब्दश्रवणेन शुकाः प्रबुध्यन्ते । स च प्रबोधो जल्पनस्य प्रवर्तकत्वादुपयुज्यते ॥ २० ॥

जलधिजाकुचकुङ्कुमपङ्किलं
किमुत कौस्तुभकान्तिकरम्बितम् ।
इति किल भ्रमकारि नवातप-
च्छुरितमस्य रराज भुजान्तरम् ॥ २१ ॥

जलधिजेति । अस्य वामनस्य भगवतो भुजान्तरमुरःस्थलं नवातपेन बालार्करोचिषा छुरितं स्पृष्टं सद् रराज शुशुभे । मरतकश्यामलमस्य वक्षः पाटलबालातपसम्पृक्तत्वादतिशयरमणीयशोभमभूदित्यर्थः । अत्र सन्देहमुपन्यस्यति । जलधिजाया लक्ष्म्याः कुचकुङ्कुमेन तदालिङ्गनसङ्क्रान्तेन घुसृणरसेन पङ्किलं सञ्जातपङ्कं किमुत । अथवा कौस्तुभस्य कान्त्या करम्बितं व्याप्तं किमुत । इदमुभयमप्याशङ्कनीयम् । विष्णुवक्षःस्थानम् इत्येवं भ्रमकारि सन्देहजनकं सद् रराजेति सम्बन्धः ॥ २१ ॥

प्रथमतोऽधिगतह्रसिमापि सन्
क्रमधृतप्रथिमा भृशमूष्मलः ।
रविरुचां निचयो जगदानशे
पिशुनयन्निव तस्य चिकीर्षितम् ॥ २२ ॥

प्रथमत इति । रविरुचां सूर्यरश्मीनां निचयः समूहः प्रथमत आदौ अधिगतह्रसिमा प्राप्तह्रस्वभावस्तथा सन्नपि क्रमेण धृतप्रथिमा विस्तारं गच्छन् भृशमतिशयेनोष्मलः प्रतापवान् जगदानशे सर्वभुवनं व्याप्नोति स्म । तस्य कैतववामनकस्य चिकीर्षितं कर्तुमिष्यमाणं प्रस्तावं पिशुनयन् सूचयन् इव । सोऽप्यादौ ह्रस्वः सन् क्रमेण प्रवृद्धशरीरः सन् जगत्त्रयमाक्रमितुमुपक्रमेत ॥ २२ ॥

अथ वनादिसरःसरितः शनैः
समतिलङ्घ्य स विन्ध्यमहीभृतः ।
मदकलेभकपोलनिपीडन-
त्रुटितचन्दनवाटमगात्तटम् ॥ २३ ॥

अथेति। अथानन्तरं वनादीनि शनैर्मन्दमातिलङ्घ्यातिक्रम्य स कैतववामनः विन्ध्यमहीभृतो मदकलानां मदोत्कटानामिभानां यत् कपोलनिपीडनं गण्डस्थलेन कण्डूतिप्रशमनाय मद् वर्षणं तेन त्रुटिताः खण्डिताश्चन्दनवाटाश्चन्दनवृक्षसमूहा यस्मिंस्तादृशं तटमुपत्यकाभुवम् अगात् प्राप्तवान् ॥ २ ॥ ३

अपि गभीरमदोषतयाशयं
प्रकटयन्त्यनिशं ध्वनिशालिनी ।
सुकविसूक्तिरिवाधिकशर्मदा
सपदि तेन समैयत नर्मदा ॥ २४ ॥

अपीति । तेन वटुना सपदि नर्मदा रेवानदी समैयत सम्प्राप्तेत्यर्थः । इण्गतावित्यस्मात्कर्मणि लङि रूपम् । कीदृशी । गभीरमप्यगाधमप्याशयमधःस्थलम् अदोषतया जलस्य स्वच्छत्वात् प्रकटयन्ती प्रकाशयन्ती अनिशं सर्वदा ध्वनिशालिनी तरङ्गघोषवती । सुकवीनां कालिदासादिसत्कवीनां सूक्तिरिव वचनानां प्रपञ्च इवाधिकशर्मदा अत्यर्थसुखप्रदायिनी । सूक्तिपक्षे गभीरं कठिनमप्याशयमर्थतात्पर्यं निर्दोषतया काव्यदोषराहित्यात् प्रसादगुणयुक्तत्वात् प्रकटयन्ती व्यक्तावबोधानुकूल्यतां नयन्ती । ध्वनिशालिनी । ध्वनिर्नाम काव्यजीवितमुपस्कारकम् । तद्वतीति व्याख्येयम् ॥ २४ ॥

करिकरालकटावटनिर्गल-
न्मदजलाविलवीचिपरम्पराम् ।
तटशिलास्खलनोच्चलदारवां
द्रुततरं स ततार तरङ्गिणीम् ॥ २५ ॥

करीति । स वटुवामनो द्रुततरं क्षिप्रं तरङ्गिणीं नर्मदां ततार तीर्णवान् । कीदृशीम् । करिणां करालेभ्यो विशालेभ्यः 'करालं दन्तुरे तुङ्गे विशाले विकृतेऽपि च' इति वैजयन्ती । कटावटेभ्यो गण्डगर्तेभ्यो निर्गलद्भिर्निपतद्भिः मदजलैराविला कलुषा वीचिपरम्परा तरङ्गपङ्क्तिर्यस्याः । तटशिलासु यत्स्खलनमास्फालनं तत उच्चलन्त उद्भवन्त आरवाः शब्दा यस्यास्तादृशीमिति सम्बन्धः ॥ २५ ॥

अथ तदुत्तररोधसि निस्सर-
त्प्रचरद्भव्यसगन्धिसमीरणाम् ।

विततधूमविराजिवियत्पथा-
मकलयत् स पुरोऽध्वरशालिकाम् ॥ २६ ॥

अथेति । अथ नर्मदातरणानन्तरं तस्यास्तरङ्गिण्या उत्तररोधसि उत्तरतीरे निःसरन्तः प्रसरन्तः प्रचुराः प्रवृद्धाः हव्यसुगन्धा हव्यद्रव्यसम्पर्कसुरभयः समीरणाः यस्याः । विततेन व्याप्तेन धूमेन विराजी व्यापनशीलः वियत्पथो गगनमार्गो यत्संबन्धी तादृशीमध्वरशालिकां महाबलियज्ञशालां स पुरोऽकलयत् पुरोभागे दृष्टवान् ॥ २६ ॥

अभिससार स सान्द्रतरस्फुर-
न्निजशरीरमरीचिमनोहरः ।
सकलसम्मदसङ्घटनापटु-
र्वटुरमूमुडुराडिव शर्वरीम् ॥ २७ ॥

अभीति । वटुर्भगवानमूमध्वरशालिकामभिससार चाभिगतवान् च । सान्द्रतरमतिप्रवर्द्धमानं यथा तथा स्फुरन्तः प्रकाशमाना निजशरीरस्य मरीचयो ये रश्मय. तैर्मनोहरः । सकलानां जनानां सम्मदस्य हर्षस्य सङ्घटनायां सम्यगुपपादने पटुः समर्थः । उडुराट् चन्द्रः शर्वरीं रात्रिमिव । विशेषणद्वयमपि साधारणम् ॥ २७ ॥

शशधरोऽयमुपैति कुतः शश-
स्तपन एव नु न प्रतपत्यसौ ।
मनसिजो नु स नैव शरीरवा-
निति जना व्यवदन्त तदीक्षकाः ॥ २८ ॥

शशेति । तदीक्षकास्तस्य भगवत ईक्षका द्रष्टारो जना इति वक्ष्यमाणप्रकारेण व्यवदन्त वादं कृतवन्तः । विविधं प्रालपन्नित्यर्थः । किंप्रकारम् । अयं शशधर उपैति इति कश्चिदवदत् । शशधरश्चेत् शशः कलङ्कमृगः कुतः सोऽत्र न दृश्यते । तर्हि तपनः सूर्य एवोपैति नु । नेदमपि घटते । असौ न प्रतपति । सूर्यश्चेत् प्रतपत्येव । तर्हि मनसिजः काम एव नु । तदपि न सङ्घटते । स मनसिजः शरीरवान् न भवति । अस्य त्वतिमनोज्ञं दृश्यते शरीरमित्यादि विविधं सन्दिह्य विप्रलेपुः ॥ २८ ॥

भृगुभिरागमितोऽध्वरशालिका-
मुरुमहाः स चतुर्थ इवानलः ।
विधिवदर्घ्यमुखैरभिपूजितो
विनयभक्तिमयस्य महाबलेः ॥ २९ ॥

भृगुभिरिति । स भगवान् भृगुभिरध्वरशालिकामागमितः प्रवेशितः । उरुमहाः प्रवृद्धतेजाश्चतुर्थोऽनल इव त्रेताग्निरिव विनयभक्तिमयस्य तन्मयस्य महाबलेरर्घ्यमुखैरर्घ्यपाद्यादिभिर्विधिवद्यथाविधि अभिपूजितः सम्यक्पुरस्कृतो बभूवेति शेषः ॥ २९ ॥

अजिनकल्पितमासनमास्थितः
स्मितसुधाञ्चितवक्त्रसुधाकरः ।
सविनयेन कृताञ्जलिनामुना
निजगदे जगदेकपतिर्वटुः ॥ ३० ॥

अजिनेति । अजिनेन कृष्णमृगचर्मणा कल्पितं विहितमासनमास्थितः स्मितसुधया मन्दहासामृतेनाञ्चितः शोभितो वक्त्रसुधाकरो मुखचन्द्रो यस्य सः । तादृशो जगतामेकपतिर्वटुः वटुरूपो भगवान् महाविष्णुः सविनयेन विनयवता कृताञ्जलिनाञ्जलिं कृतवतामुना महाबलिना निजगदे निगदितः ॥ ३० ॥

अखिलचेतनलोचनरोचनै-
रमृतबन्धुभिरङ्गरुचीचयैः ।
द्विजकुमार ममान्तरमिन्द्रियं
हरसि चन्द्र इवातिमनोहरः ॥ ३१ ॥

अखिलेति । हे द्विजकुमार ! अखिलानां चेतनानां प्राणिनाम् । 'प्राणी तु चेतनो जन्मी' इत्यमरः । लोचनेभ्यो रोचनै रुचिं कुर्वद्भिरमृतबन्धुभिः सुधासदृशैरङ्गरुचीनामवयवप्रभाणां चयैः सन्ततिभिस्त्वं चन्द्र इवातिमनोहरः सन् ममान्तरमिन्द्रियं मनो हरसि समावर्जयसि ॥ ३१ ॥

कतममङ्ग करोषि महत्तरं
पतिमपामिव शीतलदीधितिः ।
मणिरिवापि च रोहणभूधरं
निजसमुद्भवकारणतां गतम् ॥ ३२ ॥

कतमम् इति। अङ्ग हे कुमार! निजसमुद्भवस्यात्मजननस्य कारणतां गतं हेतुभूतं कतमं जनं महत्तरमतिशयेन महान्तं करोषि। कस्ते जनयितेति प्रश्नार्थः। शीतलदीधितिश्चन्द्रोऽपां पतिं समुद्रमिव। मणिर्वैडूर्यरत्नं रोहण-भूधरं विडूराद्रिमिव च। तयोरुद्भवेनाम्बुधिरोहणौ महान्तावभूताम्। तद्वत्-कतममात्मोत्पत्त्या महान्तं करोषीति। ब्रूहीति शेषः॥ ३२॥

कतमदर्भक गोत्रमलङ्करो-
ष्युभयवंशविशुद्धिमदुच्चकैः।
इह हि हेतुमतो गुण ईक्षितः
स खलु शंसति हेतुगुणोत्करान्॥ ३३॥

कतमद् इति। हे अर्भक! उच्चकैरुन्नततरमुभयोर्मातृपितृसम्बन्धिनो-र्वंशयोर्विशुद्धिमद्विशुद्धियुक्तं कतमद्गोत्रं त्वमलङ्करोषि। कस्यां परम्पराया-मुद्भूतो भवानिति प्रश्नः। तस्योभयवंशविशुद्धिमत्त्वमनुमीयत एवेत्याह। इह लोके हेतुमतः हेतुरस्यास्तीति हेतुमान् तस्य कार्यभूतस्य यो गुण ईक्षितः प्रत्यक्षदृष्टः स खलु गुणो हेतोः कारणभूतस्य गुणोत्करान् गुणसम्पदः शंसति स्पष्टं प्रकथयति। ज्ञापयतीत्यर्थः। कारणगुणो हि कार्ये दृश्यत इति कार्यगुणेन कारणगुणोऽनुमेयः स्यादेवेत्यर्थः॥ ३३॥

***रुचितवस्तुसमास्वदनोत्सवं**
प्रतिरुणद्धि रुजेव जनस्य या।
न खलु सेयमकिञ्चनताधुना
वितनुते तव कच्चिदिमं श्रमम्॥ ३४॥

रुचित इति। अथ तदागमप्रयोजनं पृच्छति। या अकिञ्चनता दरिद्रता। किञ्चिदपि नास्तीत्यकिञ्चनः, तस्य भावोऽकिञ्चनता। रुजेव रोग इव जनस्य रुचितस्य वस्तुनः कनकवनितावसनसदनादेरभिलषितस्य पदार्थस्य समास्वदनं सम्यगास्वादनम्। अनुभव इति यावत्। तद्रूपमुत्सवं प्रमोद-हेतुत्वादुत्सवसदृशम्। प्रतिरुणद्धि प्रबाधते। रोगपक्षे खाद्यपेयभोज्याद्याहार-सुखमपथ्यभयात् प्रतिरुणद्धि। सेयं तथाभूता अकिञ्चनता कर्त्री तवेमं श्रमं

---

* रुचिर इति पाठान्तरम्।

स्वयमागमनरूपं खेदमधुना न खलु कश्चिद्वितनुते विदधाति । दरिद्रता-हेतोरर्थयाचनार्थमत्रागत' कश्चिदिति प्रश्नः ॥ ३४ ॥

अथ तु धैर्यमिवाशु मनोभवो
यश इवोज्ज्वलमाजिपराभवः* ।
श्रुतिमिवाविनयो न निहन्ति[1] वा
तव तपोधन वैरिजनस्तपः ॥ ३५ ॥

अथेति । अथ तु अथवा हे तपोधन! वैरिजनः शत्रुवर्गः तव तपो न निहन्ति वा । किमिव । मनोभवः काम आशु क्षिप्रं धैर्यमिव । स तु धैर्यं निवर्तयति । आजिपराभवः समरे पराभूतिरुज्ज्वलं यश इव । अविनयो विनयाभावः (श्रुतिमिव) श्रवणमिव (शंसू ? शास्त्र)ग्रहणमिव ॥ ३५ ॥

समुचितां कुलशीलवयोगुणै-
र्गुणवता भवतोपयियंसिताम् ।
न खलु कश्चन कामपि कन्यका-
मसुहृदेत्य हठेन जिहीर्षति ॥ ३६ ॥

समुचिताम् इति । अथवा कुलेनाभिजात्येन शीलेन स्वभावेन वयसा गुणैः सौन्दर्यादिभिश्च समुचितां स्वकुटुम्बिनीभावयोग्यां गुणवता भवत उपयियंसितां उपयमनं कर्तुमभिलषिताम् । विवोढुमिष्यमाणामित्यर्थः । तादृशीं कामपि कन्यकामसुहृच्छत्रुरेत्यागत्य हठेन बलात्कारेण जिहीर्षति हर्तु-मिच्छति न खलु कश्चन .... ॥ ३६ ॥

कथय किं बहुना यदभीप्सितं
तदिह ते तरसा वितरिष्यते ।
त्रिभुवनप्रभुणा बलिनामुना
दुरुपपादमिहास्ति न किञ्चन ॥ ३७ ॥

कथयेति । किं बहुना बहुविकल्पितजल्पितेन किं प्रयोजनम् । कथयाभिधत्स्व । इहास्मत्सकाशाद् यदभीप्सितम् अभिप्राप्तुमभिलषितं तद्वस्तु तरसा क्षिप्रमेव ते वितरिष्यते मया सम्प्रदास्यते । इह लोके त्रिभुवनस्य

---

* पराजय इति पाठान्तरम् । १. विहन्ति इति पाठान्तरम् ।

प्रभुणामुना बलिना दुरुपपादं दुष्करं दुस्साधं वस्तु किञ्चनापि नास्ति । तत्तवाकथनमेवात्र विलम्ब इति भावः ॥ ३७ ॥

मधुरहासमनोज्ञतरां गिरं
गदितवानथ कैतववामनः ।
उचितमेतदुदारवदान्यता-
व्रतधरस्य बले! भवतो वचः ॥ ३८ ॥

मधुरेति । अथानन्तरं कैतववामनो मधुरहासेन मन्दस्मितेन मनोज्ञतराम् अतिमनोहरां गिरं गदितवानुक्तवान् । तव त्रिभुवनप्रभुत्वमिदानीं कण्ठगत-प्राणमास्त इत्यभिप्रायो हासस्य । हे बले! उदार उत्कृष्टे वदान्यताव्रते (............) दानशौण्डस्वरूपं वदान्यैरेव वक्तव्यमित्यर्थः ॥ ३८ ॥

असुरता जनता जनतापिनी-
मसुरतां तव निन्दति केवलम् ।
समतया मतया तु धियेक्षितो
बुधजनैरनवद्यगुणो भवान् ॥ ३९ ॥

असुरेति । असुषु प्राणेषु (रता) तत्परा स्वप्राणतर्पणमात्रप्रयोजना जनता जनसमूहः केवलं तव जनतापिनीं जनान् तापयितुं पीडयितुं शीलमस्या इति तथाभूतामसुरतामसुरत्वं निन्दति धिक्करोति । बुधजनैर्विद्वद्भिः समतया सर्वत्र समत्वेन मतयाभिप्रेतया धिया बुद्ध्या ईक्षितस्तु भवाननवद्यगुणो निर्दोषगुणो भवति । स्वकार्यपरा जना निन्दन्तु नाम । ततस्तव न क्षतिरिति भावः ॥ ३९ ॥

कनकवृष्टिमुचि त्वयि सन्ततं
सुदिनकारिणि सर्वशरीरिणाम् ।
सलिलवृष्टिमुचि क्वचिदम्बुदे
क इव तुष्यति दुर्दिनकारिणि ॥ ४० ॥

कनकेति । सर्वशरीरिणामखिलदेहिनां सुदिनकारिणि शोभनं दिनं कुर्वति, समीहितार्थलाभात्, तादृशे त्वयि कनकमयीं वृष्टिं मुञ्चति सति । अर्थिष्वर्थवर्षणं कुर्वतीत्यर्थः । सन्ततं; सार्वकालिकमिदं तव वर्ष(ण)मित्यर्थः ।

क्वचित् कुत्रचित् प्रदेशे न सर्वत्र । सलिलवृष्टि[illegible] [illegible] मेघे किञ्च दुर्दिनकारिणि । '(मेघ)छन्नेऽह्नि दुर्दिनम्' इत्यमरः । [illegible] को जन(......) ॥

*मम (तरा ? तु ना)स्ति मदा(भ्य ? न्व्य)विधायिषु
प्रणयिता वनिताकनकादिषु ।
गुणगणैरिव यैर्दृढसंयतः
पुनरितः पुरुषो न विमुच्यते ॥ ४१ ॥

परिमिता त्रिभिरेव पदैर्मम
प्रदिश मह्यमये कुहचिन्महीम् ।
अपरभूमिषु भूमिमभीप्सता-
मनलकार्यमनार्यमुशन्ति यत् ॥ ४२ ॥

असुरराडवदद् भुवनप्रभु-
र्न खलु यच्छति [illegible] वटो ।
न कथमिच्छति वारिधिमेखला-
मयि भवानखिलामपि मेदिनीम् ॥ ४३ ॥

×(......)याचितुस्तव बटुत्वमेवात्र प्रकाशितमिति भावः । अयि भवान् वारिधिमेखलामखिलां निश्शेषामपि मेदिनीं कथं नेच्छति । तामपीच्छसि चेदहं प्रयच्छामीति भावः । इत्यसुरराड् बलिरवददुक्तवान् ॥ ४३ ॥

पुनरप्याह —

स हि [illegible] यतोऽर्थिनः
समधिगम्य समस्तसमीहितम् ।
विगणयन्ति न [illegible] ।
दिविषदां पतिम[illegible] ॥ ४४ ॥

इति । यतो यस्मान्महाबलेः [illegible] समीहितमभिलषितं वस्तु समधिगम्य [illegible] अमी वित्तपं तं धनपति-मपि न विगणयन्ति न बहुमन्यन्ते । दिविषदां पतिमिन्द्रमपि अवमन्यन्ते

---

* पद्यमेतदधिकतया 'क' पाठे वर्तते ।

× अत्र किञ्चिद् गलितमिति प्रतिभाति ।

निरनुमि । ता[illegible]र्थिनो भवन्तीति भावः । स हि वाद-
[illegible] ॥ ४४ ॥

यदभिवाञ्छति यः स ततोऽपरै-
र्न खलु तृप्यति कुप्यशतैरपि ।
प्रकृतितोऽपि पृथक्पृथगीप्सितं
जगदिति प्रहसन् बटुरब्रवीत् ॥ ४५ ॥

यदिति । बटुर्भगवान् प्रहसन्नब्रवीद् अभिहितवान् । यो जनो यद्वस्तु अभिवाञ्छति लब्धुमाकाङ्क्षति स जनस्ततः स्वाभिप्रेतादपरैः कुप्यशतैरपि स्वर्णादिद्रव्यशतैरपि(?) न तृप्यति न तृप्तो भवति । खलु प्रसिद्धोऽयमर्थ इत्यर्थः । तत्कुप्यशतमेव किं नेच्छतीति चेदत्राह — जगल्लोकः प्रकृतितः स्वभावेन पृथक्पृथगीप्सितं भिन्नाभिन्नाभिप्रायम् । तदुक्तम् —

'आकीटमाकेटभवैरि तुल्यः
[illegible]त् कृतकृत्यभावः ।
भिन्नस्पृहाणां प्रति चार्थमर्थं
[illegible]मपर्यवस्यम् '॥ इति ।

[illegible] ॥ ४५ ॥

अथ तथास्तु यथात्थ वृथापटु-
र्बटुरसीत्यभिधाय महाबली ।
वसुमतीं बटवे प्रणिदित्सति
प्रणिजगाद जवादसुरावलिः ॥ ४६ ॥

अथेति । अथ [illegible] त्वं मामभिदधासि तथास्तु । त्वं तु वृथा-पटुर्निर्व्यापारगल्भो [illegible] महाबलो बटवे वसुमतीं तत्प्रार्थितमात्रां भुवं प्रणिदित्सति प्रदातुमिच्छति जवात् क्षिप्रम् उपेत्येति शेषः । असुरावलिः दैत्यसमूहः प्रणिजगाद [illegible] ॥ ४६ ॥

[illegible] एष महामते !
कथमिहोज्झसि हन्त वसुन्धराम् ।
[illegible] भवा-
नुपानिधित्सति भस्मचये पठीम् ॥ ४७ ॥

कपटेति । महामते ! एष कपटवामनः कैतवब्रह्मचारी कश्चित् । हन्त कष्टम् । इहास्मिन् कपटवामने वसुन्धरां कथमुज्झसि वृथा त्यजसि । भवानिदानीमुदरनिह्नुतवह्निकणेऽन्तःपिहितावस्थिताङ्गारे भस्मचये पटीं वस्त्रमुपनिधित्सति उपनिधातुमिच्छति । अन्तर्गतमनलमविज्ञाय भस्मोपरि वस्त्रं प्रसारयति । तदेवैतस्मै भूम्यर्पणमित्यर्थः ॥ ४७ ॥

अयि निबोध सुरासुरवर्गयो-
मधुजिदेष हिताहितदर्शनः ।
निजरुचा निखिलं जगदाप्नुवन्
कमलकैरवयोरिव भानुमान् ॥ ४८ ॥

.... अत्रापि निजरुचेत्यादि साधारणम् ॥ ४८ ॥

विवरमल्पमवाप्य यथा द्रुमं
सपदि निष्कुषितं कुरुते क्रिमिः ।
नियतमेष तथा निखिलां मही-
मपजिहीर्षति संविधयानया ॥ ४९ ॥

विवरमिति । क्रिमिरल्पं विवरं सुषिरमवाप्य यथा द्रुमं सपदि निष्कुषितं कुरुतेऽन्तःसारं सर्वं (दृ:द)ष्ट्वा बहिर्निःसारयति तथैष वटुरपि निखिलां महीमपजिहीर्षति पदत्रयमितद्वारेण समस्तां भुवमपहर्तुमिच्छति । नियतं निश्चितोऽयमित्यर्थः । अनयाऽत्र प्रदर्शितया संविधया तुच्छमहीप्रार्थनाव्यापारेण महीमपजिहीर्षतीति सम्बन्धः ॥ ४९ ॥

अथ समेत्य जगाद कविः स्वयं
कथय वत्स ! क एष तव क्रमः ।
सततमेव चिखादिषतो मुखे
विषभृतोऽर्पयसि स्वयमङ्गुलीम् ॥ ५० ॥

अथेति । अथ तदनन्तरं कविः शुक्रमुनिः स्वयमुपेत्य जगाद गदितवान् । हे वत्स ! तवैष क्रमः आरम्भः कः किंरूपः । कथय ब्रूहि । सततमेव सर्वदैव । कारणं विनैव । चिखादिषतः खादितुमिच्छतो विषभृतः सर्पस्य मुखे

स्वयमङ्गुलीमर्पयसि । अयमदत्तानपि मही जिहीर्षति । किं पुनः स्वयमेव दत्तामिति भावः ॥ ५० ॥

सपदि दानजलं प्रतिसंहर
त्यज महासुर ! साहसमीदृशम् ।
प्रियचिकीर्षुरयं खलु वज्रिणो
ननु विवञ्चयिषत्यसुरानिमान् ॥ ५१ ॥

सपदीति । हे महासुर ! सपदि शीघ्रं दानजलं प्रतिसंहर दानायोपात्तं जलं परित्यज । ईदृशं साहसं त्यज विसृज । अयं खलु वज्रिण इन्द्रस्य प्रियचिकीर्षुः प्रियं कर्तुमिच्छुर्नन्विमानसुरान् विवञ्चयिषति न(वि ? ञ्चयि)तुमिच्छति । युष्मद्वञ्चनार्थं आरम्भ इत्यर्थः ॥ ५१ ॥

भवतु विष्णुरधृष्णुतया यदि
स्वयमिमं जनमर्दितुमागतः ।
तदहमेष ददामि मुदा मही-
मिति निरास्यत सोऽपि गिरा गुरुम् ॥ ५२ ॥

भवत्विति । भवतु एवमस्तु । विष्णुरधृष्णुतया असमर्थत्वेन हेतुना स्वयमिमं जनं मामार्दितुं याचितुमागतो यदि तर्हि मुदा सन्तोषेणैव महीमेषोऽहं ददामि अस्मै प्रतिपादयाम्येव । इत्युक्तः सोऽपि महाबलिरपि गुरुं स्वगुरुं शुक्रं निरास्यत निरस्तवान् ॥ ५१ ॥

वदति देहिपदं पदमश्रियो
जगति यः सुतरामगतिः पुमान् ।
स पुनरस्तु सुधीरथवा कुधी-
र्न तदिदं विविनक्ति बहुप्रदः ॥ ५३ ॥

.... पुनः सुधीः सुबुद्धिरस्तु । अथवा कुधीर्दुर्बुद्धिरस्तु । तदिदं दुर्बुद्धिः सुबुद्धिर्वेति बहुप्रदो न विविनक्ति न विचारयति । याचकमात्रे वितरणशीलो हि बहुप्रदः । स त्वेवं न विचारयतीत्यर्थः ॥ ५३ ॥

हरिरयं यदि हन्त चिरेण मे
समुचितं खलु पात्रमुपस्थितम् ।
इति वदन् मतिमान् दितिजाग्रणी-
र्वसुमतीं वटवे सजलामदात् ॥ ५४ ॥

हरिरिति । अयमत्र वर्तमानो हरिर्यदि हन्त महाप्रसादः । चिरेण महता कालेन मे समुचितं पात्रं योग्यतमं प्रतिग्रहपात्रमुपस्थितम् । विष्णुरेव पात्रं संप्रदानकरणं जातश्चेत् प्रियतरञ्च इति भावः । इत्येवंप्रकारं वदन् मतिमान् बुद्धिमान् दितिजाग्रणीरसुरश्रेष्ठो वटवे कैतववामनाय वसुवतीं भूमिं सजलां सोदकामदाद्दत्तवान् ॥ ५४ ॥

पीत्वा तोयं पीवरत्वं व्रजद्भि-
र्विद्युत्पिङ्गप्रांशुभूषांशुजालैः ।
तुङ्गैरङ्गैर्विष्णुरुच्चैर्जजृम्भे
पूर्णव्योमा पुष्कलावर्तकश्रीः ॥ ५५ ॥

पीत्वेति । विष्णुस्तोयं पीत्वा पीवरत्वं व्रजद्भिः प्रथिमानमुपगतैः । विद्युदिव पिङ्गानि पाटलानि प्रांशूनि दीर्घाणि भूषांशुजालानि कटकमकुटाद्यलङ्कारप्रभासमूहा येषां तादृशैस्तुङ्गैरुन्नतैरङ्गैः पूर्णव्योमा पूरितगगनावकाशः पुष्कलावर्तकश्रीः प्रलयमेघस्य श्रीरिव श्रीर्यस्य तथा सन्नुच्चैर्जजृम्भे अत्यन्तं प्रवृद्धोऽभूत् । तोयपानं विद्युत्पिङ्गत्वं क्रमप्रवृद्धत्वं च पुष्कलावर्तकसाधर्म्यम् । विष्णुरिति यथार्थनामाभूदिति साभिप्रायमत्र कर्तृपदम् ॥ ५५ ॥

एकेनैव पदेन चक्रमखिलं विक्रम्य भूमेर्दिवं
भित्त्वोर्ध्वंसारिणो विधूय विमतानुद्दत्त्वरं सत्वरम् ।
दैत्यारेरथ सत्यलोकवसतेर्निर्दिष्टमन्यत्पदं
नेनेक्ति स्म स कुण्डिकोदरसृतैरम्भोभिरम्भोजभूः ॥ ५६ ॥

कुण्डिकोदरात् स्वकमण्डलुगर्भात् स्रुतैर्गलितैरम्भोभिर्नेनेक्ति स्म सिक्त्वा विशोधयामास । प्रक्षालनं कृतवानित्यर्थः । 'णिजिर् विशुद्धौ' इति जौहोत्यादिकस्य धातोर्लिटि रूपम् ॥ ५६ ॥

द्राघीयस्[illegible]लनीलोपलकलितमहास्तम्भडम्भच्छिदोऽस्मा-
द्दापो [illegible]मानाः सरसतरशरच्चन्द्रिकासान्द्रभासः ।
गङ्गासंज्ञाः समज्ञा इव [illegible]वनपतेर्विश्वतोऽप्यश्नुवाना
वाताधूता विरेजुः सितपटघटिता वैजयन्तीर्जयन्त्यः ॥ ५७ ॥

द्राघीयस् इति । द्राघीयसा दीर्घतमेन स्थूलेन पृथुतरेण नीलोपलेन मरतकमणिना कलितस्य निर्मितस्य महास्तम्भस्य डम्भच्छिदोऽहमेव सर्वस्मात् स्थूलदीर्घ इत्यहंभावं छिन्दतस्ततोऽभ्य .... भगवतो विष्णोः समज्ञाः कीर्तय इव विश्वतोऽप्यश्नुवानाः सर्वत्र व्याप्नुवाना आपो जलं वाताधूता स्वर्गानिलप्रकंपिता विरेजुः शुशुभिरे । सितपटेन धवलवाससा घटिता निर्मिता वैजयन्तीर्ध्वजपताका जयन्त्यः अभिभवन्त्यः । भगवत्पादस्य मरतकसादृश्याद् गङ्गाम्भसां च शरच्चन्द्रिकातुल्यत्वात् साधारणधर्मश्चेति द्रष्टव्यम् ॥ ५७ ॥

प्रह्लादस्तं प्राप्य निस्तन्द्रमस्तौ-
दस्तु व्यक्ताव्यक्तधाम्ने नमस्ते ।
बन्धच्छित्तौ बन्धक्लृप्तौ च पुंसा-
मीष्टे कोऽन्यस्त्वां विना माधवेति ॥ ५९ ॥

प्रह्लाद इति । तं तथा जगत्त्रयं हरन्तं भगवन्तं प्रह्लादो निस्तन्द्रं तन्द्रया विना अस्तौद् (क्रु ? स्तु)तवान् । व्यक्ताव्यक्तधाम्ने सर्वजीवात्मतया व्यक्तधाम्ने परमात्मतया स्वऽव्यक्तधाम्ने ते नमः । पुंसां बन्धच्छित्तौ संसारबन्धविमोचने बन्धक्लृप्तौ संसारबन्धकल्पने च त्वां विना भवन्तं वर्जयित्वा हे माधव! कोऽन्य ईष्टे शक्तो भवति । क ईश्वरो भवति । इत्येवमस्तौदिति सम्बन्धः ॥ ५९ ॥

अथ बलिमखिलेशो बन्धनान्मोचयित्वा
पदमदित मनोज्ञं पावनं क्वापि तस्मै ।
तपन इव स पूर्वं तापयन् जीवलोकं
शिशिरयति हि पश्चात् कारुणीवारिपूरैः ॥ ६० ॥

अथेति । अथानन्तरमखिलेशो भुवनपतिर्भगवान् बलिं बन्धनान्मोचयित्वा वीतबन्धं कृत्वा तस्मै बलये क्वापि प्रदेशे मनोज्ञं सर्वसम्पत्समृद्धतया मनोहरं पावनं दुर्जनसंसर्गाभावाद् विशुद्धं पदं स्थानमदित दत्तवान् । तत्रार्थान्तरन्यासमाह— स भगवान् महाविष्णुस्तपन इव सूर्य इव जीवलोकं सर्वशरीरिवर्गं पूर्वं तापयन् प्रतप्तं कुर्वन् पश्चाद् भूयः कारुणी कारुण्यं तद्रूपैर्वारिपूरैः शिशिरयति शान्ततापं करोति । तदुक्तम् —

'सूर्यस्याग्निमया अर्धे रश्मयोऽर्धे पयोमयाः'

इति ॥ ६० ॥

उपसंहरति —

महाबलिमहासुरात्त्रिभुवनं त्रिभिर्विक्रमैः
क्रमेण समुपाहरन्नदितिमोदमापादयन् ।
सरोजभवनादिभिः सततसेवितो दैवतैः
करोतु भवतां मुदं कपटवामनः पावनः ॥ ६१ ॥

महाबलीति । त्रिभिर्विक्रमैः पदविन्यासैः महाबलिमहासुरात्त्रिभुवनं भुवनत्रयं भूम्यन्तरिक्षस्वर्गरूपं क्रमेण प्रथमं भूमिं ततोऽन्तरिक्षं ततः स्वर्गमिति परिपाट्या समुपाहरन् स्वीकुर्वन् अदितेर्मोदमापादयन् इन्द्राय स्वर्गलोकं दत्त्वा तज्जननीं प्रीणयन्नित्यर्थः । सरोजभवनादिभिः ब्रह्मप्रधानै- र्दैवतैर्देवसमूहैः सततसेवितोऽनवरतमासेव्यमानः पावनः स्वभक्तान् दुरितप्रश- मनेन विशुद्धान् कुर्वन् कपटवामनो भगवान् वटुवामनस्वरूपी भवतां मुदं प्रीतिं करोतु । वामनावतारकथानुस्मरणपावनान् वः प्रीणयतु भगवानिन्द्रानुज इति सिद्धं मङ्गलम् ॥ ६१ ॥

इति विष्णुविलासव्याख्यायां

पञ्चमः सर्गः ।

षष्ठः सर्गः ।

जातुचिद् भृगुकुले जनार्दनो
 जायते स्म जमदग्निनन्दनः ।
रेणुकाजठरशुक्तिमौक्तिकं
 रामनामकमुदाहरन्ति यम् ॥ १ ॥

जातुचिदिति । जातुचित् कदाचित् जनार्दनो भगवान् महाविष्णुः भृगूणां कुले जमदग्निनन्दनः सन् जायते स्म सम्बभूव । रेणुका नाम तज्जननी । तस्या जठररूपायां शुक्तौ मौक्तिकं मुक्तामणिरेव । तज्जठरादुत्पन्न इत्यर्थः । तथाभूतं यं जनार्दनं रामनामकं रामसंज्ञकमुदाहरन्ति । महान्त इति शेषः ॥ १ ॥

क्षत्रियैरशुभकर्मकर्मठै-
 रन्धकारनिकरै[1]रिवोद्धतैः ।
वर्जितां वसुमतीं विधास्यतो
 यस्य भास्वत इवोदयोऽर्थवान् ॥ २ ॥

क्षत्रियैरिति । यस्य रामस्य उदय उद्भवः भास्वतः सूर्यस्योदय इवार्थवान् सप्रयोजनो भवति । कीदृशस्य । अशुभकर्मसु अधर्मव्यापारेषु कर्मठैः कर्मशीलैः तत्परैरित्यर्थः । अन्धकारनिकरैरिव तमस्समूहैरिवोद्धतैरुज्जृम्भितैः क्षत्रियैः कार्तवीर्यादिभिर्नृपैर्वर्जितां विरहितां वसुमतीं वसुन्धरां विधास्यतो विधातुं प्रवृत्तस्य । तथाविधानप्रक्रमेणास्योदयस्यार्थवत्त्वं; रवेस्त्वन्धकारवर्जनेन ॥ २ ॥

विक्रमेण भुजशालिनोऽखिलां-
 स्तापसांश्च तपसा जिगाय यः ।
अग्रजैः सह समग्रसम्मदः
 शर्मदो गुरुजनस्य सोऽभवत् ॥ ३ ॥

विक्रमेणेति । यो रामो विक्रमेण दोष्प्रतापेनाखिलान् भुजशालिनो भुजप्रतापशालिनो जिगायाभिभूतवान् । तपसा तापसांश्च जिगाय । स

---

१. 'निवहैः' इति पाठान्तरम् ।

तथाभूतो रामोऽग्रजैः सह समग्रसम्मदः सम्पूर्णप्रमोदो गुरुजनस्य मातापित्रोः शर्मदः सुखप्रदोऽभवदभूत् ॥ ३ ॥

अन्यसक्तहृदयां प्रकुप्यतः
शासनात्स पितुरात्ममातरम् ।
सन्निहत्य मुदितात् पुनस्ततो
मातृजीवितमवीवरद्वरम् ॥ ४ ॥

अन्येति । अन्यस्मिन् पुरुषे सक्तहृदयामनुरागवतीं मातरं प्रकुप्यतः पितुः शासनाद्धेतोः सन्निहत्य पुनर्मुदितात् प्रशान्तकोपतया सन्तुष्टात्ततस्तस्मात् पितुः संकाशान्मातुर्जीवितं जीवनमेव वरमवीवरद् वृतवान् ॥ ४ ॥

तातमातृहितकाम्यया दिवः
कामधेनुमपहृत्य कामपि ।
आश्रमं निजमपश्रमार्जित-
स्फीतसम्पदमथ व्यधत्त सः ॥ ५ ॥

तातेति । अथ मातृजीवनानन्तरं (तातमात्रोः) हितकाम्यया इष्टवाञ्छया दिवः । स्वर्गात् कामधेनुं सुरभितनयामपहृत्याहृत्य । कामपीत्यनिर्देश्य-प्रभावामित्यर्थः । निजमाश्रममपश्रममक्लेशं यथा तथार्जिताः संपादिताः स्फीताः संपदः सकलसमृद्धयो यस्मिंस्तथा स व्यधत्त विहितवान् ॥ ५ ॥

स प्रणम्य पितरौ ततो व्रज-
न्नाश्रमं भृगुमुनेरुपासदत् ।
आज्ञया पुनरमुष्य हृष्यतः
शङ्करार्चनविधावुदास्थितः ॥ ६ ॥

स इति । स रामः पितरौ रेणुकाजमदग्नी प्रणम्य ततस्तदाश्रमाद् व्रजन् गच्छन् भृगुमुनेः स्वपितामहस्याश्रममुपासदद् उपगतवान् । पुनस्तदनन्तरम-मुष्य भृगुमुनेराज्ञया । कीदृशस्य । हृष्यतः सन्तुष्टस्य पौत्र इति प्रीतिमतोऽमुष्य शासनात् शङ्करार्चनविधौ परमेश्वरस्य परिचर्याविधाने विषये उदस्थित उद्युक्त-वान् ॥ ६ ॥

दीर्घपातिसुरदीर्घिकापयः-
शीतपूतमचलेशितुस्तटम् ।

सम्प्रपद्य निरवद्यधीस्तप-
स्तप्यते स्म जमदग्निनन्दनः ॥ ७ ॥

दीर्घेति । अचलेशितुर्हिमवतो दीर्घपातिन्या [illegible] सुरदीर्घिकाया गङ्गायाः पयसा शीतं शीतलं पूतं पवित्रं च तटं सानुप्रदेशं संप्रपद्य निरवद्यधीर्निर्दोषमना जमदग्निनन्दनस्तपस्तप्यते स्म ॥ ७ ॥

आशयोपकलितस्य शूलिनो
मौलिचन्द्रगलितैः सुधारसैः ।
तर्पितोदरतयेव न व्य-
मन्वभूदनशनेन भार्गवः ॥ ८ ॥

आशयेति । भार्गवोऽनशनेनाशनाभवाद् व्यथां क्षुद्बाधादुःखं नान्वभूत् नानुभूतवान् । अत्रोत्प्रेक्षते — आशये हृदये उपकलितस्य समाधिभावनया सन्निधापितस्य शूलिनः श्रीपरमेश्वरस्य मौलिचन्द्रात् शिरश्चन्द्रकलायाः सकाशाद् गलितैर्निस्सृतैः सुधारसैरमृतद्रवैस्तर्पितोदरतया इव सम्पूर्णोदरत्वादिवेति ॥ ८ ॥

वातवर्षतुहिनातपानपि
स्थैर्यवारिधिरसावसासहीत् ।
श्वापदा अपि यदाश्रयाज्जहु-
र्द्वन्द्वबाधमथवा स किं पुनः ॥ ९ ॥

वातेति । स भार्गवः स्थैर्यवारिधिः स्थिरतासमुद्रः स्थिरतरधीरित्यर्थः । वातं वर्षं तुहिनं (आतपं च) असासहीत् पुनः पुनः भृशं सोढवान् । वर्षातपादिद्वन्द्वस(हि)तोऽभूदित्यर्थः । यदाश्रयाद्यस्य भार्गवस्याश्रयादवलम्बनाद्धेतोः श्वापदा अपि गजसिंहवराहशार्दूलादिवनसत्त्वा अपि द्वन्द्वबाधं शाश्वतकलहं जहुस्त्यक्तवन्तः । किं पुनर्विशेषज्ञः स भार्गवः । अथवेत्यनेनेदं पक्षान्तरमुपन्यस्तम् ॥ ९ ॥

अग्निपञ्चकमुदश्वदुष्णकै-
रत्यशेरत शरीरनिस्सृताः ।

तस्य तावदलमूष्मलास्तप-
स्तेजसां विततयस्तपोनिधेः ॥ १० ॥

अग्नीति । तावत्तदवसरे तस्य भार्गवस्य तपोनिधेरलमूष्मला अत्यर्थमूष्मवत्यस्तपस्तेजसां विततयो विस्ताराः शरीरान्निस्सृता निर्गतास्सत्यः उच्चकैरुदञ्चदुज्ज्वलदप्याग्निपञ्चकं पञ्चाग्नीनत्यशेरतातिशयितवत्यः ॥ १० ॥

तादृशेन तापसा तपत्विषा
तापितेषु भुवनेषु तापसैः ।
निर्जरैश्च वरदानमर्थितो
धूर्जटिस्तदिदमभ्युपागमत् ॥ ११ ॥

तादृशेनेति । तथाप्रवृद्धेन तपस्य ग्रीष्मकालस्येव त्विट् यस्य तथाभूतेन तस्य तपसा भुवनेषु लोकत्रये तापितेषु सन्तापं प्रापितेषु सत्सु तापसैर्नारदपर्वतादिभिः ऋषिभिः निर्जरैर्देवैश्च वरदानमस्मै वरवितरणमर्थितो याचितो धूर्जटिः शम्भुस्तदिदं वरदानम् अभ्युपागमत् तथेत्यङ्गीकृतवान् । 'अङ्गीकारोऽभ्युपगमः प्रतिश्रवसमाश्रयः' इत्यमरः ॥ ११ ॥

उद्यतः स जमदग्निन(न्द ? न्दि)नो
भावबन्धदृढतां परीक्षितुम् ।
बिभ्रदद्भुतकिरातविग्रहं
क्षिप्रमद्रिशिखरादवातरत् ॥ १२ ॥

उद्यत इति । स भगवान् धूर्जटिर्जमदग्नि(नन्दि)नो जामदग्न्यस्य भावबन्धदृढतां स्थैर्यं परीक्षितुं ज्ञातुमुद्यत उद्युक्तः सन् अद्भुतमाश्चर्यकरं किरातविग्रहं बिभ्रद्धारयन्नद्रिशिखरात् कैलासशृङ्गात् क्षिप्रमिवावातरदवतीर्णवान् ॥ १२ ॥

तूणसम्भृतशरः शरासवान्
स्थूलदीर्घभुजदण्डदारुणः ।
केकिपिञ्छपरिणद्धकुन्तलः
शिप्रसुप्रभमुखो विबुर्बभौ ॥ १३ ॥

तूणेति । तूणे सम्भृतशरः सन्निहितसायकः शरासवान् धनुष्मान् स्थूलाभ्यां पृथुभ्यां दीर्घाभ्यां च भुजदण्डाभ्यां दारुणो भयङ्करः केकिपिञ्छ-मयूरकलापैः परिणद्धकुन्तलः बद्धशिरोरुहः शिप्रैश्चिबुकरोमभिः सुप्रभमुखः सुष्ठुशोभिवदनो विभुः परमेश्वरो बभौ शुशुभे ॥ १३ ॥

मांसभारनमितांसमण्डलः
सत्वरभ्रमणलोलकुण्डलः ।
क्वापि भार्गवमलक्षयन्निव
स्वैरमावसदसौ तरोरधः ॥ १४ ॥

मांसेति । मांसभारेण शवभारेण नमितः किञ्चिन्नतिं गतः अंसमण्डलो स्कन्धभागो यस्य सत्वरेण भ्रमणेन द्रुतसञ्चारेण लोलकुण्डलश्चलिताभरणः असौ भगवान् भार्गवमलक्षयन्निवापश्यन्निव क्वापि तरोरधो वृक्षमूले स्वैरं स्वच्छन्द-मावसदुपविष्टवान् ॥ १४ ॥

अंसतः समवतारितं पलं
भिण्डिपालशिखरेण खण्डयन् ।
कीकसत्वचमतो विमोचय-
न्नल्पकालमिव स व्यजीगमत् ॥ १५ ॥

अंसत इति । स शङ्करशम्बरः अंसतः स्कन्धादवतारितं पलं मांसं भिण्डिपालो नाराचः, खड्गाकारः शरस्तस्य शिखरेण अग्रेण खण्डयन् विदारयन्, (कीकसम्) अस्थि त्वक् चर्म, कीकसत्वचमिति समाहारद्वन्द्वः । 'द्वन्द्वाच्चुदषहान्तात् समाहारे' इति षच् समासान्तः । तयोर्विभागः पृथक्-करणं तत्र तत्पर उद्युक्तः सन्निहिततरुमूले स्वल्पकालं व्यजीगमद् विगमया-मास ॥ १५ ॥

अन्तकारिशबरं तमन्तिके
वीक्ष्य किञ्चिदिव वीरचर्यया ।
लम्भितो विकृतिमेवमूचिवा-
नञ्जसा स खलु रेणुकासुतः ॥ १६ ॥

अन्तकेति । स खलु तपस्यन् रेणुकासुतः तमन्तकारिशबरमन्तिके समीपे वीक्ष्य वीरचर्यया वीरप्रतापेन किञ्चिदिवाल्पं विकृतिं कोपविकारं लम्भितः

प्राषितः । अत्रानुकूलो रेणुकाशब्दः । क्षत्रिया हि सा तत्पुत्रत्वात् क्षात्रधर्मस्यासहनत्वस्य किञ्चिदाविर्भाव इति द्रष्टव्यम् । अञ्जसा सहसा अविचार्येत्यर्थः । एवं वक्ष्यमाणप्रकारमूचिवानुक्तवान् ॥ १६ ॥

कस्क एवमशिवेन कर्मणा
मर्मणामसि मम व्यथाकरः ।
दूरतोऽपसर दुर्मद ! त्वया
नेक्षितः किमु समाधिमानहम् ॥ १७ ॥

कस्क इति । कस्कः त्वम् । 'कस्कादिषु च' इति सत्वम् । एवमशिवेन मांसकर्तनरूपेणाशुभेन व्यापारेण मम मर्मणां व्यथाकरोऽसि । जन्तुकर्तनं मम मर्मकर्तनमिव मां दुःखयतीत्यर्थः । हे दुर्मद ! अविनीत, दूरतोऽपसर मदन्तिकं परिहृत्य दूरं गच्छ । समाधिमान् तपश्चरन्नहं त्वया किमु नेक्षितः कस्मान्नावलोकितः ॥ १७ ॥

नीचतां तव हि सूचयत्यदः
केवलं न मृगमांसकर्तनम् ।
किं त्वसावपि विशेषतस्तरां
साध्वसाधुजनबोधवैधुरी ॥ १८ ॥

नीचतामिति । तव नीचतां नीचजातिसम्भवमद एतन्मांसकर्तनं केवलमेव न सूचयति । कथं तर्हि । किन्त्वसौ अपि साध्वसाधुजनबोधे सज्जनासज्जनविशेषज्ञाने वैधुरी विधुरत्वमसमर्थत्वं विशेषतस्तरामधिकतरं तव नीचतां सूचयति । अतः शकजातीयस्त्वं दूरगमनयोग्य इत्यभिप्रायः ॥ १७ ॥

यादृशः पशुवदत्ति हत्ति च
प्रायशः स्वपिति च व्यवैति च ।
तादृशोऽयमथवा कथं भवा-
नीदृशां स्थितिमवैतु मादृशाम् ॥ १९ ॥

यादृश इति । अथवा यादृशो मूढजनः पशुरिवात्ति भक्षयति हत्ति पुरीषमुत्सृजति च । प्रायशः स्वपिति निद्राति च व्यवैति च निधुवनं करोति च। केवलमाहारनिद्रामैथुनमात्रपरा इत्यर्थः । हत्तीति 'हद पुरीषोत्सर्गे' इति यद्यपि भौवादिक आत्मनेपदी तथापि 'बहुलमेतन्निदर्शनम्' इति सर्वत्र्यभिचारपरतया

विकरणव्यभिचारेणादादिकत्वं परस्मैपदित्वं चास्य धातोरुपपद्यत इति बोध्यम् । तादृशो भवानबोधनिधिरीदृशां महतां मादृशां स्थितिं मर्यादां समाचारं शुद्धिमित्यर्थः । कथमवैतु केन प्रकारेण जानातु ॥ १९ ॥

सप्रहासमवदन्महेश्वरो
युक्तमालपसि रेणुकासुत ।
त्वादृशां स्थितिरतीव दुर्गमा
सर्वदेहिसमयातिवर्तिनी ॥ २० ॥

सप्रहासमिति । महेश्वरः सप्रहासं प्रहासं कुर्वन्नवददभिहितवान् । हे रेणुकासुत क्षत्रियपुत्र, युक्तमालपसि । मादृशां स्थितिं कथं भवानवैत्विति यदुक्तं त्वदुपपन्नमेव । त्वादृशां स्थितिः समाचारोऽतिवातितरां दुर्गमा दुर्विज्ञेया । सर्वेषां देहिनां शरीरिणां यः समयो मर्यादा इदं कार्यमिदमकार्यमिति यो नियमस्तमतिवर्तितुं अतिक्रमितुं शीलमस्या इति तथाभूता खलु त्वादृशां स्थितिः । तत् कथं ज्ञातुं शक्यत इति भावः ॥ २० ॥

नीचता मम हि मांसकर्तना-
दन्वमायि भवता यथाधुना ।
उच्चतातिमहती तथा मया-
प्यन्वमायि तव मातृकर्तनात् ॥ २१ ॥

नीचतेति । अधुनेदानीं मम हि मांसकर्तनात् मांसखण्डनाद्धेतो-र्यथा येन प्रकारेण (... ... ...) तव मातृकर्तनात् मातुः कण्ठच्छेदाद्धेतोरतिमहती तव उच्चता उत्कृष्टजातित्वं मयाप्यन्वमायि अनुमिता । उत्कृष्टजातेरेव मातृवधौचित्यमिति परिहासोपन्यासः ॥ २१ ॥

सम्पदन्यजनदुर्लभा परं
शैलजेयमनुभूयते मया ।
प्राणिसंहरणनिर्घृणो जनै-
रुग्र इत्यहमसावुदाह्रिये ॥ २२ ॥

सम्पद् इति । मद्गतं पारमार्थ्यं श्रावयित्वाह । [illegible] जनैर्दुर्लभा लब्धुमशक्या इयं शैलजा शैलजाता सम्पत् [illegible] परमनुभूयते केवलं मयैव नान्येन । असावहं प्राणिसंहरणे जीवजन्तुवधे निर्घृणो

जटायुषः इति। गिरेः पर्वतस्य कुहरे गुहायां स्थितः जटायुषः अग्रजः सम्पातिः। स्फुटा व्यक्ता अक्षरा यस्मिन् कर्मणि तत् स्फुटाक्षरं तव चरितानि गायतां वनौकसां वानराणां मुखात् श्रुतं आकर्णितं सहजस्य जटायुषः वधं फणाभृतां सर्पाणां विषमिवेत्युपमा। मन्यते स्म मेने। रुट् सेति रुट्। तद्वदसह्यमित्यर्थः॥ ९॥

तदिति। अनु अनन्तरं तेन सम्पातिना अर्थितः याचितः जाम्बवान् रहसि तं सम्पातिं भविष्यतीः भाविनीः अपि। सेतुबन्धनरावणवधादिरूपा इत्यर्थः। भवत्कथाः जगाद। सः खगः सम्पातिः तत्क्षणात् सपदि पक्षवान् समजनि। *रावणेन सीतायां हृतायां तन्निरोधात् तच्छिन्नपक्षः गन्तुमशक्तः सम्पातिः त्वत्कथाश्रवणात् तत्क्षणमेव सञ्जातपक्षो बभूवेत्यर्थः। सः त्वं मे रुजं जहि जय॥ १०॥

२८

व्योम्नीति। अञ्जनं मषीविशेषः आक्षिणि यस्य स तथा। निधिदर्शनोपयोगिमषीसमञ्जितनेत्रः पुमानित्यर्थः। धाम्नि गृहे स्थितं निधानं निधिमिवेत्युपमा॥ १॥

लङ्केति। पङ्केन कर्दमेन अगाधे अतलस्पर्शे अद्रिगर्ते पर्वतावटे। 'गर्तावटौ भुवः श्वभ्रे' इत्यमरः। हस्तिनी करिणीवेत्युपमा। तुङ्गातङ्का उन्नतशोका राक्षसीभिः रूक्षभाषया परुषभाषणेनैव टङ्केन आयुधविशेषेण आविद्धा विदारिता। 'टङ्कः पाषाणभेदने' इत्यमरः। जानकी जीवति इति इत्थं ऊचे इति पूर्वेण सम्बन्धः॥ २॥

सम्पाद्येति। सम्पात्याख्ये गृध्रराजे इत्थं स्वार्थं स्वकार्यं सम्पाद्य प्रयाते सति अङ्गदाद्याः कपीन्द्राः जृम्भायाः जृम्भणस्य उत्थानात् उद्गमात् स्तम्भिता निरुद्धा उद्यन्ती मुमूर्षा मर्तुमिच्छा यैस्ते तथोक्ताः सन्तः सम्भाषन्ते स्म॥ ३॥

भो इति। भोः कीशाः वानराः! जानक्याः तत्त्वं इत्थं एवं यदि तर्हि, स राजा सुग्रीवः। सागसानित्यत्र 'सोऽचि लोपे चेत् पादपूरणम्' इत्यनेन स इति छेदः। आगसान् सापराधानपीत्यर्थः। अर्श आदित्वादच्

* रावणेनेत्यादि तच्छिन्नपक्ष इत्यन्तं सम्पातिविशेषणं व्याख्यातुः रामायणकथाविषयकभ्रममूलकमिति प्रतिभाति।

प्रत्ययः । नः प्रतीत्यर्थः । शक्यं योग्यं आराधनं यस्य स तथा सन् स्यात् । कालातिक्रमेण वयं सागसोऽपि सीतातत्त्वज्ञानात् सुग्रीवसम्भावनाविषया भवेमेत्यर्थः । वयं इह अस्मिन् देशे असून् न जह्याम न त्यजेम । स्वदेहैः आत्मशरीरैः राघवस्य रामस्य मुख्या प्रधाना पूजा कारिता कृता । ण्यर्थस्त्वविवक्षितः । अथवा, न इति पदमत्रापि सम्बध्यते । एतत् प्रायोपवेशनं राघवस्य मुख्यपूजैवेत्यर्थः ॥ ४ ॥

सीतेति । सीताया वृत्तिर्वर्त्तनं गृध्रराजेन सम्पातिना गीता प्रोक्तेत्यर्थः । इति इत्थं एतावत्या नः गिरा वाचा को नु तुष्येत् । कश्चिदपि न तुष्येदित्यर्थः ।

'गतानुगतिको लोको न लोकः पारमार्थिकः ।'

इति न्यायेन सीताद्रष्टृसम्पातिवाक्यकथनेन विश्वासाभावादिति भावः । धूता अविद्या माया यैस्ते तथा । योगिन इत्यर्थः । अद्वैतं ब्रह्म यद्यथा तथा वयं याथातथ्येन पारमार्थ्येन एतां सीतां दृष्टां अवलोकितामेव, सम्पातिनेत्यर्थः । प्रतीमः विश्वसिमः ॥ ५ ॥

स्वीकृत्येति । इह प्रायं प्रायोपवेशमित्यर्थः । स्वीकृत्य आयुःस्पृहा भवति चेत् तदा मोहस्य द्राघिमा दैर्घ्यम् । 'प्रियस्थिर' इत्यादिना दीर्घशब्दस्य द्राघ्यादेशः । अहो इत्यद्भुते । इति धीः बुद्धिः उज्झ्यतां त्यज्यताम् । अस्माभिरित्यर्थः । हि यस्मात् राघवार्थे रामकार्ये आहवे युद्धे । आहत्य राक्षसानित्यर्थः । देहत्यागः आगः अपराधं मार्ष्टि हन्ति । कीर्तिं दुग्धे च वर्धयतीत्यर्थः ॥ ६ ॥

निश्चित्येति । नित्यं सौहार्दात् स्नेहात् हृद्याः मनोहराः । एते अङ्गदादयः एवं निश्चित्य पुच्छानां लाङ्गूलानां उच्चाटैः उद्गमैः छिन्नाः वन्यद्रुमौघाः यैस्ते तथा सन्तः कच्छं तीरदेशम् ॥ ७ ॥

अम्भोराशिमिति । डम्भः अन्तर्दर्पः, अहङ्कारः बहिर्दर्प इति भेदः ॥ ८ ॥

जातम् । निर्जरे आदित्ये इत्यर्थः । ग्रासासक्त्या कवलभ्रान्त्येत्यर्थः । वज्रकृत्तं कुलिशेन छिन्नं त्वा त्वां स धाता ब्रह्मा अजीवयत् । ते तव असामर्थ्यं न युज्यते ॥ ९ ॥

जीवन्निति । जीवन्नेव हनूमानित्यर्थः । प्रकर्षेण अस्मृतं विस्मृतं स्वीयवृत्तं श्रावं श्रावं श्रुत्वा श्रुत्वा । जाम्बवतो मुखादित्यर्थः । 'क्रियाभ्यावृत्तिगणने क्त्वाणमुलौ' इति णमुल् । सुप्तवत् सुप्त इव सम्प्रबुध्य पुनः सम्यक् ज्ञात्वेत्यर्थः । तावत् तदा तावके त्वदीये कार्ये उद्यतः अभूत् । त्वं यावज्जीवं जीवपर्यन्तं मां पाहि ॥ १० ॥

२९

आपृच्छ्येति । तव भाग्यसम्पदा भाग्यसमृद्ध्या नुन्नः प्रेरितः मारुतिः मिहिरेण सूर्येण सादृश्यं ऊहे बभार । 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' इति तृतीया ॥ १ ॥

स्थित्वेति । धिया बुद्ध्या यत्तः यत्नं कुर्वन् । 'यती प्रयत्ने' इति धातोः कर्तरि निष्ठा । दृढनिश्चय इत्यर्थः । उदप्लवत् ॥ २ ॥

आश्लिष्येति । अप्सु जले बिम्बितः प्रतिबिम्बितः अयं हनूमान् पथि मार्गे आश्लिष्य यान्तीः गच्छन्तीः शिशुमारिकाः जलजन्तुविशेषस्त्रियः ।

'जलजन्तवः ।
तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः ॥'

इत्यमरः । विश्लिष्य यान् गच्छन् सोत्कालिकाभिः सोत्कण्ठाभिः ताभिरित्यर्थः । ईक्षितो दृष्टः तासां कामुकैः कान्तैः आकृष्टः आक्षिप्तः दविष्ठः अतिदूरास्थितः बालधिः लाङ्गूलं यस्य स तथा सन् । 'दवीयश्च दविष्ठश्च सुदूरे' इत्यमरः । तान् तत्कामुकान् दुःखाकरोत् अदुःखयत् ॥ ३ ॥

मध्य इति । मध्येपथं मध्येमार्गं विघ्न इति विचार्य गिरिं पर्वतं क्षिपन् अधिक्षिपन् अथ हैमवत्याः पार्वत्याः सहोदरम् । मैनाकमित्यर्थः । बुध्वा ज्ञात्वा मृद्व्या गिरा वाचा यथागतं यथास्थानं गमयन् प्रापयन् । हनूमानित्यर्थः । पुरः कामपि राक्षसीं निध्यातवान् दृष्टवान् ।

'निर्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणम् ।'

इत्यमरः ॥ ४ ॥

व्यात्तेति । वर्धितविग्रहः प्रवृद्धात्मा मारुतिः कृशः सूक्ष्मात्मेत्यर्थः । व्यात्ताननं विदारितास्यं मुखं यात्वा श्रोत्रपथेन निर्गतः सुरसां नत्वा सुराशये देवहृदये विस्मयं विस्तारयन् प्रथयन् आशु अगात् जगाम ॥ ५ ॥

वेगेति । वेगानिलेन वेगवायुना आकृष्टा बलाहकाः मेघाः अनुगा यस्य स तथा । यया छायां समाकृष्य (सलिलं) जलं प्रवेशितः शाखामृगेन्द्रो हनूमान् स्वैः नखैः तस्याः छायाग्राहिण्याः कायं शरीरं विदार्य खं आनशे प्रापेत्यर्थः ॥ ६ ॥

मार्ताण्डेति । अस्तस्य अस्ताचलस्य मस्तके शिखरे नभस्वतः सुतो हनूमान् मूर्तां मूर्तिमतीं श्रियं लक्ष्मीं पुरात् उदवासयत् निस्सारयामास ॥ ७ ॥

श्रीरिति । श्रीरहं विरिञ्चस्य ब्रह्मणः शासनात् अस्याः रक्षसां पुरः लङ्कायाः आरक्षिका रक्षाकर्त्री इह आस्मि । त्वया अहं अजायिषि जिता अभवं यत् ततः मया दूरस्थया सत्या भविष्यते । 'भावकर्मणोः' इत्यात्मनेपदम् ॥ ८ ॥

न्यस्तेति । बलं कायबलं, वीर्यं मनोबलमिति भेदः । यातु गच्छतु । मृद्नातु मर्दयतु ॥ ९ ॥

लङ्काश्रियमिति । एवं इत्थं ईरिणीं वदन्तीं यापयन् गमयन् पृथुवेगः बहुवेगः विक्रमः पराक्रमो यस्य स तथा पिङ्गाक्षमुख्यः वानरश्रेष्ठः बिडालसन्निभं मार्जारसदृशं व्यधत्त अकृत । 'ओतुर्बिडालो मार्जारः' इत्यमरः ॥ १० ॥

भीमेति । स हनूमान् भीमानि अर्गलैः कवाटविष्कम्भैः । 'तद्विष्कम्भोऽर्गलं नना' इत्यमरः । आबद्धानि कवाटानि येषु तादृशानि गोपुराणि यस्यां सा तथा तां श्रिया माद्यन्तः मदं गच्छन्तः उद्दामा उद्धता निशाचरोत्करा राक्षससङ्घा यस्यां सा तथा तां सोमस्य चन्द्रस्य उद्गमेन उदयेन ध्वस्तः तमिस्रसञ्चयो ध्वान्तसमूहो यस्यां तां नगरीं लङ्कां अमार्गतः अमार्गेण प्रविष्टवान् ॥ ११ ॥

दूतमिति । केऽपि त्वद्दयिताविचायकं सीतामन्वेषमाणं स्वातन्त्र्यभाजं स्वतन्त्रमित्यर्थः । तव दूतं हनुमन्तं न रुरुधुः ॥ १२ ॥

३०

सौधेति । सौधे राजसदने । 'सौधोऽस्त्री राजसदनम्' इत्यमरः । हर्म्ये धनिनां वासे । 'हर्म्यादिर्धनिनां वासः' इत्यमरः । सञ्जवने उद्याने अवरोधे अन्तःपुरे चापि सीतादेवीं विचिन्वन् अन्वेषयन् एषोऽसौ हनूमान् क्लान्तः क्षीणः कङ्केलीनां कल्पतरूणां विपिने मध्येशिंशपं शिंशपामध्ये क्षणमात्रं आस्त उपाविशत् ॥ १ ॥

तस्या इति । मारुतिः तस्याः शिंशपायाः मूले धूसरा धूम्रा वेणिः प्रवेणी यस्याः सा तथा ताम् । 'वेणिः प्रवेणी शीर्षण्यशिरस्यौ' इत्यमरः । मूकां अवाचं हेमशलाकामिवेत्युपमा । हेमवत् प्रकाशमानां शलाकावदतिकृशामित्यर्थः । एकां नारीं दृष्ट्वा हृदि एवं दध्यौ चिन्तयामास ॥ २ ॥

दिष्ट्येति । सा सीता एषा दृश्यमानान् नु । अपरया एवं न भवितव्यम् । एवंभावेऽपि एषा एवं कथं वा भाति । अहो पातिव्रत्यस्य अतिवशात् अतिसामर्थ्यात इत्यव(से ? धे)यं अव(गच्छेयम् ? गन्तव्यम्) ॥३॥

सम्यगिति । सम्यक् साधु जातं उत्पन्नम् एषा सीता गङ्गा भागीरथीव स्वद्युतिपूरेण आत्मशोभासमूहेन विदूरे समीपे मे गात्रविशुद्धिं तनुते । मे जन्मफलं जननफलं परिणम्रं परिणतं जातं मन्ये तर्कयामि । साध्वियं रघूणां पत्युः रामस्य सा प्रसिद्धा (पत्नी) दयिता एव ॥ ४ ॥

निर्णीयेति । स हनूमान् एवं उक्तप्रकारेण निर्मितः कृतः नामो नमनं येन तथा सन् । 'णमु प्रह्वत्वे' इति धातोः (घञि) नाम इति रूपम् । नैर्ऋतनारीः राक्षसीः अपि दृष्ट्वा ··· ··· ति शेषः । दर्शयवानीत्यर्थः । इति सघोषं सशब्दं यथा तथा । भ्रान्तं सम्भ्रान्तचित्तमित्यर्थः । दशास्यं रावणं च दृष्टवान् ॥ ५ ॥

अग्रेति । सः रावणः अग्रे पुरः आस्तीर्णां शय्यामधिरुह्य किङ्करस्य भृत्यस्य केशे कचे पदयोः पांसून् रजांसि क्षिप्त्वा । नतिविधौ अनुग्रहार्थं

शिरसि पादविन्याससमये इत्यर्थः । दृग्भिः नेत्रैः संज्ञाभिरर्थसूचनाभिः दूरचराः दूरस्थाः असन्तः परिवाराः, सीतारक्षकादिस्वजना इत्यर्थः, यस्य स तथा बहु दुर्वचं दुष्टवाक्यं ऊचे ॥ ६ ॥

मुग्ध इति । उदन्यन् तृष्यन् 'अशनायोदन्य' इत्यादिनिपातनेन साधोरुदन्यशब्दात् लटः शतृप्रत्ययः। अहं पीयूषे अमृते स्फीतः प्रवृद्धः अरोचको यस्मिन् कर्मणि तत्तथा आसे अस्मि । तत् तस्मात् साध्वी त्वं धर्मपरा यदि तदा अवशाय स्वतन्त्राय मह्यमित्यर्थः । मोदेन बिम्बीं बिम्बमिवाधरमेव माध्वीं मधु इति व्यस्तरूपकम् । अधरबिम्बीत्यत्र 'षिद्गौरादिभ्यश्च' इति ङीष् । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति समासः । दद्याः दिशेः ॥ ७ ॥

प्रत्यग्रेति । त्वं प्रत्यग्रेण अभिनवेन प्रेमभरेण प्रणतं भृत्यं मां अत्युग्रे तापभरे भर्जसि किम् । भर्जनविषयं मा कृथा इत्यर्थः । क्षोण्याः भूम्याः सून्वै पुत्र्यै । 'ऊङुतः' इत्यूङ् । ते नमः ॥ ८ ॥

नम्रेति । त्वं अम्बां भूमिं पृष्ट्वा तस्याः अम्बायाः मतं अङ्गीकुरु ऊरीकुरु । दुर्विनयेन यदान्ध्यं तेन उद्यन्ति अकृत्यानि यस्य स तथा तं मर्त्यं मानुषम् । राममित्यर्थः । त्यक्त्वा दशवक्त्रं रावणं वृणीथाः । भर्तारं प्रार्थयेः इत्यर्थः ॥ ९ ॥

इत्यादीति । सः रावणः तु इत्यादीनां जल्पविधीनां वाग्विधीनां अवसाने सीतां उग्रं निर्भर्त्स्य भयङ्करवचनपूर्वकं विनिन्द्य भुक्तं अनुभूतं सुखं येन स तथा । अभुक्तसुखं आत्मानं भुक्तसुखं मन्यन्त इति भुक्तसुखम्मन्यानि तादृशानि मुखानि यस्य स तथा सन् विविधैः स्वव्यापारैः सीतां अस्वाधीनां दृष्ट्वा पुनरपि येन केनापि युष्माभिः सीता मदधीना कार्येति राक्षसीः उक्त्वा तासां अनुकूलं वचनं आकर्ण्य अनुकूला भविष्यतीति विचार्य रावणः तुष्टः सन्निति भावः । यातः गतः च । सः हनूमान् ज्ञेयं ज्ञातुं शक्यं एतत् अजानात् ज्ञातवान् ॥ १० ॥

उत्कण्ठेति । उत्कण्ठया उत्कलिकया आर्ता दीना बहु दुःखं सोढुं अशक्ता निष्कम्पा निश्चला सा सीता आयुः निष्फलं निरचैषीत् । निश्चितवती । त्वद्दूतः स हनूमान् तां सीतां नन्तुं नमस्कर्तुं अगात्

वृक्षात् । 'शैलवृक्षौ नगावगौ' इत्यमरः । अवतरीतुं इयेष अहं त्वा त्वां नन्तुं मोहात् संसारात् अवतरीतुं तथा अस्मि । इच्छन्नस्मीत्यर्थः ॥ ११ ॥

३१

निरवर्णयदिति । सः हनूमान् वरवर्णिन्याः सीतायाः मुखं निरवर्णयत् अपश्यत् । स्वरैः अज्भिः वर्णैः हल्भिः शुद्धाः निर्दोषाः पदषण्डाः पदसमूहाः यस्यां सा तथा । तथा व्याकरणजनितसंस्कारयेत्यर्थः । ईदृशा गिरा तव रणचण्डतां युद्धसामर्थ्यं च समवर्णयत् सम्यक् वर्णितवान् ॥ १ ॥

अवन इति । अवनेः भूमेः अवने रक्षणे नितान्तं निरतस्य इनान्वये सूर्यवंशे । जातस्येत्यर्थः । दशरथस्य यः नन्दनः पुत्रः भवतीति शेषः । अयि रामदयिते ! अहं ते दयितस्य भर्तुः तस्य रामस्य किङ्करः अस्मि मयि दयादृशं दयादृष्टिं देहि वितर ॥ २ ॥

इतीति । इति नादवर्णेषु स्वराक्षरेषु कृतिना कुशलेन अमुना हनूमता । ईदृशी सीतेत्यर्थः । पतिनामपूर्वं अति नाम अत्यन्तं मानिता । इह अपरः अन्यः कः दशास्यस्य रावणस्य कुहनोद्यमः मायोत्साहः । मया नगकोटरे विहगः अपि पक्षी अपि न वीक्ष्यते न दृश्यते ॥ ३ ॥

इतीति । भृशं अत्यर्थं मन्युना कोपेन सन्ना क्षीणा धीः बुद्धिः यस्याः सा तथा । इयं सीता इति विचार्येत्यर्थः । तावत् तदा ईषदुदितां किञ्चिदुत्पन्नां मुदं प्रशमं नाशं निनाय प्रापयत् ॥ अवतीर्णम् । वृक्षादित्यर्थः । एनं अञ्जनातनयं हनूमन्तं अपि दशास्यं रावणं व्यशङ्कत अशङ्कयत् ॥ ४ ॥

नन्विति । जवेन वेगेन लङ्घितोऽब्धिः समुद्रो येन स तथा । अहं हनूमान् कपिः वानरः । अस्मीति शेषः । त्वं मा विषीद । विषादं मा कृथा इत्यर्थः । न च 'माङि लुङ्' इति लुङेव स्यादिति वाच्यम् । प्रतिषेधार्थस्य 'मा' इत्यव्ययस्यामाङ्त्वात् । तद्गिरं तस्य रामस्य गिरं वाचं अवलम्ब्य आश्रित्य ते उपयातुः तव समीपं गच्छतः मे इत्यर्थः । कुताश्चित् कुत्रापि भयं नास्ति । त्वं व्यथां दुःखं शिथिलां अल्पां कुरु ॥ ६ ॥

पतितत्वेति । पतितायाः भावः पतितत्वम् । 'स्त्रियाः पुंवद्' इत्यादिना पुंवद्भावः । तस्माद् या भीतिः भयं तया मृतौ मरणे बद्धः निश्चयो यया सा तथा । रावणनिमित्तपातिव्रत्यभङ्गमाशङ्क्य भयेन मर्तुं कृतनिश्चयेत्यर्थः । पत्युः भर्तुः तत्त्वबोधात् परमार्थविचारात् या धृतिः तया रुद्धं निवारितं कश्मलं पापं यया सा तथा । रामशौर्यादिगुणविचार-जातधैर्येण धिक्कृतमरणनिश्चयेत्यर्थः । दवेन वनाग्निना दग्धा प्लुष्टा वीरुत् लताप्रताननीवेत्युपमा । 'लताप्रतानिनी वीरुद्' इत्यमरः । स्थितेति शेषः । सा सीता तत्र तस्मिन् क्षणे हनूमतः उक्तानां वाचां सृष्टिभिः विसर्गैः । एवम्भूतत्वेनाश्रुतपूर्वाभिरुक्तिभिरित्यर्थः । समुदश्वसीत् सम्यगाश्वासं प्रापत् ॥ ७ ॥

विपदीति । इयं सीता विपदि आपदि एनेन हनूमता उपदीकृतं उपहारीकृतम् दवथुर्नाम अक्षिकूटे शोफः । वियोगः विरह एव दवथुः तस्यौषधं घनकान्ति सान्द्रप्रभं भर्तुः कनकाङ्गुलीयं स्वर्णोर्मिकां वीक्ष्य जनकात्मजा सीता हृदि कां मुदं नागात् । सर्वां मुदमगादेवेत्यर्थः । अत्यन्तं तुष्टाभवदिति यावत् ॥ ८ ॥

अपीति । शोभनाः दन्ताः यस्याः सा सुदती सीतेत्यर्थः । 'वयसि दन्तस्य दतृ' इति दत्रादेशः । अमुना हनूमता उक्तमपि वचः वाक्यं भवदाननोत्थं त्वन्मुखोत्पन्नं 'अभिजानती अवधानशालिनी सावधाने-त्यर्थः । अस्य हनूमतः करे शिरोमणिं ददती कृतवन्दनं कपिं हनूमन्तं प्रतिसन्दिदेश ॥ ९ ॥

नवेति । त्वयेति शेषः । नवं नूतनं अवमानं मार्ष्टुं अपनेतुं आशरौघस्य राक्षससमूहस्य शवमांसैः दिग्भ्यो बलिः इष्यतां काङ्क्ष्यताम् ।

ध्रुवं नूनम् । 'इष इच्छायाम्' इति धातोः कर्मणि लट् । त्वं धवं भर्तारं आनय । मां अव । गिरा अलम् । पवमानपुत्र हनूमन् ! त्वं विलम्बवान् मा भव । विलम्बं मा कुथा इत्यर्थः ॥ १० ॥

इतीति । इति तया सीतया यावत् इद्धा प्रवृद्धा रतिः यस्मिन् कर्मणि तत्तथा । याचिते प्रार्थिते । भावे निष्ठा । तावत् मारुतिः हनूमान् प्रतियानशैघ्र्यं प्रतिगमनवेगतां उदियाय प्राप । यदि तर्हि यामि अत्र पतियानं भर्तृगमनं मत्प्लुतियानतुल्यं मत्प्लवगमनतुल्यम् । इति इत्थम् । ते भर्ता अतिशीघ्रमत्रागमिष्यतीत्युक्त्वेत्यर्थः । यान् गच्छन् स हनूमान् ननाम । सीतामित्यर्थः ॥ ११ ॥

स्थिरेति । स्थिरजङ्गमानां स्थावरजङ्गमानां ईश नाथ ! त्वं मे जरसं जनिं च हर । 'जराया जरसन्यतरस्याम्' इति जराशब्दस्य जरसादेशः । सञ्चितं सम्पादितं दुरितं पापं च हर । त्वं खलानां पापानां सङ्गेन सहवासेन ये दोषाः रागद्वेषादयः तैः कलुषं आविलं मनः अद्य सज्जनसङ्गमेन पुण्यवत्सहवासेन मङ्गले शुभे पथि मार्गे कुरु ॥ १२ ॥

(३२)

निमीति । त्वरितमेव तिमितिमिन्दिरं समुद्रं लिलङ्घयिषुः लङ्घितुमिच्छुः । 'लघि गतौ' इति धातोः ण्यन्तात् सन् । उप्रत्ययः । अयं हनूमान् निमिपतिनन्दनायाः जनकपुत्र्याः निकटतः समीपतः अवप्लुतवान् । तस्करवत् चोरेणेव स्वं आत्मानं अपि निगूहता अप्रकाशयता मया इह अस्मिन् विमतधामनि शत्रुगृहे किं कृतमिति विचार्य अथ स हनूमान् संववृधे । पूर्ववत् वर्धितवानित्यर्थः ॥ १ ॥

जलेति । जलनिधेः लङ्घने क्षमं शक्तं वपुः शरीरं यस्य स तथा । अहं रिपोः शत्रोः न बिभेमि भयं न प्राप्नोमि । इह अस्मिन् विषये चिन्तया अलम् । अहं अशोकवनीं विशेयं गच्छेयम् । ननु नूनम् । इति इत्थं निश्चितवान् एष हनूमान् । मदेन सह वर्तत इति समदः द्विपः गजः कमलिनीं पद्मिनीमिवेत्युपमा । प्रसभं बलात्कारेण बहून् अनेकान् प्रमदवनद्रुमान् उद्यानवृक्षान् बभञ्ज पेषयामास ॥ २ ॥

हलेति । सः हनुमान् अभूतचरात् अभूतपूर्वात् । 'भूतपूर्वे चरट्' इति चरट् । हलहलितस्य शब्दविशेषस्य । वानरशब्दस्येत्यर्थः । श्रवात् श्रवणात् अमितरुषा अनल्पकोपेन अभिमुखान् उद्भटान् उद्रिक्तान् कानपि निशायां रात्रौ अटन्ति सञ्चरन्तीति निशाटाः राक्षसाः तेषां भटान् योधान् विदलितः विदारितः मस्तको मूर्धा येषां ते तथा । तान् सतः व्यधित अकृत । सभयं यथा तथा पलायितान् पलायनं कुर्वतः कांश्चित् । निशा(टभ)टानित्यत्रापि सम्बध्यते । समनुसृत्य समनुगम्य तर्जितवांश्च निन्दितवांश्च ॥ ३ ॥

दशवदनायेति । यूयं मां वातसुतं वायुपुत्रम् । हनूमन्तमित्यर्थः । प्लवगं वानरं रघुपतिदूतं रामदूतं इति दशवदनाय रावणाय वदत । इति विशेषमपि एषः हनूमान् अवदत् । प्रकर्षेण मथिताः मर्दिताः पादपाः वृक्षाः येन स तथा । त्रुटिताः छिन्नाः वल्लयः लताः यस्मिन् स तथा । तादृशो विहारगिरिः क्रीडापर्वतः यस्य स तथा । अधिगतः तोरणो बहिर्द्वारं येन स तथा । कृतार्थमनाः सन् क्षणं आस्त तस्थौ ॥ ४ ॥

निजेति । निजवनस्य आत्मोद्यानस्य भञ्जनात् व्यथितेन सञ्जातव्यथेन रावणेन सम्प्रहिताः सम्यक् प्रेरिताः एकपदे मार्गे निशितानां महायुधानां प्रकरं समूहं वर्षयन्तीति तथा । अशीतिसहस्रमिताः अशीति-सहस्रसङ्ख्याका इत्यर्थः । किङ्कराः चमूपतयः सेनापतयश्च हनूमति एव हव्यभुजि अग्नौ इति व्यस्तरूपकम् । स्वयं अजुहत स्वात्मानमत्यजन्नि-त्यर्थः । 'ओहाक् त्यागे' इति धातोः कर्तरि लङ् ॥ ५ ॥

अपहृतेति ॥ आर्यं हलं मुसलो यस्य स तथा हरिः कपिः कमल-भवास्त्रेण ब्रह्मास्त्रेण पञ्जरहरित्वं पञ्जरस्थवानरभावं अनायि नीतः । 'णीञ् प्रापणे' इति द्विकर्मकाद्धातोः कर्मणि लुङ् । इन्द्रजित् ब्रह्मास्त्रेण हनूमन्तं बबन्धेत्यर्थः ॥ ६ ॥

अचकितेति ॥ अचकितः अकम्पितः चेतनः आत्मा यस्य स तथा । स्थिरात्मेत्यर्थः । अपि आकुलतां पारवश्यं अभिनयन् प्रकाशयन्नि-त्यर्थः बहुनिशाचराणां अनेकराक्षसानां बाहुलतां प्रशस्तबाहुमेव मणि-शिबिकां रत्नयानविशेषमिति व्यस्तरूपकम् । 'शिबिका याप्ययानं स्यात्'

इत्यमरः । बाहुरुतामिति जातावेकवचनम् । गतः प्राप्तः अयं हनूमान् दशशिरसो रावणस्य पुरोभुवं अग्रभूमिं अगाहत प्रापत् । वलयितः मण्डलितः बालधिः लाङ्गूलं येन स तथा । अभिमुखः सन् परास्तभयं त्यक्तभीति यथा तथा आस्त ॥ ७ ॥

कथयेति । त्वम् । कैतवं व्याजम् । त्रिदशेषु देवेषु मध्ये । भवता विपिनस्य उद्यानस्य सुमर्दनात् सुतरां मर्दनात् किं फलं अकम्पत लब्धम् । इति दशकन्धरो बुभुत्सुः बोद्धुमिच्छुः । मन्त्रिणा प्रहस्तेन ॥ ८ ॥

जयतीति । जनेषु विलक्षणाः असाधारणाः लक्षगुणाः यस्य स तथा । अपि च किञ्च । नयसंहितया नीतिशास्त्रेणेत्यर्थः । योगितः युक्तः । अत्र ण्यर्थस्त्वविवक्षितः । रविसुतः सुग्रीवः । श्रिया सम्पदा योजितः आपणिकः वणिगिवेत्युपमा । 'वणिक् पण्याजीवोऽप्यापणिकः' इत्यमरः । वालिनः पदं स्थानं एत्य लसति भाति ॥ ९ ॥

प्रमुषितेति । प्रमुषितायाः । अनेन रहस्यपहृताया इत्यर्थः । जानक्याः सीतायाः विचयनाय अन्वेषणाय दिशासु दिक्षु । 'आपचैव हलन्तानाम्' इत्युक्तत्वात् आबन्तत्वम् । प्लुतिजवेन प्लवनवेगेन गोष्पदीकृतः पयोधिर्येन स तथा । गोष्पदमित्यत्र 'गोष्पदं सेवितासेवितप्रमाणेषु' इति निपातनादेव सुट् ॥ १० ॥

प्रमदेति । दिदृक्षया द्रष्टुमिच्छया । रिरक्षिषया रक्षितुमिच्छया । अक्षस्य पिता जनकः तस्य सम्बुद्धिः । क्षपितः विनाशितः । जिजीविषुः जीवितुमिच्छुः । तस्य भावो जिजीविषुता ॥ ११ ॥

उपनयेति । जानकीं स्वरमणस्य रामस्य उपनय समीपं नय प्रापय । अहं भणामि वच्मि । न चेत् त्वं सीतां रामं न नयसि चेदित्यर्थः । दाशरथी रामः तवाहितम् । त्वया कृतमित्यर्थः 'क्तस्य च वर्तमाने' इति षष्ठी । अविनयं न सहेत । इति इत्थं रिपुं शत्रुं न्यकरोत् अतिरस्करोत् । स भवान् मम सम्पदे भवतु ॥ १२ ॥

(१३)

चपलस्येति । यूयं चपलस्य चपलस्वभावस्येत्यर्थः । कपेर्वानरस्य प्रगल्भवाचा प्रौढगिरापि मुधा वृथा अबलत्वं गमिताः प्रापिताः आश्चे

किम् । मा भूतेत्यर्थः । योऽयं कपिः सफला श्रुतिः श्रवणं यस्य स तथा । तस्य भावः सफलश्रुतिता । स्वमाहात्म्यवर्णनामित्यर्थः । व्यधात् अकृत । पुलस्त्यः सफलश्रुतितां न व्यधात् । एवमुत्तरत्रापि बोध्यम् ॥ १ ॥

इतीति । इत्युक्त्वेत्यर्थः । दशास्यः रावणः रोषभरेण अरुणानां अक्षिमालानां नेत्रपङ्क्तीनां प्रतिबिम्बात्मकं प्रतिफलनस्वरूपमेव बन्धुजीव-मालयं बन्धूकमालाम् । 'बन्धूको बन्धुजीवकः' इत्यमरः । प्रतिभृत्यकरं भृत्यकरे भृत्यकरे न्यधात् निहितवान् । रावणः क्रोधभारात्यन्तारुणाक्षि-मालाभिः । साभिप्रायं भृत्यकरानद्राक्षीदित्यर्थः । आशरौघाः राक्षससमूहाः अमुं हनूमन्तं प्रतिपद्य प्राप्य अगृह्णत जगृहुः ॥ २ ॥

नहीति । हि यस्मात् । नीतौ नीतिशास्त्रे कदापि कुत्रापि दूतस्य वधो निग्रहो न व्यधायि विहितः । सकलनीतिज्ञैः तत्कर्तृभिरिति शेषः । सः दूतवधः अस्य दूतवधस्य नियोक्तरि नियोगकर्तरि अहितः दोषकरः । स्यादिति शेषः । तत् तस्मात् विभीषणः एतस्य हनूमतः । बहुं शोभाश्रयं ... तथा तं अग्रजं ज्येष्ठं अमुं रावणं बहुशः अभणत् अवदत् । दूतवधं मा कृथा इति बहुवारमभणदित्यर्थः ॥ ३ ॥

सितेति । यूयं सुतरां तैलैः सिक्तैः सितजीर्णपटैः धवलपुराणवस्त्रैः अमुष्य हनूमतः पृथुलाङ्गूलं गुरुवालधिं वेष्टयित्वा बलं शक्तिं प्रतिरुध्य निरुध्य बालं लाङ्गूलं प्रदीप्य अग्निना युक्तं कृत्वा प्रतिरथ्यं रथ्यां रथ्यां नयत इति नीचः रावणः इत्यर्थः, उवाच ॥ १४ ॥

प्लवग इति । तत्र लङ्कायां विविधं बहुप्रकारं विहारं क्रीडां आचरिष्यन् आचरितुमिच्छन् पुच्छं प्रसार्य स्थितवान् प्लवगः हनूमान् नहने बन्धने । 'णह बन्धने इति धातोः भावे ल्युट् । तत् पुच्छं सुतरां महत् पीनमित्यर्थः । आयतं दीर्घं च व्यतनोत् अकरोत् । तदित्येतत् विभक्तिविपरि-णामेन योज्यम् । तस्मिन् दीप्यमाने सति अग्निसंयोगानन्तरमित्यर्थः । खर्वं कृशं च ह्रस्वं च तनुं चेत्यर्थः । व्यतनोत् ॥ ५ ॥

व्यचरादिति ॥ परितापात् या आर्तिः तस्या अभिनीतिः अभि-नयोऽस्यास्तीति तथा । परितापार्तिमभिनयन्नित्यर्थः । व्यचरत् सञ्चचार ॥ ॥ ६ ॥

कृतेति । कृतः दुस्मितः दुःखेन स्मितः विस्मयः यैस्ते तथा । तादृशैः खेचरौघैः गगनचारिसमूहैः दृष्टः विलोकितः घृतैः आज्यैः सिक्तेष्वंशुकेषु एव दीप्रः प्रकाशमानः वह्निः अग्निः यस्य स तथा । आञ्जनेयः हनूमान् स्वतन्त्रः सन् हताः किङ्करपुञ्जाः यस्मिन् कर्मणि तत्तथा । ततस्ततः पतति स्म पपात ॥ ७ ॥

अथेति । रावणस्यापत्यं पुमान् रावणिः इन्द्रजित् । 'अत इञ्' इति इञ् । हयानां अश्वानां हस्तिनां गजानां कुटीराः आलयाः 'कुटीरौ कर्कटालयौ' इति नानार्थरत्नमाला । हट्टा गृहावयवविशेषाः तेषां घाटीः चातुरीः ध्वजशाटीः पताकाः चापि भस्मासाच्चक्रे भस्माधीनाः कृतवान् । 'तदधीनवचने च' इति सातिः ॥ ८ ॥

वियदिति ॥ हन्ता हनिष्यति । हन्तेति खेदे । वयं क्वनु कुत्र गन्तास्मः गमिष्यामः इति अन्धाश्च ईरयन्ति स्म ॥ ९ ॥

त्रिपुरीति । नगरीतयः पर्वतरीतयः सालमालाः प्राकारसमूहाः यस्यां सा तथा । सा नगरी लङ्का गिरीशतः शिवात् । त्रयाणां पुराणां समाहारः त्रिपुरी । 'द्विगोः' इति ङीप् । इवेत्युपमा । कपीशात् हनूमतः स्वं वपुः ईशस्य शिवस्य तनूपदेहयोग्यं शरीरलेपनोचितं उररीकुरुते स्म अङ्गीचकार ददाहेत्यर्थः ॥ १० ॥

अभिगम्येति । हनूमान् विशृङ्खलात् अप्रतिबन्धात् विहारात् क्रीडायाः अभिषङ्गं पराभवं अभिगम्य प्राप्य क्रीडातो विरम्येत्यर्थः । तव गृहिणीं सीतां प्रणम्य अर्णवं समुद्रं अलिलङ्घिषत लङ्घितुमैच्छत् । लघेर्गत्यर्थात् सन्नन्तात् लङ् । सः त्वं मम अवलम्बः आश्रयः एधि भव ॥ ११ ॥

(३४)

उदगिति । सः हरिः हनूमान् उदगाशया उदीच्या दिशा विकृष्टं आकृष्टं मनो यस्य स तथा । सः इवेत्युत्प्रेक्षा । मलयादिगिरीन् पृथगाकलय्य वीक्ष्य । धुते कम्पिते कानने तिष्ठन्तीति तथा । तादृशैः विहगैः अनुगतः अनुयातः सन् अरिष्टगिरेः जवात् उदगात् उज्जगाम ॥ १ ॥

त्वरितमिति ॥ सः हनूमान् हरिसंसदि वानरसभायां विधिवद्धि-वालिनां सुतैः जाम्बवत्सुषेणाङ्गदैः वर्णिता प्रशंसिता धीः बुद्धिः यस्य स तथा उदचलत् उज्जगाम ॥ २ ॥

गुरुमार्गेति । अमी वानराः गुरुमार्गखेदस्य शमनार्थं मधुवने कदनं नाशं व्यधुः कुर्वन्ति स्म । ततः तस्मात् । अपिशब्देन समयातिक्रमः समुच्चीयते । रुष्टः रोषवानिति विचार्य हृष्टधियः प्रहृष्टमानसाः सन्तः हरिपतेः । सुग्रीवस्य सविधं न प्रतिपेदिरे । खिन्नमानसा एव प्रापुरि-त्यर्थः ॥ ३ ॥

सहेति । अथ हनुमत्प्रमुखाः ते वानराः तेन सुग्रीवेण सह तव महिषी सीता अवलोकिता दृष्टा इति हरयः वानराः जगदुः ऊचुः ॥ ४ ॥

तनुमिति । त्वं तनुं शरीरं आलिलिङ्गिथ । रहः विजनं निनेथ । नन्विति प्रश्ने । मां कृतार्थय कृतार्थां कुरु इति गिरा हनुमदुक्तया सीता-गिरेत्यर्थः । अनुमानितः हनुमान् तनुतानवं शरीरकार्श्यं धृतेः धैर्यस्य घनतां सान्द्रतां च सीताया इत्यर्थः । अगदीत् अवोचत् ॥ ५ ॥

रमणीति । सः हनूमान् रमण्याः सीतायाः शिरसि तिष्ठतीति तथा । स चासौ मणिश्च तेन ते नयने । रमण्या इमे रमणीयाः वाक्य-विभवाः वाग्वैभवाः । रमणीयाश्च ते वाक्यविभवाश्च तैः श्रवणे अधिनोत् प्रीणयति स्म । ते मनसि वैश्रवणे विश्रवसः सुतत्वमपि व्यतनोत् । अकरोत् । रावणेनापहृतां विश्रवसः पुत्रः वैश्रवण इति कीर्तिं रावणं निहत्य वैश्रवणे स्थापयितुं मनः कारितवानिति भावः ॥ ६ ॥

अथेति । हे अजित ! त्वं रक्षः राक्षसं रावणमित्यर्थः । इषोः शरस्य लक्ष्यं लक्ष्यं लक्षयन् विचारयन्नित्यर्थः । वलयं भूवलयं तत्पर्यन्तं आवलयम् । समुद्रपर्यन्तमित्यर्थः । पूर्णानि बलानि वानरसैन्यानि यस्य स तथा। बहिरुत्थितः अपरः और्वशिखी बडवानलः इवेत्युत्प्रेक्षा । स्थित इति शेषः। सन् उदधेः समुद्रस्य सविधं समीपं अभिजग्मिथ ॥ ७ ॥

कपीति ॥ कपीनां यूथं पान्तीति कपियूथपाः अङ्गदाद्याः तैः तिमिति-मिङ्गिलवान् तिमयः तिमिङ्गिलाश्च मत्स्यविशेषाः तद्वान् । अबलायाः सीतायाः वियोगः विरह एव बडवानलः तद्वान् । जळो न भवतीत्यजळः ।

पण्डित इत्यर्थः। अयं राम एव समुद्र इत्यर्थः। मां तथैव अजलं — लळयोरभेदान्निर्जलमेव कुरुते किमु। कुर्यात् किमित्यर्थः। वर्तमानसामीप्ये वर्तमानवद्वे'ति भविष्यदर्थे वर्तमानप्रत्ययः॥ ८॥

उदधेरिति। विमतं शत्रुम्। त्वामित्यर्थः। उदधेः समुद्रस्य उदञ्चं तटं उत्तरं तीरं उपगम्य प्राप्य विनिविष्टबलं विनिवेशितसैन्यं निशम्य धृतेः धैर्यस्य बन्धनतो बन्धनात्। जितः मन्दरो येन सः तथा तस्य दशकन्धरस्य रावणस्य हृदि भीः भीतिः उदभूत् उद्भूता॥ ९॥

प्रियेति। सः रावणः प्रियाणि श्रवणसुखानि वाक्यानि वदन्तीति प्रियवादिनः तैः सह मन्त्रितवान्। हिते परमार्थपथ्ये वदतीति तथा तं सहजं विभीषणं उज्झितवान् त्यक्तवान्। नैतदाश्चर्यमित्याह—विहितमिति कः विहितं विधिम्। भावे निष्ठा। अन्यथयेत् (अन्यथाकरोत्? अन्यथा कुर्यात्) न कोऽप्यन्यथयेदित्यर्थः॥ १०॥

(३५)

कुलेति। हे विभो! नयसरणिषु नीतिमार्गेषु जाग्रत् जागरूकः। नीतिमार्गप्रवृत्त इत्यर्थः। अयं विभीषणः कुलविलयकरासु वंशोच्छेदकरासु क्रियासु कर्मसु प्रसक्तात् प्रकर्षेण सक्तात् खलवशगात् पापाधीनात् गतसौहृदात् स्वादग्रजात्। रावणादित्यर्थः। विरज्यन् विरागं प्राप्तः सन् त्वां श्रयते स्म प्राप॥ १॥

हरिवरेति। हरिवरहनुमतोः मतं अभिप्रायं अनुगच्छतीति तथा त्वं तं विभीषणं परिसर एव समीप एव। सुहृदयस्य भावः सौहृदय्यम्। मैत्रीत्यर्थः। परिचितं च परिशुद्धं निष्कपटमित्यर्थः। तच्च तत् सौहृदय्यं यस्य स तथा। तस्मात् अमुतः विभीषणात् [उत किन्तु ?] परं उत्कृष्टं परस्य मर्म तत्त्वं अबुद्ध्याः अवेदः॥ २॥

कतिपयेति। कतिपय(थ)दिनतः कतिपयदिनेभ्यः इत्यर्थः। परस्तात् परं पतिरहिता अनाथा एव भविष्यती भाविनी त्वयैव पतिमती सनाथा भवतु। इत्युक्त्वेत्यर्थः। मन्त्रं परिपठता जपता भवता बन्धुः विभीषणः अभ्यषेचि अभिषिक्तोऽभूत्॥ ३॥

तदन्विति । तेन सगरेण उपचितस्य महोदधेः समुद्रस्य प्रसत्त्यै प्रसादाय द्रुतरचितं कुशतल्पं अध्यशेथाः । कुशतल्पे शेषे (स्म)। 'अधिशीङ्स्थासां कर्म इति कर्मत्वम् ॥ ४ ॥

अधिज्ञायितेति । सुतरां दृढः स्थिरः सुदृढः । शोभनो मार्गः सुमार्गः । सुदृढं सुमार्गं जुषति सेवत इति तथा । तस्य अर्थनायां याचनायां परस्य अमितशमदमस्य अनल्पशमदमस्य ते निशानां रात्रीणां त्रयम् । दृष्टं फलं यस्मिन् तत्तथा । तन्न भवतीत्यदृष्टफलम् । क्रमेणागमत् अतीतमित्यर्थः ॥

सहजेति । सहजस्य विभीषणस्य विगमेन वियोगेन दीना भा यस्य स तथा । दशास्यो रावणः चरैः चारैः विदिते ज्ञाते अरिबले शत्रुबले शुकस्य शुकनाम्नो राक्षसस्य मुखेन यं भेदं तृतीयं उपायं अकृत कृतवान् । सः भेदः विकृतेः विकारस्य निदानं आदिकारणं विदन्तीति तथा नीतिज्ञा इत्यर्थः । तेषां विहासहेतुः विशेषेण परिहासहेतुः जज्ञे अजनि ॥६॥

अथेति ॥ अथ पुनः अरुणे सूर्ये उदिते सति प्रतिघः रोष एव नटपटुः नटेषु मध्ये निपुणः अधरोष्ठयोः स्फुतिः विकटभ्रुकुटी भयङ्करभ्रूलता तं एव यथाक्रमं पटी वस्त्रम् यवनिकेत्यर्थः, नटी यस्मिन् । दीप्रे प्रकाशमाने नेत्रे एव दीपौ यस्मिन् तत्तथा । तवास्यमेव रङ्गं तस्मिन् प्रनटितुं ऐहत ऐच्छत् । प्रनटितुमित्यत्र अणोपदेशत्वान्न णत्वम् ॥ ७ ॥

अनुचितमिति । प्रभुष्वपि आविनय एव पर्वतः तस्य तुङ्गानि उन्नतानि शृङ्गाणि शिखराणि भजन्तीति तथा तेषु । अनुयाचनं अन्वर्थनं अनुचितं अयोग्यम् । अङ्ग ! हे ! त्वं सनिषङ्गं सतूणीरं शार्ङ्गं धनुः उपनय समीपं प्रापय । रिपुवशगः अरिस्वतन्त्रः पयोधिः मे रिपुरेव ॥ ८ ॥

कृतेति । त्वं कृतः परिकराणां परिवाराणां बन्धो यस्मिन् कर्मणि तत्तथा । 'परिकरः पर्यङ्कपरिवारयोः' इत्यमरः । इत्थं उक्त्वा सदरेण सभयेन सहोदरेण लक्ष्मणेन सादरं यथा तथा उपनीते समीपं प्रापिते धनुषि चापे अमोघं सफलं सलिलस्य जलस्य विशोषणकर्मठं विशेषेण शोषणक्रियाकुशलं विपाठं शरं सपदि सद्यः समदधाः सन्दधिषे ॥ ९ ॥

विशिखेति । विशिखस्य शरस्य मुखात् विनिर्गतेन उग्रेण वह्निना क्वथितं नितरां पक्वं घृतमिव उदमिलत् उच्चैरमिलत् शुष्यत मिषत

प्रकर्षेण दीप्तं तप्तं पाथो जलं यस्मिन् स तथा प्रकटतटे प्रवृद्धतीरे लुठन्तः प्रभीताः परितप्ताः यादांसि जलजन्तवो यस्मिन् स तथा । प्रचेताः वरुणः तव सङ्कटं प्रतिबुबुधे ॥ १० ॥

प्रथमेति । हे नाथ ! त्वं प्रथमं पूर्वं विरचिते कृते कबन्धस्य नाशे कबन्धात् जलबन्धात् नाशे च अधुनापि कथं समुद्यतोऽसि ॥ ११ ॥

३६

दाहेति । हुताशने अग्नौ इदं दाहावहत्वं यत् सा मयि त्वया कल्पिता कृता सागाधता सातलस्पर्शत्वम् । भवतीति शेषः । अग्नेर्दाहावहत्वमिव मम सागाधता भवतीत्यर्थः । निदर्शनालङ्कारः ।

'वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना'

इति तल्लक्षणात् । अहं क्वाचित् त्वां न जिहासामि त्यक्तुमिच्छामि । त्वया तु स्नेहातिरेकस्य अनुगुणं अनुरूपं यथा तथा भण्यतां उच्यताम् ॥ १ ॥

एवमिति । प्रचेतसि वरुणे एवं एवमुक्त्वेत्यर्थः । नमस्कृत्य निशाचारिणो राक्षसस्य, रावणस्येत्यर्थः, पुरीं लङ्कामित्यर्थः । यावद्यथीकृत्य । 'यावत्तावच्च साकल्येऽवधौ' इत्यमरः । निजार्णसां निजतोयानाम् । 'अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बु' इत्यमरः । गाधतां सतलस्पर्शत्वं वितीर्य दत्वा याते गते तदुक्त्या तस्य वरुणस्योक्त्या वाचा द्रुमकूले वृक्षाधोभागे भूतले स्फीते प्रवृद्धे सति त्वं आशुगं शरन् । आग्नेयास्त्रमित्यर्थः । अमुचः प्रत्याहृतवानभूरित्यर्थः ॥ २ ॥

प्रीतिमिति ॥ त्वं निजानुजे लक्ष्मणे प्रीतिं न्यधाः अकरोः । स्फीता उन्नतिः औन्नत्यं यस्य स तथा । तस्मिन्नपि दुष्टमीहितं यस्य स तथा । तस्मिन्नहिते शत्रौ । रावणे इत्यर्थः । तृणतां तृणवन्निस्सारतामित्यर्थः । कपीश्वरे सुग्रीवे मोदोन्नतां प्रीतिसमुद्धतां भ्रूलतिकाम् । यूथपेषु अङ्गदादिषु सेतोर्निरूढयै बन्धनायेत्यर्थः । तां मोदोन्नतां भ्रूलतिकां न्यधाः ॥ ३ ॥

पुत्र इति । प्रस्तावं अवसरं वेत्तीति प्रस्तावविद्वान् पुरुहूतस्य शक्रस्य शिल्पिनः कारोः । विश्वकर्मणः इत्यर्थः । पुत्रः नळाख्यः प्लवगः तव इङ्गितात् अभिप्रायात् उत्थाय मुदं उद्वहन् नत्वा अहं करकौशलात् ते सेतुं कर्तास्मीत्यवदत ॥ ४ ॥

राज्ञेति । कपीनां राज्ञा सुग्रीवेण भवतापि वितीर्णां दत्तां आज्ञां उपलब्धवान् नळः तां गिरैव स्वाज्ञाकरान् अन्यान् प्राज्ञान् आरमयत् रमयामास ॥ ५ ॥

सुग्रीवेति ॥ शोभनैः ग्रावभिः पाषाणैः पादपैः वृक्षैः अचलैः पर्वतैः उन्नताभिः ग्रीवाभिः हृद्यैः । मनोहरैरित्यर्थः । अभूयत । 'भू सत्तायाम्' इति धातोर्भावे लङ् ॥ ६ ॥

सस्नुरिति । केऽपि जले सस्नुः स्नानं चक्रुः । भग्नेतरान् अभग्नान् चलेतरान् अचलान् कीलान् शङ्कून् । 'शङ्कावपि द्वयोः कीलः' इत्यमरः । चक्रुः ॥ ७ ॥

तलेति । अथ परे अन्ये तलस्य अवलोकाय पलालः निष्फलतृणादिकाण्डः ।

'नाडी नाळञ्च काण्डोऽस्य पलालोऽस्त्री स निष्फलः'

इत्यमरः । तृण्या तृणसमूहः । तदादिभिः निबद्धः कर्दमः पङ्को यैस्ते तथा सन्तः अमुष्मात् बिलात् रन्ध्रात् । 'बिलं रन्ध्रे गुहायाञ्च' इति नानार्थरत्नमाला । वियदन्तात् गगनप्रदेशात् पातितान् पृथुलान् बहून् वलाहकान् जलानि अपीप्यन् पाययामासुः ॥ ८ ॥

दन्तावलेति । दन्तावलास्यं गजास्यम् । 'दन्ती दन्तावलो हस्ती' इत्यमरः । महोदधौ समुद्रे निदधौ निक्षिप्तवान् ॥ ९ ॥

सप्तद्वयमिति । एषः नलः शतयोजनायतं शतयोजनपरिमितदैर्घ्यम् । न्यबध्नात् बबन्ध ॥ १० ॥

गन्धर्वेति । विधूताखिलपातकः समुन्मूलितसकलपापः ते सेतुः अन्तः मनसि विगाढाद्भुतहर्षं यथा तथा ऐक्ष्यत अदर्शि ॥ ११ ॥

(१७)

सेतुवर्त्मेति । यातुसद्म लङ्काम् । भूधराणां पर्वतानां आनयनकर्मणि रताः तान् भूधरान् उपनिन्युः समीपं प्रापयन् ॥ १ ॥

अङ्गदेति। अङ्गदेन ऊढः सहजो लक्ष्मणो यस्य स तथा। स्वीयमन्त्रिभिः आत्ममन्त्रिभिः युतौ नूतनलङ्कानायको विभीषणः प्लवगराजः सुग्रीवः पुरोगौ अग्रयायिनौ यस्य स तथा॥ २॥

पूर्णमिति। आशरपुरीं लङ्कां परितः लङ्कायाः समन्तादित्यर्थः। 'अभितः परितः' इत्यादिना षष्ठ्यर्थे द्वितीया। पूर्णम्। तीर्णः वारिधिः। येन तत्तथा। घूर्णमानैः कम्पमानैः चतुरर्णवैः तुल्यं कीर्णं व्याप्तं कपिसैन्यं खचरैः देवैः ऐक्षि ईक्षितम्॥ ३॥

सोग्रनादेति। उग्रनादैः भयङ्करशब्दैः बधिरीकृता लोका यया सा तथा। मूर्त्तिमती सशरीरा ते भाग्यसम्पत् भाग्यसमृद्धिरिवेत्युत्प्रेक्षा। स्थितेति शेषः। सा वानरसेना श्लाघ्यतां अभूत॥ ४॥

वानरेन्द्रमिति। वानरेन्द्रं सुग्रीवम्। उपजापकः धर्माद्यैः परीक्षयन्।

'भेदोपजापावुपधा धर्माद्यैर्यत् परीक्षणम्।'

इत्यमरः। उपजापशब्दादाचारार्थे क्विप्। ततः 'ण्वुल्तृचौ' इति ण्वुलो 'युवोरनाकौ' इत्यकादेशे उपजापक इति रूपम्। एकः रावणस्य प्रणिधिः चरः।

'यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः।'

इत्यमरः। अत्र वानरसैन्ये निबद्धः। कैश्चिद्वानरैरित्यर्थः॥ ५॥

तद्वच इति। सः रावणः तस्य चरस्य वचः वाक्यं तृणीकृतवान्। तृणमिव निस्सारं कृतवानित्यर्थः॥ ६॥

वीक्ष्येति। आशराणां राक्षसानां पतिः राजा। एष्यन् भविष्यन्नित्यर्थः। स चासावाशरपतिः बिभीषण इत्यर्थः। तव प्रेष्यतां गतौ। तयोर्दौत्यात् दूतवधस्यानर्हत्वात् तत्क्षणमर्हत्वात्त्वया त्याज्यतां मापाविति भावः। 'कृत्यानां कर्तरि वा' इति षष्ठी॥ ७॥

तावुभाविति। वितर्ज्य विनिन्द्य निरस्तौ। रावणेन त्यक्ताविति त्यर्थः। मुमूर्षौ मर्तुमिच्छौ विषये अगदस्य अगदसंज्ञस्यौषधयोस्तस्य भावः भवनम्। 'भू सत्तायाम्' इति धातोर्भावे घञ्। एवम्॥ ८॥

रावणस्त्विति । मायया निर्वृत्ते मायिके । मायाकृते इत्यर्थः । तव धनुश्शिरसी चापोत्तमाङ्गे तां सीतां दर्शयन् अनृतं असत्यं आह । स्मेति शेषः ॥ ९ ॥

त्वत्प्रिय इति । निशि निशायां निद्रामाचरन् विशसितः हतः । विचितः वानरैर्मार्गित इत्यर्थः । लक्ष्मणस्तु न लब्धः । त्वं तस्य रामस्य मुखं धनुश्च पश्य अवलोकय ॥ १० ॥

हृदिशङ्कितमिति । अपायदृशा नाशबुद्ध्या विद्विषा शत्रुणा रावणेनेत्यर्थः, कथितं उक्तमपि इदं पूर्वोक्तं वचनं उपकर्ण्य आकर्ण्य सत्यमिति अतिशुचा अत्यन्तशोकेन विलपन्तीं परिदेवयन्तीम् । सीतामित्यर्थः । विहाय सः रावणः रणाय युद्धमारब्धुमित्यर्थः । 'क्रियार्थोपपद' इत्यादिना चतुर्थी । अत्यगात् ॥ ११ ॥

सत्यमिति । सरमा नाम राक्षसी इमां सीतां यमस्य वक्त्रतः मुखात् उदहार्षीत् उद्धृतवती ॥ १२ ॥

सदिति । सतां सज्जनानां परायणाः परमावलम्बाः गुणाः यस्य स तथा । त्वत्परः त्वयि परः ते भर्ता पुरं लङ्कां रुणद्धीति तथा सन् वसति यत् तत् पुरा खरवधे तव यः प्रियस्य भर्तुः ईक्षणे विघ्नः । अभूदिति शेषः । अद्य च स तावान् । खरवधे शरवर्षैरेव किञ्चित्कालं दर्शने विघ्नोऽभवत् इदानीमपि तथैवेत्यर्थः ॥ १३ ॥

वैभवादिति । विभीषणस्य पत्न्या सरमयेत्यर्थः । वैभवादित्युक्तप्रकारेण उक्त्वेत्यर्थः । प्रकृतिं पूर्वावस्थां प्रापिता सती ते वधूः सीता आस्त ॥ १४ ॥

(१८)

सत्कृत्येति । रक्षोराट् रावणः पुरि पुर्यां उदीचि गोपुराग्रे उत्तरगोपुरश्रेष्ठे अवसत् उवास ॥ १ ॥

तद्वृत्तमिति । विमतपुरीं शत्रुपुरीं निर्धक्ष्यन् निर्दग्धुमिच्छन् तां विमतपुरीं अवैक्षथाः ॥ २ ॥

सुग्रीव इति । तं रावणं भूमौ उच्चैः निपात्य पातयित्वा हृतं मकुटं किरीटं येन स तथा ॥ ३ ॥

क्षुद्राणामिति । प्रियसखस्य सुग्रीवस्य साहसात् रीणा शून्या सा न भवतीत्यरीणा । अरीणा रक्षा यस्याः सा तथा । विद्यमानरक्षेत्यर्थः । ताम् ॥ ४ ॥

मन्देह इति । इह (देहदादौ दवः वनाग्निरिवेत्युपमा ?) । सन्देहः संशयः अपोह्यः त्याज्यः । त्वयेत्यर्थः । सन्धिं कर्तुमिच्छा सन्धित्सा यदि तर्हि वद । अथवा योद्‌धुमिच्छा युयुत्सा यदि तर्हि वद ॥ ५ ॥

कस्त्वमिति । खलानां दुष्टानां बलभङ्गं शक्तिनाशं ददातीति तथा । नाश्रौषं नाकर्णयम् । परिचितिः परिचयः । दोर्मूले कक्षे । स्व भवावः । वर्तमानसामीप्याल्लट् ॥ ६ ॥

भीमत्वादिति । कुतः कस्मात् भीमत्वात् जानकीं सीतां अमुष्णाः मुष्णासि स्म । त्वं अर्थ्यां अर्थादनपेतां गां वाचं शृणु निशमय । सः प्रसिद्धो विभीषणः मे सखा । भवतीति शेषः । अहं समिति युद्धे तव सामर्थ्यं बोद्‌धुं कामो यस्य स तथा सन् अस्मि । एवं इत्थं रामस्त्वामाह ॥ ७ ॥

इतीति । इति उक्तप्रकारेण उक्तीनां वाचां प्रतिवचनात् उत्तरेभ्यः इत्यर्थः । जातावेकवचनम् । वक्तुं योग्यं वाच्यम् । नीतिसहितं वच इत्यर्थः । अनूक्तं अनूदितं वाच्यं यस्य स तथा ॥ ८ ॥

तद्वाचेति । तस्य अङ्गदस्य वाचा विदितः ज्ञातः विरोधिनः रावणस्य वीर्यदर्पः पराक्रमगर्वः येन स तथा । आजौ युद्धे ॥ ९ ॥

अद्वोरिति । एके प्लवङ्गाः केचिद्वानराः चत्वारि गोपुराणि चूर्णं रजः व्यधिषत विदधुः । अभाङ्क्षुः बभञ्जुः । तव वाचा कृतः बहुविप्लवः बहुनाशो यैस्ते तथा सन्तः बभूवुरिति शेषः ॥ १० ॥

विध्वस्तामिति । विध्वस्तां वानरैर्विनाशितामित्यर्थः । उच्चैर्वृत्तानि वर्तुलानि अरुणानि नयनानि यस्य स तथा । तेन रावणेन निरीताः निर्गताः अकृषत चक्रुः ॥ ११ ॥

सदिति । सद्भिः कोणैः वीणादिवादनैः । 'कोणो वीणादिवादनम्' इत्यमरः । प्रहतानां ताडितानां गभीराणां भूरिभेरीणां वहुदुन्दुभीनां निर्घोषैः शब्दैः बधिरिता बधिरीकृता दिग्गजाः यस्मिंस्तत्तथा । युगान्तकल्पः प्रलयसदृशः प्रक्षोभः प्रकर्षेण चलनं यस्मिंस्तत्तथा ॥ १२ ॥

(३९)

शताङ्गेति । शताङ्गा रथाः मतङ्गाः गजाः तुरङ्गाः अश्वाः पत्तयः पदाताः ताः । युधि युद्धे ॥ १ ॥

निहत्येति । सन्ति अस्त्रशस्त्राणि यस्मिंस्तत्तथा तस्मिन् । तत्र युद्धे विहस्य रथा गजाश्च वाहा अश्वाश्च तानारुह्य स्वसैन्यस्य आत्मसेनायाः अपि चत्वारि रथतुरगपदातयः अङ्गानि यस्य तत् चतुरङ्गं तस्य भावः चातुरङ्ग्यं व्यधुः चक्रुः ॥ २ ॥

असृक्पेति । असृक्पशाखामृगाणां राक्षसवानराणां युद्ध एव रङ्गे पांसुभरे परागपटले विसृत्वरे व्याप्ते सति योधेषु भटेषु अदृक्प्रचारात् दृष्टिसञ्चाराभावात् अवशेषु अस्वतन्त्रेषु अरुणैः असृक्प्रवाहैः रक्तनिर्झरैः उदीये उदितम् । भावे लिट् ॥ ३ ॥

कबन्धमिति । वलीयसां अतिशयेन बलवतां वः ऊर्ध्वं प्रसृतं व्याप्तं कबन्धं उदकम् । 'कबन्धमुदकं पाथः' इत्यमरः । उदकसंज्ञासञ्ज्ञेत्यर्थः । अस्माकं अन्तं नाशं सद्यःफलं अविलम्बफलं ह्येव चबन्ध अजनयदित्यर्थः । इति इत्थं आशरौघाः राक्षससङ्घाः वलीमुखौघान् वानरसङ्घान् सलीलं यथा तथा अब्रुवत अवदन् ॥ ४ ॥

बलेति । क्षणदाचरौघाः राक्षससङ्घाः बलक्षयेण बलनाशेन विपक्षस्य शत्रोः तिर्यक् गतिर्येषां ते तथा । विपक्षानभिमुखगतय इत्यर्थः । स्वामिनं गता स्वामिगता । 'द्वितीया' इत्यादिना समासः । गुणानां क्षतिः क्षयः गुणक्षतिः भटानां स्यात् । भटसम्बन्धिनी स्यादित्यर्थः । षष्ठ्याः सम्बन्धार्थकत्वात् । दारुणि काष्ठे घुणानां कीटविशेषाणां क्षतिः । दोषणि दोषे स्यात् । 'पद्दन्' इत्यादिना दोषशब्दस्य दोषन्नादेशः । दोषशब्दस्य दोषन्नादेश इति काशिकायामुक्तम् ॥ ५ ॥

दिनमिति । अये हे स्वामिन्, सभूषाः साभरणाः दिवि आकाशे योषाः वीक्ष्य विहिताभिलाषाः मृतावशेषाः द्वये । ये वानरराक्षसजातय इत्यर्थः । ते भटा योधाः दिनं दिवसं नियुध्यापि पुनर्दोषा रजन्यां न व्यरमन् न विराममगच्छन् । 'दोषा च नक्तञ्च रजनाविति' इत्यमरः ॥ ६ ॥

मनोरथस्येति । मनोरथस्येवेत्युपमा । तद्वदतिवेगवत इत्यर्थः । महेन्द्रस्य इन्द्रस्य पौत्रात् पुत्रस्य पुत्रात् । अङ्गदादित्यर्थः । अहिमयैः सर्परूपैः भवन्तौ त्वां लक्ष्मणञ्च ननाह बबन्ध ॥ ७ ॥

परैरिति । दुराशयो दुष्टबुद्धिः राक्षसराट् रावणः परैः अन्यैः असंहार्यतमान् । रोद्धुमशक्यतमानित्यर्थः । महात्मान् नाम लक्ष्मणस्य चेत्यर्थः पुत्रात् परान् अन्यान् युद्धकुशलानित्यर्थः । परेतान् मृतान् अवबुध्य ज्ञात्वा स्मराधिविनाशार्थं कामपीडापक्रमाय एकमुपायमपश्यत् ॥ ८ ॥

रण इति । धनेशस्य वैश्रवणस्य यानेन वाहनेन । पुष्पकेणेत्यर्थः । सह चरन्तीभिरिति शेषः । आशरीभिः राक्षसीभिः भवान् रणे शयानः सन् अवेक्षि वीक्षितः । दशाननोक्त्या रावणगिरा जनकेन्द्रपुत्र्या सीतया दशाननः रावणः अवापि च । इतीति शेषः । वाक् अतीता धृता ॥ ९ ॥

प्रमेति । प्रणीता प्रशस्ता समानशोकेन तुल्यदुःखेन विमानस्य सप्तभूमिकसद्मनः राज्ञा प्रभुणा । विभीषणेनेत्यर्थः ।

विमानोऽस्त्री देवयाने सप्तभूमिकसद्मनि ।

इति नानार्थरत्नमाला । उपनीता समीपं प्रापिता । त्रिजटा नाम राक्षसी । भ्रमापनीतिप्रवणैः भ्रमापनयननिपुणैः प्रणामपूर्वैः नमस्कारपुरस्सरैः वचोभिः सीतां जिजीव । जीवयामासेत्यर्थः । अन्तर्भूतण्यर्थोऽयम् ॥ १० ॥

अथेति । भुजगास्त्रस्य नागास्त्रस्य शक्तिमनुगृह्णन् । स्वीकुर्वन्नित्यर्थः । त्वं तप्तः सन्तप्तः, उदधौ समुद्रे अवगाढः स्नातः इवेत्युपमा । ततः रणभूमेः उत्तरीतुं उत्थितुं ऐच्छः ॥ ११ ॥

(१०)

अपीति । पाक्षिकजीवितः सन्दिग्धजीवित इत्यर्थः । विद्विषं शत्रुम् । रावणमित्यर्थः । अवलोप्तुं हन्तुमित्यर्थः ॥ १ ॥

प्लवगेति । प्लवगर्षभस्य सुग्रीवस्य भीमगर्जितश्रवणात् भयङ्कराट्टहासनिशमनात् उद्यद्भयस्य उत्पन्नभीतेः रावणस्याज्ञया यमस्य शासनतः आज्ञया । मरणकालस्यासन्नत्वाच्चेत्यर्थः । नैर्ऋताः राक्षसाः ॥ २ ॥

प्रथमामिति । तदन्तरे तत्समये बालिसुतात् अङ्गदात् ॥ ३ ॥

प्रथित इति । प्रथितः प्रसिद्धः नक्तञ्चरसैन्यस्य नायकः नेता । अधुनीत कम्पयामास ॥ ४ ॥

पृतनेति । नानामुखं नानारम्भं यथा तथा । उद्यतीं उत्पन्नां रुषं कोपं विषवत् विषमिव (द्विषि) शत्रौ ॥ ५ ॥

परिपृष्टेति । त्वं परिपृष्टेन विभीषणेन ईरितं उक्तं प्रथितेन प्रसिद्धेन प्राभवेन प्रभुत्वेन युक्तं वैभवं यस्य स तथा तं । अभिमुखं तं रावणं पुरतः अग्रे निरीक्ष्य दृष्ट्वा परितोषादुद्धतरोमाञ्च भणीति तथा अभूः ॥ ६ ॥

कपिसैन्येति । कुपितः विभीषणः कपिसैन्यस्य विभीषणे विशेषेण भयजनके उद्यतं उद्युक्तम् । रावणमित्यर्थः । अभ्येत्य प्राप्य अनमत् नमश्चकार । त्वं विनीतवत् विनयान्वित इव प्रभुं उपयाहि । इदमिति शेषः । विफलं अफलं च इति अभाषत । कोपातिशयाद्द्विरुक्तिः ॥ ७ ॥

श्रुतीति । प्लवगैः वानरैः सह प्रतियुध्य युद्धं कृत्वा श्रुतीनां श्रोत्राणां दृशां नेत्राणाञ्च लवैः लेशैः लुब्धं लोमं मांसं उद्धृतं गर्विष्ठं अग्रजं ज्येष्ठं प्रतिरोद्धुं मनो यस्य स तथा । विभीषणः हनूमता प्रतिषिद्धो निवारितः सन् (न्यवर्तत ? न्यवृतत्) विवृतोऽभूत् ॥ ८ ॥

अनिलेति । अनिलानलभानुजैः हनूमत्सुषेणसुग्रीवैः सह । आजेर्जायत इति तथा ताम् । ग्लानिं ओजसा प्रतापेन जयन् ते अनुजेन लक्ष्मणेन जितः । रावण इत्यर्थः । व्रणेभ्यो जायत इति व्रणजम् । असृक् रक्तम् । व्रणजं च तत् असृक् च व्रणजासृक् । भुजशक्तिं अपि असृजत् त्यक्तवान् ॥ ९ ॥

स खल इति । खलः पापः सः रावणः अथ भवत योधितः विकलानि ऊनानि अखिलानि साधनानि युद्धोपकरणानि यस्य स तथा सन् सुखेषु लग्नः लीनः ईषदमर्षः यस्मिन् कर्मणि तत्तथा ययौ । सुखलब्ध्यै सुखलाभाय ॥ १० ॥

(४१)

त्वद्बाणेभ्य इति । सः रावणः अवरजं अनुजं कुम्भकर्णं बोधयन् प्रबोधनं कुर्वन् तद्बाहुच्छायया कुम्भकर्णस्य करच्छायया अन्तः मनसि दवथुं ऊष्माणं उपशमय्य विनाश्य पुत्रेण इन्द्रजिता सार्धं आस्त । कल्पान्ते प्रलये उन्निद्रस्य जाग्रतः रुद्रस्य प्रतिभटं सदृश-मित्यर्थः, वपुः शरीरं यस्य स तथा तेन शूलिना शूलवता तेन कुम्भ-कर्णेन कपीनां या दुर्बाधा तेने सा तपान्ते ग्रीष्मावसाने पादपानां अशनिः मेघज्योतिः अजनि ॥ १ ॥

पत्य इति । हनूमान् शाखामृगाणां पत्ये सुग्रीवाय प्रहितं प्रयुक्तम् । सुग्रीवं हन्तुं प्रयुक्तमित्यर्थः । 'क्रियार्थोपपद' इत्यादिना चतुर्थी । रूक्षं शूलं प्रेक्ष्य मध्ये गृह्णन् सन् गरुडः अहिं सर्पमिवेत्युपमा । इक्षुभञ्जं बभञ्ज । इक्षुमिव बभञ्जेत्यर्थः । 'उपमाने कर्मणि च' इति णमुल् । 'कषादिषु यथाविध्यनुप्रयोगः' इति अनुप्रयोगः । तेन सुग्रीवेण स्वस्य आत्मनः सुतरां मुखविकृतिं मुखविकारं लम्भितः प्रापितः ॥ २ ॥

कीशेति । त्वच्छरः तव शरः । कीशानां वानराणां क्रीडाद्रिः क्रीडापर्वतः । सुवेल इत्यर्थः । स इव मूर्तिः शरीरं यस्य स तथा । यद्वा तस्य मूर्तिः काठिन्यमिव मूर्तिर्यस्य स तथा । 'मूर्तिः काठिन्यका-ययोः' इत्यमरः । निजरुधिरेणैव सुरया मद्येन क्षीबा मत्ता धीः बुद्धि-र्यस्य स तथा । नीचः कुम्भकर्ण इत्यर्थः । युधि युद्धे करचरणे निकृत्ते खण्डिते सति निष्पतन् उत्पतंश्च स्वान् स्वकीयान् परान् शत्रून् खादन् भक्षयन् त्वच्छरः तव शरः आशु शीघ्रं स्वप्नक् निद्रालु गुरुणा रावणेन कथमपि बोधितः अयं कुम्भकर्णः स्वपतु इति दीर्घ-दीर्घं आसुष्वपत् मारयामास ॥ ३ ॥

विध्वस्त इति । तेषां देवान्तकाद्यानां पितृव्येन पितृभ्रात्रा प्रयातं अध्वानं मार्गं बलपतिभिः सेनापतिभिः प्रेतलोकं प्रेषिताः मारिता इत्यर्थः ॥ ४ ॥

तावदिति । मघोन इन्द्रस्य जेता । मेघनाद इत्यर्थः । रोरुद्यमानं विशेषेण रोदनं कुर्वन्तं पितरं रावणं अनुनयन् अभ्यनुज्ञाप्य पितुरनुज्ञामादायेत्यर्थः । वैवश्यं विवशतां प्रापयन् । व्यवसितमनसां विवेकिनामित्यर्थः । व्याजमार्गे विवेकः बुद्धिः कः । निस्सार एवेत्यर्थः ॥ ५ ॥

आपन्नाविति । आपन्नौ आपत्प्राप्तौ अरिपुरुषेषु विषये अलोलं सालातं साङ्गारं सैन्यं ययोस्तौ तथा । युवां नानाविधां बाधां चक्रथुः ॥ ६ ॥

कुम्भ इति । रावणिमिन्द्रजितं च अजिघांसः हन्तुमैच्छः । सः रावणिः अभिचारं विधित्सुः विधातुमिच्छुः सन् तस्य रावणेर्नयाय सज्जेन सन्नद्धेन अनुजेन सह मन्युं कोपं अमुच ॥ ७ ॥

पौलस्त्येति । पौलस्त्येन आवेदितः ज्ञापितः अध्वा मार्गो यस्य स तथा । भापयन् भयं प्रापयन् । आञ्जनेयं अञ्जनापुत्रं वाहीकृत्य । हनुमत्स्कन्धमारुह्येत्यर्थः । निकुम्भिलायां भवं नैकुम्भिकं कर्म विगतिं विगमम् । नाशमित्यर्थः । उपनयन् प्रापयन् सः अनुजः लक्ष्मणः स्वं पितृव्यं विभीषणं निन्दन्तम् । राज्ञा रावणेन सह युध्यतीति तथा । एनं कीशवृन्दं वानरसङ्घं भिन्दन्तं बलरिपुजयिनं इन्द्रजितं प्रत्यरुन्ध प्रतिरुद्धवान् ॥ ८ ॥

अस्त्रेति । द्विः द्विवारं विरथं अरथं आधाय कृत्वा युद्धातिदग्धं मेघनादम् । अनुचरैः अमरैः च ईड्यमानः स्तुत्यमानः त्वत्सविधं प्रत्यावृतत् प्रत्यागमत् ॥ ९ ॥

न त्वेति । अनुशयः पश्चात्तापोऽस्यास्तीति अनुशयी त्वं दशमुखजस्य इन्द्रजितो वधात् निग्रहात् स्वं स्वकीयं ज्योतिः तेजः स्मृत्वा अस्थाः तस्थिथ ॥ १० ॥

(४२)

यो वेति । पापानामेव विषपादपानां विषवृक्षाणां पङ्करूपः पापकर्तेत्यर्थः । यः शूर्पणखया अवापि प्राप्तः यः निजचेतसा च अवापि दावे वने अभिपत्तिः प्रतिपत्तिः यस्य स तथा । 'वनवन्यानलौ दावदवौ' इति नानार्थरत्नमाला । स एवाशनिरिति व्यस्तरूपकम् । तदा तस्मिन् काले उन्नतं दशाननमनोरथं दैवान्न ददाह ॥ १ ॥

त्वद्दारेति । तव दाराणां मारणे दृढीकृतः निश्चयः यस्य स तथा। असौ रावणः भृत्योदितैः भृत्यवाक्यैः विचारमार्गे अवततार । उद्दामायाः उन्नतायाः पुत्रविपदः पुत्रमरणादित्यर्थः । उत्थितः एष शोकः विद्वेषिणि शत्रौ विषये रोषस्य परिपोषः वृद्धिः स एव वेष इति व्यस्तरूपकम् । तमियेष प्राप ॥ २ ॥

सदिति । सन्तः सादिनः अश्वारोहाः यस्मिंस्तत्तथा । 'अश्वारोहास्तु सादिनः' इत्यमरः । सन्त्यो रथिकानां संहतयः राजयश्च यस्मिंस्तत्तथा । सन्तो निषादिनो यस्मिंस्तत्तथा । 'हस्त्यारोहा निषादिनः' इत्यमरः । मौलं बलं मूलबलं च । मोघेतरान् अमोघान् आशुगान् शरान् किरति वर्षतीति तथा । त्वं अर्कः सूर्यः नीहारं तुषारमिवेत्युपमा । निरशेषयः निश्शेषमकरोः ॥ ३ ॥

अन्येद्युरिति । जन्यं युद्धं अर्थयतीति तथा तेन । 'युद्धमायोधनं जन्यम्' इत्यमरः । दशकन्धरेण रावणेन कन्याकुमारतरुणीमयः कन्याकुमारतरुणीरूपः पौरसङ्घः यस्यां सा तथा ताम्। लङ्कां विहाय त्यक्त्वा बहिरगामि गतम् । 'गम्लृ गतौ' इति धातोः भावे लुङ् ॥ ४ ॥

सुग्रीवेति । प्रक्षीणकल्पं प्रक्षीणप्रायम् । 'ईषदसमाप्तौ कल्पप्' इति कल्पप्प्रत्ययः । व्यग्रः आकुलः । 'व्यग्रो व्यापृत आकुले' इति नानार्थरत्नमाला । कपिवाहिनीं वानरसैन्यं विशिखैः शरैः बिभेद विदारितवान् ॥ ५ ॥

स्वेति । स्वभ्रात्रा विभीषणेन भग्ना रथवाजिनो यस्य स तथा । तस्य भावः तत्ता । तया कुप्यन् कोपं गच्छन् लक्ष्मणस्य शरेण अर्दिता शाता तीक्ष्णाग्रा शक्तिर्यस्य स तथा । दशास्यः रावणः बभ्राम ॥ ६ ॥

आलोक्येति । असुहृदा रावणेन प्रसक्ते आरब्धे आशंसिते संस्तुते समरे युद्धे अचेतनवत् मृतवत् शयानं आलोक्य दृष्ट्वा । भिषजि वैद्ये । 'भिषग्वैद्यश्चिकित्सकः' इत्यमरः । हृदयस्य तक्षकं तनूकरणम् । हृदयच्छिदमित्यर्थः । अमुचः अक्षिपः ॥ ७ ॥

त्वदिति । वपुषि शरीरे रोषेणैव विषेण उपदिग्धैः उपलिप्तैः त्वत्पत्रिभिः त्वच्छरैः उद्बद्धवेपथुः निबद्धकम्पः रजनीचरेन्द्रः रावणः

दिविषदां देवानां विस्मापकः विस्मयजनकः । सहजं लक्ष्मणं जुगोप रक्षितवान् ॥ ८ ॥

किमिति । अद्य इदानीम् । अर्धे अर्धभागे गते नष्टे सति । इति विलापिनस्ते । त्वयि विलापिनीत्यर्थः । प्राग्वत् पूर्ववत् ॥ ९ ॥

तस्मादिति । तस्मात् परमौषधिपर्वतात् । सशल्यं विशल्यं करोतीति विशल्यकरणीम् । मृतं जीवयतीति मृतजीवनीम् । सन्धानं करोतीति सन्धानकारिकाञ्च । सवर्णं करोतीति सवर्णकरीञ्च । गृह्णन् सुषेणः त्वदीयं अनुजं लक्ष्मणं स्वस्थं विदधे उल्लाघं अकृत । सः लक्ष्मणः निस्तुषेण गुरुणेत्यर्थः । भुजबलेन प्रोत्तस्थिवान् प्रोदतिष्ठत् ॥ १० ॥

मन्त्रेति । त्वं मण्डोदरीं विधवां विधातुं चकमिषे । रावणं हन्तुं ऐच्छ इत्यर्थः ॥ ११ ॥

(४३)

अदान्तेति । दान्तः दमयुक्तः । स न भवतीत्यदान्तः । शतक्रतोः इन्द्रस्य रथं अधिरूढवान् असि ॥ १ ॥

उभाविति । गभीरस्य वैरार्णवस्य पारलम्भकं पारप्रापकम् । अत्यन्तवैरजनकमित्यर्थः । नुतं स्तुतं रणं युद्धं व्यातनुतं अकुर्वतम् ॥ २ ॥

सतोरण इति । सतोः वां युवयोः रणे नभोङ्गणे आकाशाजिरे । 'अङ्गणं चत्वराजिरे' इत्यमरः । बाणगणैः सतोरणे सति अवलोककारणात् दर्शनरूपकारणात् । अवलोकार्थमित्यर्थः । उडुराजशेखरः शिवः उमया पार्वत्या सहोमयागात् रजतमयात् पर्वतात् अगात् प्रापत् । देवतागणोऽप्यगात् ॥ ३ ॥

मिथ इति । मिथः अन्योन्यं तनूतक्षणेभ्यः शरीरविदारणेभ्यः रक्षणाय उद्यमैः उत्साहैः हेतुभिः उदस्तानां उत्क्षिप्तानां शस्त्राणां पृषत्कैः शरैः कर्तनैः मण्डनैः जयैषिणोः जयेच्छ्वोः युवयोः वां अहःसप्तकं दिवससप्तकम् । अत्यन्तसंयोगे द्वितीयेयम् । अभूतपूर्वं रणमभूत् ॥ ४ ॥

गतेति । गतानुयाते गमनानुगमने आगतैः प्राप्तैः योधनक्रमैः युद्धक्रमैः । त्वमैव इत्वरी । 'इत्वर्यसती कुलटेत्यपि' इत्यमरः । विजहत्

त्यजन् । 'इण्नशिजिसर्त्तिभ्यः क्वरप्' इति क्वरपि 'टिड्ढाणञ्' इत्यादिना ङीपि त्वरेत्वरीमिति रूपम् । द्विपाङ्क्तिबाहोः विंशत्करस्य अरेः रावणस्य बलदेहयोः सैन्यशरीरयोः अङ्गे अवयवे विभङ्गं विशेषेण भञ्जनं व्यधात् अकरोत् ॥ ५ ॥

छवीरिति । यतः यस्मात् अमानुषीः दिव्याः अमेयाः मातुमशक्याः छवीः शोभाः प्रवपन् रोपयन् स्वयं आत्मना प्रवीरलक्ष्म्याः प्रणयान्वितः भवान् रणे युद्धे दवीयसीनां अतिशयेन दूरस्थानां अपि देवतादृशां नवीनं अमृतं आसीत् ॥ ६ ॥

समितीति । समिति युद्धे अगस्त्येन उक्तस्य रविस्तवस्य आदित्यहृदयस्य ग्रहात् ग्रहणात् प्रमर्द्यः प्रकर्षेण मर्दितुं शक्यः मोहप्रसरद्गभीरिमा गाम्भीर्यं यस्य स तथा । फलं गृह्णातीति फलेग्राहिं स्वमर्त्यतां कर्तुमनाः । 'फलेग्रहिरात्मम्भरिश्च' इति निपातनात् एदन्तत्वमपि ॥ ७ ॥

अनेकश इति । रावणं नवाननं विधाय अमुं रावणं पञ्चतां मृत्युं नेतुं प्रापयितुं इयेष ॥ ८ ॥

तत इति । द्वौ पादौ यस्य सः द्विपात् । मनुष्य इत्यर्थः । हरिः सिंहः । शैलतटात् द्विपं गजं यथा ॥ ९ ॥

अथेति । अतन्द्रधीः सोत्साहबुद्धिः । त्वं सुमनोभिवर्षिभिः पुष्पाभिवर्षिभिः सुमनोमहर्षिभिः देवैः महर्षिभिश्च स्तुतोऽसि ॥ १० ॥

22. The use of *camphor* in *Tāmbūla* is mentioned in the drama *Mṛcchakaṭika* (ed. by H. M. Sastri, N. S. Press, Bombay, 1910).

Page 105 (Act IV) —

"विदूषकः — दीयते गणिकाकामुकयोः सकर्पूरं ताम्बूलम् ।"

The *Nandipurāṇa* refers to *camphor-boxes* and *Tāmbūla boxes* :

"कर्पूरादेश्च भाण्डानि ताम्बूलायतनं तथा ।"

(See 1547 of the *Nirnayasindhu*, Chowkhamba Series, Benares, 1897, where *Nandipurāṇa* is quoted.)

The *Saundaryalaharī* (ed. Adyar, 1937, p. 198) of Śaṅkarācārya (c. A. D. 800) refers to *Tāmbūla* and *camphor* (karpūra) as follows :

"विशाखेन्द्रोपेन्द्रैः शशिविशदकर्पूरशकला

विलीयन्ते मातस्तव वदनताम्बूलकबलाः ॥"

(v. 65)

In the foregoing scanty notes I have tried to record documentary evidence about the use of *Tāmbūla* outside India from c. A. D. 650 onwards in Sumatra, Java, Maldive Islands, Nicobar Islands, South Arabia etc. This evidence is in harmony with the view of MM. Dr. P. V. Kane in his *History of Dharmaśāstra* (B. O R. Inst., Poona, 1941) Vol. II, p. 734: – "*Tāmbūla* was probably introduced sometime before or about the beginning of the Christian era in South India and then spread northwards."

Dr. Kane states that *Tāmbūla* is not mentioned in ancient *Gṛhyasūtras* (p. 734), though there are references to *Tāmbūla* in *Laghuhārīta*, *Laghvāśvalāyana*, *Varāhamihira*, *Auśanasa*, *Raghuvaṁśa*, (VI. 64), *Kāmasūtra* I. 4, 16 etc. (p. 734).

My friend Dr. V. S. Agrawala thinks that "*Tāmbūla* came into vogue somewhere about the early Gupta period. As a result of India's cultural contact with the Eastern Islands[23] we came to be acquainted with the Tāmbūla leaf".

These remarks also get supported by the evidence collected by me so far.

23. The first colonisation of the Hindus in Malayasia goes back to the 1st or 2nd century A. D. and reaches its high-water mark of glory and splendour towards the end of the 7th century A. D. (vide p. 138 of Vol. II of R. C Majumdar's *Suvarṇadvīpa*, Dacca, 1937). Speaking of the Hindu civilization in *Suvarṇadvīpa* during this period of 500/600 years, Dr. Majumdar refers to the use of betel as a custom of *Ka-la* (Keddah):

"The following customs of *Ka-la* referred to by the Chinese are also Indian in origin (See page 122 of '*Notes on Malay Archipelago and Malacca compiled from Chinese Sources*' by W. P. Groeneveldt, V. B. G Vol. XXXIX, Part I (Batavia, 1877). When they marry they give no other presents than *arecanuts*, sometimes as many as two hundred trays" etc.

MANUSCRIPTS NOTICES AND STUDIES

XII

THE SUBHADRĀHARAṆAKĀVYA OF NĀRĀYAṆA WITH HIS OWN COMMENTARY

BY

S. VENKITASUBRAMONIA IYER.

The *Subhadrāharaṇa* is a *mahākāvya* in twenty cantos written by Nārāyaṇa of Kerala dealing with the story of Arjuna's marriage with Subhadrā and forming an illustrative treatise of the grammar of Pāṇini and hence belonging to the type of *Vyākaraṇakāvyas* represented by *Bhaṭṭikāvya*, *Rāvaṇārjunīya* and *Vāsudevavijaya*.

There are several manuscripts of the work in this Library.

Text:

(1) No. TM 217 of the Curator's collection, a complete paper manuscript clearly written in Malayalam script.

(2) No. C 1877 of the same collection, an old and slightly damaged palm-leaf manuscript written in Malayalam script extending almost up to the end of the work.

(3) No. 684 of the University collection, a palm-leaf manuscript in very good condition beautifully written in Malayalam script and extending up to a portion of the 15th sarga.

(4) No. C 2500 of the Curator's collection, an old palm-leaf manuscript legibly written in Malayalam script and extending upto a portion of the 15th canto.

(5) No. 1168 of the University collection, an old palm-leaf manuscript in fairly good condition comprising the text from the middle of the 16th to a portion of the 20th canto.

There is also a Devanagari transcript of the work in this Library, No. 893 transcribed from C 1877.

The Trivandrum Palace Library contains two MSS., Nos. 2005 and 2006 both extending upto a portion of the 16th canto. The Government Oriental Manuscripts Library, Madras, possesses a MS., No. R 4303 comprising cantos 17 to 20.

Text and Commentary :

(6) No. TM. 218 of the Curator's collection, a paper manuscript written in Malayalam script comprising upto a portion of the 8th canto.

There are two MSS. in the Government Oriental Manuscripts Library, Madras, Nos. R 2720 and R 4823 both of which together comprise the text and commentary upto the end of the 16th canto. The Adyar Library, Madras, also has a MS. containing the text and commentary.

Commentary :

(7) L 1413 of the University collection, a palm-leaf manuscript in good condition neatly written in Malayalam script and containing the commentary upto a portion of the 16th canto.

There is also a MS. in the Palace Library, No. 2007 having the same extent.

The present account is mainly based on the MS. No. TM 217 for the text and L 1413 for the commentary.

The text begins :

मधुव्रताकारमुनीन्द्रवृन्द-
प्रपीतदानात्मरसप्रवाहम् ।
अनन्तमध्यादि परं महस्त-
न्महस्तिरूपं शरणं प्रपद्ये ॥ १ ॥

हारं सुधावर्णतनुस्तनाभ्या-
माबिभ्रती सेन्दुजटा त्रिनेत्रा ।
सपुस्तकाक्षस्रगभीष्टहस्ता
सरस्वती चेतसि भासतां नः ॥ १ ॥
... ...
... ...
मुनित्रयीपादभुवः परागा
मृजन्तु चेतोमुकुरं ममेमम् ।
वागर्थरूपा शिवयोस्तनुस्सा
यथोमयीह प्रतिबिम्बिता स्यात् ॥ ५ ॥
....
... ...
सुदुस्तरं व्याकरणाम्बुराशिं
मनस्तरित्रेण विगाह्य लब्धैः ।
सुशब्दरत्नै रचयामि हारं
काव्यं सुभद्राहरणाभिधानम् ॥ १० ॥
... ...
... ...
निर्लोपकण्ठाभरणाद्विनीताद्
यो ब्रह्मदत्तादजनि द्विजेन्द्रात् ।
रामोदयाचार्यपितृव्यचुञ्चु-
र्नारायणोऽसौ कविरस्य कर्ता ॥ १३ ॥
अगृह्यमाणं पुरुषैरबुद्धै-
र्बुद्धैरसूयाकलुषीकृतैश्च ।
मनीषिणो मत्सरमुक्तचित्ता-
नन्वेषते काव्यमिदं मदीयम् ॥ १४ ॥
बभूव भूमेरखिलावदातं
विभूषणं वारिधिमेखलायाः ।
धर्माकरं भूतिदमाश्रितानां
युधिष्ठिरो नाम नरेन्द्ररत्नम् ॥ १५ ॥

It ends :

अवरजैः प्रतिविन्ध्यपुरस्सरै-
द्रुपदजातनयैस्सहसैधत ।
पितृसमैः पितृतुल्यपराक्रमो
हरिकिशोरकयूथपलीलया ॥

विश्वामित्रस्य गोत्रे द्विजमणिरभवद् ब्रह्मदत्ताभिधानो
श्राद्धस्वाध्यायपूतः सकलगुणनिधिः शास्त्रवित्काव्यशौण्डः ।
अन्तेवासी विपश्चिद्द्विपहरिणभृतोर्जातवेदोऽष्टमूर्त्यो-
स्तत्सूनुः काव्यमेतद् व्यधित बुधमुदे ख्यातनारायणाख्यः ॥

इति ब्रह्मदत्ततनयनारायणविरचिते सुभद्राहरणे
अभिमन्युसम्भवो नाम विंशतिः सर्गः ।

The text comprises about 2200 verses, about half of which are in the *anuṣṭup* metre, distributed over twenty cantos, as observed before. The first two cantos describe the good government of Yudhiṣṭhira and the third describes Indraprastha, the capital. In the fourth the circumstances leading to Arjuna's undertaking the pilgrimage are detailed and in the fifth his meeting with sage Viśvāmitra. The sixth canto gives an account of his marriage with Ulūpi the Nāgakanyakā, and the birth of the son Irāvān. The next three cantos narrate Arjuna's arrival at Manalūrapura, the Pāṇḍya capital, and the reception accorded to him by the king Citravāhana, his meeting with the princess Citrāṅgadā and marriage with her and the birth of Babhruvāhana. The tenth canto describes the meeting between Arjuna and Vasiṣṭha, the eleventh his arrival at Dvārakā and meeting with Kṛṣṇa and the twelfth his sight of Subhadrā. Arjuna's disguise as a sage and the engagement of Subhadrā for attending on him are given in the thirteenth canto and his disclosure to Subhadrā of his identity and the marriage between them in the next. In the fifteenth canto we find the couple preparing for their departure and in the

sixteenth the advice given to them by Vasudeva and Devakī and Balabhadra's encounter with Arjuna. The next canto describes the fight between Arjuna and the Yādavas, Balabhadra's pacification in the end and the arrival of the whole party at Indraprastha. The eighteenth canto describes Arjuna's reception on his return to the capital. In the next canto we get Yudhiṣṭhira's praise of Kṛṣṇa, describing his exploits from the very birth till the marriage with Rukmiṇī. The last canto details Arjuna's enjoyments with Subhadrā and the birth of the son Abhimanyu.

The first canto and the latter half of the second are *prakīrṇakāṇḍas* and do not illustrate any particular section of grammar, but the first half of the second canto deals with *sannanta* roots. Cantos 3 to 6 are devoted to *Kṛt* and they respectively illustrate *sārvakālika*, *kālaviśeṣāśraya*, *bhāvakartṛkāraka* and *avyaya kṛts*. The next three cantos deal with *taddhita* and illustrate respectively *prāgdīvyatīyas*, *prāgvahatīyas* and *svārthikas*. The tenth canto illustrates *samāsa*. The next six cantos are devoted to *tiṅ* and they respectively illustrate *laṭ*, *luṅ*, *laṅ*, *liṭ*, *lṛṭ-luṭ-lṛṅ* and *liṅ-loṭ*. The last four cantos are called *prasannakāṇḍa* and do not form illustrations of any particular section of grammar.

The work closely conforms to the rules relating to a *mahākāvya*, though in its poetic quality it does not rank very high, the poet's freedom being to a considerable extent curtailed by the main purpose of the poem, namely the illustration of Pāṇini's rules or grammar. But the cantos where the poet is free from such restrictions, form better poetry than the rest.

A few passages may be cited for showing the nature of the kāvya.

(1) Some verses on Yudhiṣṭhira's reign :

चराचराणां समवायिहेतु-
पराणुभाजोऽसमवायिहेतून् ।

निमित्तहेतुत्वमितैस्तनूनां
जुगोप संयोगगुणान् स धर्मैः ॥
पद्योदितादूबिभ्यदमुष्य धाम्नो
न कश्चनोदायत मर्त्यलोके ।
नैर्ष्यत्परस्मै न दधावसूयां
चित्तेन दुद्रोह न वा चुकोप ॥

व्युत्पादितो रञ्जयतीति तस्मिन्
विचक्षणैः कैश्चन राजशब्दः ।
अन्यैः पुना राजत इत्युदीर्णे-
प्रजानुरागे विपुलप्रतापे ॥
सेन्द्राग्निसूर्यद्युतिरत्नतोग्र-
स्सुधांशुवारीशकुबेरकान्तिः ।
कविष्णुरुद्रादिविशेषकल्पो
जज्ञे न देवः क इति प्रजाभिः ॥

शास्त्रैर्निरासात्मभवं स दुःखं
पुरोहितैर्दैवभवं प्रजानाम् ।
भूतोद्भवञ्च स्वभुजोपमानै-
स्तेजस्विभिर्भ्रातृभिरात्तशस्त्रैः ॥

(I 70–74).

(ii) The Malaya mountain :

ततो दिदृक्षुः कलशोद्भवं मुनिं
जगाम पार्थो मलयं महीधरम् ।
उपेयिवानैक्षत सोऽधिमस्तकं
तमुद्वहन्तं सितमेघचन्दनम् ॥

वृतं भुजङ्गैरुपचन्दनं गतैः
सुचन्दनं दुर्दवपावकोष्मदम् ।
दधानमुद्यन्मणिकाञ्चनस्थली-
मरीचिभिर्निस्तिमिरं च सर्वतः ॥

अतिक्षपाफुल्लसरोजमण्डलै-
स्सरोभिरन्वीतमुपत्यकागतैः ।
कुरङ्गयूथैरनुयूथपं गतै-
र्युतं यथाकाममुपात्तशाड्वलैः ॥

(X. 1–3).

(iii) Arjuna's disclosure of his identity to Subhadrā :

एकदा तु प्रियालीभिः सविशेषं विभूषिता ।
रुक्मिणीसत्यभामोक्ता माधवीयाव फल्गुनम् ॥

सा विध्यन्ती तदापाङ्गैर्विषदिग्धैरिवेषुभिः ।
मनो विलोलयामास विजयस्य मनस्विनः ॥

उपवेश्य प्रियालापैरथ पार्श्वे धनञ्जयः ।
कथाभिरभिरामाभिः सविस्रम्भां चकार ताम् ॥

स तामथेत्थं पप्रच्छ कीदृक् तव मनो मयि ।
प्रसितं त्वयि चित्तं मे पार्थोऽहं पाण्डुनन्दनः ॥

इत्युच्यमाना सरसैरूढवेपथुकण्टकैः ।
जगाद त्वदधीनाहमिति सा पार्थमङ्गकैः ॥

स तामित्थमथोवाद त्याज्या लज्जा त्वयाधुना ।
दूनो यथाहं मारेण तथैव त्वमपि ध्रुवम् ॥

अचिरेण तदावाभ्यामन्योन्यप्राणरक्षणम् ।
प्रदानेनात्मनः कार्यं गान्धर्वोऽयं विधिः स्मृतः ॥

गान्धर्वविधिना होढे सोमसूनुरिलां बुधः ।
ययातिर्देवयानीं च दुष्यन्तश्च शकुन्तलाम् ॥

भ्रातुश्च तव कृष्णस्य प्रियं नौ सङ्गतं प्रिये ।
द्वीपे कृत्वोत्सवं तेन यत्नौ निर्मक्षिकं कृतम् ॥

अस्मिन्नवसरे तस्मात्त्वां गृहीत्वा मया द्रुतम् ।
पुरं पुरन्दरप्रख्यं प्राप्यं पृथुललोचने ॥

विस्रब्धया त्वया भाव्यं मन्दमन्दाशया ततः ।
दामोदरेऽनुकूले नौ सिद्धं सकलमीप्सितम् ॥

इत्युक्त्वा स सुभद्रायाः पाणिं जग्राह पाणिना ।
सरत्नकङ्कणश्रेणिमृदुताम्रलताङ्गुलिम् ॥

(XIV. 80—91)

The commentary commences as follows :

सुभद्राहरणं कृत्वा काव्यं व्याख्यातुमारभे ।
काव्यादौ वन्दिता एव आ नमस्कृत्य देवताः ॥ १ ॥

पदानामप्रसिद्धानां लक्षितानां स्वलक्षणैः ।
व्युत्पादनाभिरस्येदं व्याख्यानं समयोजनम् ॥ २ ॥

....

राज्यवर्मसमाचारवर्णनं पुरवर्णनम् ।
श्वेतवाहननिर्याणं विश्वामित्रविलोकनम् ॥ ८ ॥

उलूपीदर्शनं पाण्ड्यपुटभेदनवर्णनम् ।
दर्शनं चैत्रवाहिन्या विवाहोऽगस्त्यदर्शनम् ॥ ९ ॥

कृष्णफल्गुनसंयोगः सुभद्रापार्थदर्शनम् ।
स्थापनं यतिपार्थस्य सुभद्रापाणिपीडनम् ॥ १० ॥

प्रस्थानचिन्ता दम्पत्योर्दम्पत्योरनुशासनम् ।
पार्थमाधवसंग्रामः शक्रप्रस्थनिवेशनम् ॥ ११ ॥

वृष्णिपाण्डवसंयोगः पाण्डुपुत्रसुतोदयः ।
इति क्रमेण नामानि सर्गाणामिह विंशतेः ॥ १२ ॥

प्रकीर्णकाण्डं प्रथमोऽत्र सर्गो
मिश्रः सतावन्तयुतो द्वितीयः ।
काण्डं कृतां सर्गचतुष्कमूर्ध्वं
सर्गत्रयं तद्भितकाण्डमूर्ध्वम् ॥ १३ ॥

समासकाण्डं दशमस्तु सर्गः
सर्गा परे षट् तु तिङन्तकाण्डम् ।
ततः परं सर्गचतुष्टयं तु
प्रसन्नकाण्डं गुणभूषणाढ्यम् ॥ १४ ॥

प्रारिप्सितस्य काव्यस्याविघ्नपरिसमाप्तये प्रथनाय च गणपतिमभिवन्दते — मधुव्रतेति ।

The end (as seen in the Madras MS. R 4323) is as follows:

उत्क्रोशन्मणिकुण्डलावलिकरा गण्डस्खलत्कुण्डला
कौशेयोत्कलिता चलद्स्तनभरा वाहान् नुदन्ती शनैः ।
बद्धेर्ष्याप्रमदान् बलाच्युतगदान् भ्रातॄन् सुभद्रा युधे
सन्नद्धान् भगिनीं च तेऽपि ददृशुर्भ्रमभ्रुमिर्लोचनैः ॥

इह द्विविधं पदजातं सुबन्तं तिङन्तं च । अव्ययोपसर्गकर्मप्रवचनीयास्तु द्वैविध्यदर्शने सुबन्तेऽन्तर्भवन्ति । तत्रेह काव्ये तृतीयाद्यष्टसर्गी सुबन्तप्रधाना, एकादशादिषट्सर्गी तिङन्तप्रधाना । प्रकीर्णकाण्डं प्रथमं प्रसन्नकाण्डं च पश्चिममुभयसाधारणम् । सनाद्यन्तधातुभ्यः कृल्लकारोत्पत्तेः कृदन्तानां प्रातिपदिकत्वाल्लकाराणां च तिङ्विधानादिति षोडशसर्गीयम् ।

.... काव्यस्य विवृता मया ।
उत्तरां तु चतुस्सर्गीं व्याचक्षीरन् विचक्षणाः ॥

इदं काव्यं कृत्वा विवृतिमपि कर्तुं कृतधियो
मम स्यादुष्माकं सदसि कथमाहोपुरुषिका ।
तदेतं भारं नः शिरसि निदधे बर्धयत त-
द्गुणानत्राशेषानपनयत दोषांश्च .... ॥

इति सुभद्राहरणे सविवरणे षोडशः सर्गः ।

Here the lacuna in the beginning of the first śloka is restored as अथो द्वादशसर्गाणाम् in the Triennial Catalogue of MSS. in the Madras Government Oriental Manuscripts Library (Vol. V, Part i, p. 6360). But it is evidently a mistake as

can be seen from the colophon that follows. It must be षोडशसर्गाणां instead of द्वादशसर्गाणाम्. The commentator says that he has commented on the first sixteen cantos and that he is leaving the remaining cantos for others to comment upon, and his purpose being mainly to illustrate grammatical rules, it is not quite necessary for him to comment on the last four cantos.

The commentary on verse VI. 55 is cited below as an example :

कीदृशमिति पुरं वर्णयति —

पौंस्नेन जुष्टं माञ्जिष्ठहारिद्राम्बरधारिणा ।
लाक्षिकाङ्घ्रिप्रवालेन स्त्रैणेन परिभूषितम् ॥

पौंस्नेन पुंसां समूहेन परिभूषितम् । 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति समूहे नञ्स्नञौ । कीदृशा पौंस्नेन । माञ्जिष्ठहारिद्राम्बरधारिणा । मञ्जिष्ठया रक्तं हरिद्रया रक्तं च वसनं धारयता । मञ्जिष्ठाशब्दात् 'प्राग्दीव्यतोऽण्', हरिद्राशब्दात्तु 'हरिद्रामहारज(ता ? ना)भ्याम(ण् ? ञ्) वक्तव्यः' इत्य(ण् ? ञ्) 'तेन रक्तं रागात्' इत्यत्रार्थे । लाक्षिकाङ्घ्रिप्रवालेन स्त्रैणेनेति 'लाक्षारोचना-शकलकर्दमाट्ठक्' इति ठक् । 'ठस्येकः' । ननु शुक्लस्य वर्णान्तरापादने रञ्जेर्वर्तनात् अशुक्लं रक्तप्रत्ययेन न भवितव्यमिति कथमशुक्लानामङ्घ्रिप्रवालानां लाक्षिकत्वम् । एवं तर्हि लाक्षिकवस्त्रसादृश्यादभेदोपचारादङ्घ्रिप्रवालानि लाक्षिकान्युच्यन्ते यथा काषायौ गर्दभस्य कर्णौ, हारिद्रौ कुक्कुटस्य चरणा-वित्यदोषः । अतो लाक्षारसार्पणमन्तरेणापि निसर्गादेवारुणचरणकिसलयेनेत्युक्तं भवति ॥

The commentary contains over 5000 *granthas* and is fairly elaborate and clearly brings out both the sense and the grammatical importance of every verse.

The verses at the commencement and at the close of the commentary show that its author is the same as the author of the text, and from the verses at the beginning of the text and from its concluding verse we are able to know

certain details about him. He was by name Nārāyaṇa and was the son of Brahmadatta, the pupil of Jātavedas and Aṣṭamūrti. He belonged to the Viśvāmitra gotra and he had two paternal uncles Rāma and Udaya, who were also his preceptors. His family was residing on the banks of the river Bharatapuzha (*Nilā*) in Malabar.

Two views are current about the place to which Nārāyaṇa belonged. That he belonged to Tiruvegappura in Malabar and that he was a member of the famous group of *Eighteen-and-half-poets* in the court of Mānavikrama, the Zamorin of Calicut, is the earlier view. And since the date of this group of poets is the latter half of the 15th century A. D., our author also can be assigned to the same period. This date is in conformity with the fact that Melputtūr Nārāyaṇa Bhaṭṭatiri (1560 –1666 A. D.) has cited several passages from the *Subhadrāharaṇa* as illustrations in his *Prakriyāsarvasva*.

The second view is what seems to have been propounded by the late Mahakavi Ulloor S. Parameswara Aiyar[1] and followed by other scholars like Vatakkumkur Rajarajavarma[2]. According to this our author belonged to Kūṭallūr, the famous family of grammarians in Malabar. The Mahakavi appears to have based his opinion on the fact that the Kūṭallūr family belongs to Viśvāmitra gotra which is the gotra of Nārāyaṇa also. But this alone is not an adequate reason for taking him to be a member of Kūṭallūr, since this is not the only family in Kerala belonging to that gotra and since Kūṭallūr is several miles away from Bharatapuzha while Tiruvegapura is on the banks of that river. Moreover no member of the Kūṭallūr family is known to have been among the *Eighteen-and-half poets*.

1. vide *Vijñānadīpikā*, Part IV, p. 166.
2. *Keralīyasaṁskṛtasāhityacaritram*, Vol. I, p. 526.

Pandit E. V. Raman Namputiri has recently observed[3] that Nārāyaṇa, the author of *Subhadrāharaṇa*, can be identified with the Nārāyaṇācārya, the *guru* of Kākkaśśeri Damodara Bhaṭṭa, the author of the drama *Vasumatīvikrama* and a junior but prominent member among the *Eighteen-and-half-poets*. This view is based on the identity of Aśokapura in the drama with Tiruvegappura and on the fact that this Nārāyaṇa was engaged for teaching Kākkaśśeri by the Zamorin himself and that, therefore, he must have been in his court. It is quite possible that our author is identical with this Nārāyaṇācārya.

---

3. *Tantrasamuccaya with Malayalam commentary*, Part. III, Trivandrum Malayalam Series, 68, Introduction, p. 108.

Licence No. 644 dated 9-3-1949.

VOL. VI. NO. 3 JULY 1950

JOURNAL

OF THE

TRAVANCORE UNIVERSITY

ORIENTAL MANUSCRIPTS

LIBRARY

TRIVANDRUM



[Annual Subscription Rs. 4]

PRINTED AT THE S. V. G. PRESS
TRIVANDRUM.
1950

CONTENTS

॥ श्रीः ॥

अभिज्ञानशकुन्तलचर्चा

सारं यन्निगमस्य यत्क्रतुभुजामाहुः क्रतुं चाक्षुषं
यस्यायं शिवया शिवेन च पुनस्सम्यक् प्रयोगः कृतः ।
ब्रह्मास्वादसहोदरो रसविदां यस्मात् प्रमोदो महान्
यत्रार्थाः पुरुषस्य सन्ति सुलभास्तन्नाट्यमुत्कृष्यते ॥

कवीन्द्रोऽयं कालीपदयुगलनालीकविगल-
न्मधुस्रोतःकेलीनियतनिरताली विजयते ।
परिस्फूर्जद्वाणीरसभरितवेणीमधुरिमो-
न्मिषत्सूरिश्रेणिस्फुरितरमणीयेन यशसा ॥

गुणदोषविभागज्ञास्सदा गुणपरायणाः ।
सचेतसो निरीक्षन्तामिदं नाट्यनिरूपणम् ॥

इह खलु वाङ्मयेषु साहित्यानि निर्भरं स्वदन्ते, तत्रापि विचित्रप्रबन्धाः, तेष्वपि नाटकानि, नाटकेष्वपि शाकुन्तलादीनि । तदुक्तम्—

"नाटकीयैर्गुणैर्युक्ता[1] ये हरन्ति सतां मनः ।
क्व तेषां दृष्टमुत्थानं कालिदासकवेः कृतौ ॥
कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलम् ।
तत्रापि च चतुर्थोऽङ्को यत्र याति शकुन्तला ।"

---

१. Ms. नाटकै गुणै०.

इत्यादि ।

तत्र तावत् 'नान्द्यन्ते ततः प्रविशति सूत्रधारः' इत्ययं ग्रन्थः प्रथमश्लोकात् पूर्वं किमुपपद्यते उतानन्तरं, उभयथापि दर्शनात् संशयः । अनन्तरमुपपद्यते, पूर्वं चेत् प्रथमश्लोकस्य नान्दीत्वं न स्यात् । कथं नाम नान्द्या अन्ते नान्दी सम्भवेत् । प्रथमश्लोको नान्दी भवति । तथा हि बहुरूपकादिभिरनर्घराघवादिषु प्रथमश्लोकाः नान्दीत्वेन कथिताः । संवादितं च भरतवचनम्—

"सूत्रधारः पठेत्तत्र मध्यमं स्वरमाश्रितः ।
नान्दीं पदैर्द्वादशभिरष्टभिर्वाप्यलङ्कृताम् ॥"

इति ।

तत्र वीरचरिते[1] मालतीमाधवे चाष्टपदो नान्दीश्लोकः, अनर्घराघवे द्वादशपदः । सप्तपदापि नान्दीत्येके मन्यन्ते । तत्र वेणीसंहारे अष्टपदः वीणावासवदत्तायां च । बालरामायणे द्वाविंशतिपदः । एवंप्रथं[2] नान्दीत्वं भवति । अत्रोच्यते— इह तावदष्टपदत्वादिकस्य व्यभिचारो दृश्यते । तथा हि—विक्रमोर्वशीये पञ्चविंशतिपदः, मालविकाग्निमित्रे एकोनत्रिंशत्पदः, अस्मिन्नाटके पञ्चविंशतिपदः[3] । ननु 'नान्दीं पदैः' इत्यादौ पदमिति वाक्यमभिधीयेत । यदाहुः—

"न पदं पदमित्याहुर्वाक्यं हि पदमुच्यते"

इति । अतः शाकुन्तलादौ यद्वृत्तवाक्यानि सप्त तद्वृत्तवाक्यमेकमित्यष्टवाक्यत्वादष्टपदा नान्दी । तर्हि विक्रमोर्वश्यादौ कथं चतुष्पद्यपि नान्दी भवति । तदुक्तम्—

---

१. Ms. वीचरते.
२. Ms. प्रथनान्दीत्वं.
३. Ms. पञ्चविंशत्पदम्.

"षट्पद्यष्टपदी वापि द्विपदी वा चतुष्पदी ।
प्रयोक्तव्या भवेन्नान्दी तथा द्वादशपद्यपि ॥"

इति । उच्यते पदं वाक्यमिति न प्रसिद्धपदमेतत् । तदानीमपि मालतीमाधवादौ 'चूडापीडे'त्यादि नान्दी न स्यात्, एकवाक्यत्वात्, पदपक्षे तु 'या सृष्टिस्स्रष्टुराद्ये'त्यादि विषमपदत्वात् । अथ क्वचिद्वाक्यपक्ष आश्रीयते क्वचित् पदपक्षः, स्थितस्य गतिश्चिन्तनीया इति न्यायात् । एवं तर्हि प्रबोधचन्द्रोदयादिश्लोको न नान्दी स्यात् । अत्र खलु यद्वृत्तवाक्ये द्वे तद्वृत्तवाक्यमेकमिति त्रिवाक्यत्वात् त्रिपदत्वं; न च त्रिपदी नान्दीत्यास्थितः । पदान्यपि त्रयोविंशतित्वाद्विषमाणि । 'मध्याह्नार्कमरीचिकास्विवे'ति नैकं पदं, पयःपूरस्यैवोपमानत्वात् । उपमानेन हीवशब्दस्य 'इवेन विभक्त्यलोपः' इति समास उक्तः, नोपमानविशेषणेन । एवं धनञ्जयादिषु विषमवाक्यत्वं विषमपदत्वं च दृश्यते । तस्मादत्र पदवाक्यनियमो न प्रदर्शयितुं शक्यते ।

अथ चन्द्रनामाङ्कितश्लोको नान्दी । तदुक्तम् के(न)चित् 'नान्दी चावश्यं चन्द्रनामाङ्किता प्रयोक्तव्या इति कविसंप्रदायः' इति । एतदपि नास्ति, विक्रमोर्वशीयमालविकाग्निमित्रनागानन्दाद्युपक्रमे चन्द्रवाचकादर्शनात् ।

अथ [1]प्रतिपाद्येतिवृत्तसूचकेन रङ्गप्रसादनं कर्तव्यम् । तदुक्तम्—

"रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः ।
ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत् ॥"

इति । नैवं, मङ्गलश्लोकेनैव काव्यार्थसूचनं कर्तव्यमिति न नियमः, तथा लक्ष्येऽदर्शनात् । तस्माद्यादृशतादृशो मङ्गलश्लोको

1. Ms. प्रतिपाद्या इतिवृत्त०.

नान्दीत्युच्येत । भवत्वेवमिति चेत् कथमस्य नान्दीत्वमवधारयामः । ननु स्थापनादौ प्रयुज्यमानत्वादवधार्यताम् । तथा च नान्दी द्विविधा पूर्वरङ्गे प्रयोज्यैका स्थापनायामन्येति चेदसाधु[1], निर्मूलत्वात् । न खलु भरते स्थापनायां नान्दी प्रयोक्तव्येत्युक्तम्, नापि दशरूपकादौ; 'नान्दीं पदैर्द्वादशभिः' इति पूर्वरङ्गविधावेवोक्तम् । तत्रत्येन हि तत्रपदेन पूर्वरङ्गमध्योक्तध्रुवाप्रयोगः परामृश्यते न स्थापनारम्भः ।

अथ स्थापनादौ प्रयुज्यमानो यादृशतादृशो मङ्गलश्लोको नान्दीति । तत्र कोऽस्य प्रयोक्तेति वक्तव्यम् । न स्थापकः, अप्रविष्टत्वात् । अस्यावसाने खल्वस्य प्रवेशः कथ्यते । न च नेपथ्यगृहगतः कश्चित्; अस्मात् पूर्वं 'नेपथ्ये' इति ग्रन्थाभावात् । अभावेऽपि न युक्तिः, निर्मूलत्वात् । नापि सूत्रधारः तस्यात्र प्रवेशाकथनात्[2]; स हि पूर्वरङ्गस्यैव प्रयोक्ता न स्थापनायाः । ननु कविरस्य प्रयोक्ता भरतवत् । तदुक्तम् पूर्णसरस्वतिना अनर्घराघवव्याख्याने—"कविरिष्टदेवतानमस्काररूपं मङ्गलं करोति--निष्प्रत्यूहमित्यादि । अनेन नाटकारम्भविहितां द्वादशपदां नान्दीं कविः प्रयुङ्क्ते" इति । नाटकाभरणे चादावुक्तम्—"तत्रभवद्भिः कृष्णाचार्यमिश्रैः प्रबोधचन्द्रोदयं नाम नाटकं निरमायि, तत्रादौ नान्दीसपर्यां सम्पादयन् ब्रह्मात्मैकत्वं च संक्षेपतः प्रतिपादयन्मङ्गलं संपादयति" इति, पुनः "एवं तावत् परमेश्वरस्यानुस्मरणात् परिहृताशेषान्तरायस्तत्रभवान् नाटकारम्भं प्रतिजानीते" इति । तस्मात् कविर्नान्दीश्लोकं प्रयुङ्क्ते इति निर्धार्यते ।

तत्र ब्रूमः—नाटकाभरणकारस्य वचनं स्ववचनेनैव विरुद्धं य(तः) 'कविर्मङ्गलमाचरति' इति नान्दी शब्दात्मकत्वेनोक्ता, पुनः—

"नन्दी वृषो वृषाङ्कस्य रङ्गगोऽभून्नृत्यतः पुरा ।
अतस्तदाख्यया ना(न्दी) रङ्गपूजा प्रकीर्तिता ॥"

---

१. Ms. नेदसाधु.

२. Ms. प्रवेशाकथनात् .

इत्यादिना "सभ्यावर्जनरूपा सपर्ये"त्यन्तेन अर्थात्मकत्वेनोक्तत्वात् । किञ्च तत्र कविर्नाटकनिर्माणे प्रवृत्तः प्रथमं 'मह उपास्महे' इति ब्रूते उत लाजाञ्जलिप्रक्षिरणादिना रङ्गं पूजयतीति संशयो जायते । उभयमपि करोतीत्यतिनूतन उपन्यासः । रङ्गपूजायां हि सूत्रधारोऽधिकारी न कविः। पूर्णसरस्वतेरपि वचनं व्याहतम् । तथाहि अयं मालतीमाधवव्याख्याने 'स्थापनायामन्ये'त्यनेन स्थापकेन नान्दी प्रयोक्तव्या न कविना इत्यवोचत् । मुरारिनाटकव्याख्याने पुनः कविर्नान्दीं प्रयुङ्क्ते इत्यवोचत् । तदेतत् परस्परविरुद्धम् ।

ननु कविर्नाटकनिर्माणारम्भे मङ्गलमाचरतीत्ययमंशोऽत्र परिगृह्यते तद्विरुद्धोऽन्यः परित्यज्यते इति । यद्येवम् अस्मान्मङ्गलश्लोकादनन्तरं 'नाटकं क्रियते' इति प्रतिज्ञाग्रन्थेन भवितव्यम्, पुनः 'नान्द्यन्ते' इति । अथ सोऽर्थसिद्ध इति । तर्हि 'ततः प्रविशति सूत्रधारः' इत्येवालम्, न 'नान्द्यन्ते' इति ग्रहणे त्वन्यैव नान्दीति स्यात् ।

अथ सामर्थ्यादियं[1] कविप्रयुक्तैव नान्दीति सेत्स्यतीति चेत् तदा कवेर्मङ्गलश्लोकादनन्तरं 'स्थापकः प्रविशती'त्युक्तं भवति । तन्नाट्यशास्त्रविरुद्धम् । न खलु नाट्यशास्त्रे कविकर्तृकमङ्गलश्लोकपाठादनन्तरं स्थापकः प्रविशेदिति (नि)रदेशि । किन्तर्हि । रङ्गपूजानन्तरमेव । यथा—

"आश्रावणावसाने तु नान्दीं कृत्वा स सूत्रभृत् ।
पुनः प्रविश्य रङ्गं तु कुर्यात् प्रस्तावनां ततः ॥"

इति । यथा वा—

"पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते ।
प्रविश्य तद्वदपरः काव्यार्थं स्थापयेन्नटः ॥"

इति । किञ्च प्रथमश्लोकस्य कविकर्तृकत्वे स्थापकेन मङ्गलपाठो न

---

१. Ms. सामर्थ्यादिकं.

कृतः स्यात् । तन्न युक्तम् । स्थापकः प्रविश्य मङ्गलवाक्यं प्रयुज्य काव्यार्थं स्थापयेदिति स्थितेः । तदुक्तम्—

'कुर्याच्चानन्तरं तत्र देवब्राह्मणसंश्रयम् ।'

इत्यादि । अथ तदर्थसिद्धमिति चेन्न । मङ्गलाचरणस्यास्य शब्दसिद्धतयेष्यमाणत्वात् । किञ्च सूत्रधारवाक्यस्यैव रूढ्या नान्दीति व्यपदेशः, न कविवाक्यस्य । ननु कविर्नाटकारम्भे मङ्गलं मा स्मानुष्ठात् । काममनुतिष्ठतु, तत्तु बहिरेव इति ब्रूमः, अन्यथा विरोधात् । अपिच अस्य कविमङ्गलत्वे नियमो न स्यात् । कवयो हि प्रबन्धारम्भे बहिरप्यन्तरपि मङ्गलमनुतिष्ठन्ति । तदा क्वचिद् बहिरनुष्ठितम् इति स्थापनादौ मङ्गलस्यावश्यंभावोऽस्तमियात् । तच्च न युक्तमित्युक्तम् ।

एवं प्रयोक्त्रभावे महत्सङ्कटमापतति । तदा पुनरिदं वचनं वक्त्रभावे[1] न सम्पद्यते इत्यवश्यमस्य वक्ता कल्पनीयः । स तु न कविः, उक्तादेव विरोधात्; नापि सूत्रधारः, श्लोकस्य नान्दीत्वाभावात् । क्वचिदष्टपदत्वादिकमष्टवाक्यत्वादिकं वा काकतालीयम्, अन्यत्र विषमपदत्वस्य विषमवाक्यत्वस्य च दर्शनात् । अथ स्थापकोऽस्य प्रयोक्ता कल्पनीयः । स तु प्रकारोऽस्मात् श्लोकादनन्तरं 'नान्द्यन्ते ततः प्रविशति सूत्रधारः' इत्यस्य ग्रन्थस्य सन्निवेशे सति न घटते; पूर्वं तु चेत् घटते । तस्मात् पूर्वमेव सन्निवेशो भवितुमर्हति ।

एवं च सति शब्दरूपा वा रङ्गपूजारूपा वा नान्दी सूत्रधारेणैव प्रयुज्यते न स्थापकेन नापि कविनेति नाट्यशास्त्रानुरोधात् सम्पद्यते । कथं तर्हि नाटकादिश्लोका नान्दीत्युच्यन्ते । उपचारेणोच्यन्ते । यथा गुणाकृतिभ्यां सूत्रधारेण तुल्यत्वात् स्थापकस्सूत्रधार इत्युच्यते तथा मङ्गलात्मकेन नान्दीतुल्यत्वात् स्थापकश्लोको नान्दी-

---

1. Ms. वचनवक्त्रभावे.

त्युच्यते । अथवा मङ्गलश्लोकादनन्तरमेव 'नान्द्यन्ते'ग्रन्थस्य दर्शनं स्थिरं चेत्तत्रापि कथञ्चिदुपप(त्ति)रालोचनीया । इह खलु राजशेखरो बालरामायणान्तर्विहितसीतास्वयंवरनाटकारम्भे कृतं 'कर्पूर इव दग्धोऽपी'ति श्लोकं रावणमुखेन 'द्वादशपदेयं प्रवर्तिता नान्दी'त्यभ्यनन्दत् । बहुरूपकमिश्रैरपि अनर्घराघवादिश्लोको नान्दीत्वेनोक्तः वीरचरितादिश्च बालरामायणादिश्च । अतो नाटकेषु स्थापनाप्रमुखे नान्दी समस्तीति विज्ञायते । सा च मुख्या नान्दी, न त्वौपचारिकी, इयं द्वादशपदा इयमष्टपदा इयं समपदा इति तदुक्तेः । 'सूत्रधारः पठेत्तत्रे'ति संवादप्रदर्शनं तु नान्द्या द्वादशपदत्वादिस्वरूपसमर्थनार्थम् । अतो नात्र तत्रपदं प्रयोजनीक्रियते ।[1] स्थापनायामपि नान्दी प्रयोक्तव्येत्यस्य न मुनिमतविरोधः । यदाह—

"पूर्वं कृता मया नान्दी ह्याशीर्वचनसंयुता ।
अष्टाङ्गपदसंयुक्ता देवतास्तुतिसंश्रया[2] ॥
तदन्तेऽनुकृतिर्बद्धा यथा दैत्याः सुरैर्जिताः ।"

इति । यत् पुनरत्र कश्चिद्विषमपदत्वं तन्न युक्तं पश्यामः । समपदत्वस्यैव विहितत्वात् । अस्याश्च वक्ता सूत्रधारः । तस्य तु प्रवेशाकथनं वचनमात्रस्य कर्तव्यत्वात् कविस्पर्शविवक्षणाच्च । कविर्हि नान्दीभूतसूत्रधारवचनमेव स्वस्यापि मङ्गलविधानत्वेनाभिधाय प्रवृत्तः । अतोऽस्मान्नान्दीश्लोकादनन्तरं नान्दीग्रन्थो युक्तः । नचैवं सति स्थापकसूत्रधारेण मङ्गलश्लोको न पठ्यत इति मन्तव्यम् । तेनापि तस्यैव नान्दीश्लोकस्य पठनीयत्वं कथञ्चिदभ्युपेतव्यम् इति । वेणीसंहारे तु

"श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः ।
तमहमरागमतृष्णं कृष्णद्वैपायनं वन्दे ॥"

१. Ms. तत्रपदप्रयोजनी०.
२. Ms. संज्ञया.

इत्ययं मङ्गलश्लोकः स्थापकस्य पाठ्यतया कथितः । ननु सूत्रधारपठितैव नान्दी पुनः स्थापकेनापि प्रयुज्यते इति न युक्तम् । यद्येवं युक्तमास्थीयताम् ।

ननु 'नान्द्यन्ते सूत्रधारः' इति भरतविरुद्धम् । तथा हि— नान्दी नाम पूर्वरङ्गस्याङ्गेषु प्रत्याहारादिप्ररोचनान्तेषु द्वाविंशतावन्यतममङ्गम् । तदवसाने रङ्गद्वाराद्यङ्गप्रयोग उक्तः, न प्रस्तावकप्रवेशः । स पुनराश्रावणावसान एवोक्तः । अतो विरोधः । किञ्च पूर्वरङ्गानन्तरं प्रस्तावकप्रवेशो युज्यते ।

'पूर्वरङ्गः प्रसङ्गाय नाटकीयस्य वस्तुनः ।'
'पूर्वरङ्गं प्रयुज्यादौ सूत्रधारे विनिर्गते ।'

इत्यादिदर्शनात् । पूर्वरङ्गो द्वाविंशत्यङ्गवान् । ततस्तान्यङ्गानि द्वाविंशतिं प्रयुज्यैव पूर्वरङ्गः प्रयुक्तो भवति । तत् किमत्र नान्द्येव प्रयोक्तव्या नान्याङ्गानीत्युच्यते । उच्यते— एष्वङ्गेषु नान्दी प्रधानं, प्राधान्यं चास्या मङ्गलात्मकत्वात् । यदुक्तं 'देवतादिनमस्कारे'त्यादि 'आशीर्वचनसंयुक्ता' इत्यादि च । ततो नाट्यारम्भे मङ्गलं तावदाचरणीयमिति कृत्वा नान्द्येव क्रियते, अथान्यान्यङ्गान्यप्रधानानीत्युच्यन्ते इति । बाढम् । तर्हि किमप्रधानानि तानि परित्याज्यानि । नैवं, अप्रधानं परित्यज्यत इति न नियमः, तत्र कामचारः स्यात् । तत्र प्रत्याहारारम्भादीनां परिग्रहो बलात् सिध्यति । वाद्यगीताभावे नाट्यप्रयोगासम्भवात् । रङ्गद्वाराभावेन महती क्षतिः । अतः कानिचिदङ्गान्यर्थात् सिध्यन्ति । कानिचिन्नात्यपेक्षणीयानि इति तेषामप्राधान्यमुच्यते । मङ्गलं त्ववश्यं कर्तव्यमिति नान्द्याः प्रधानता । तदुक्तम्—

"यद्यप्यङ्गानि भूयांसि नाटकीयस्य वस्तुनः ।
तथाप्यवश्यकर्तव्या नान्दी विघ्नप्रशान्तये ।"

इति । ननु कथं नान्दी विघ्नप्रशमकारिणी स्याद्, असौ हि चन्द्र-

१. Ms. प्रस्तावप्रवेश..
२. Ms. अन्याङ्गानीत्युच्यते.

जरासन्धः—जानामि जानामि । सर्वथाद्भुतान्येव चरितानि; यदस्य सर्वाण्यपि दुर्गीभवन्ति ।

वर्षोत्कर्षे यदजनि दरी धाम गोवर्धनाद्रेः
पाथोराशिर्यदपि शरणं मागधे क्रोधभाजि ।
दुर्गद्वन्द्वं भवतु तदिदं यत् पुनर्मौचुकुन्दः
पर्यङ्कोऽपि द्रुतमधिगतो दुर्गतां तद्धि चित्रम् ॥ ६५ ॥

अर्जुनः—युज्यते । सूतसुतखण्डितपराक्रमप्रसरस्य तवायं उरुक्रमतिरस्कारः ।

जरासन्धः—अहो मन्दबुद्धेरनिरूपितकथनम् ।

न तुलामेति राधेयो यस्त्वयापि लघीयसा ।
किं तेन निगृहीतेन त्रिजगज्जयिनो मम ॥ ६६ ॥

भीमः—किं किम् । लघीयानिति कुमारफल्गुनमाधिक्षिपसि । शृणु रे!

कुपितकुलिशपाणिप्रेरिताकाण्डचण्ड-[2]
प्रलयजलदजालोद्घूर्णनोद्गीर्णमर्णः ।
विशिखशरणभङ्ग्या[3] भङ्गुरीकृत्य येन
द्रुतमतिथिसपर्यां लम्भितो हव्यवाहः ॥ ६७ ॥

तदवशानापराधी त्वमद्य मद्भुजभुजङ्गमग्रस्तो जीवनाशं नश्यसि । न हि कुपिते भीमसेने जीवन्ति विद्विषन्तः ।

जरासन्धः—रे रे वृथाविकत्थन वृकोदरहतक! किं न कुपिते भीमसेने जीवन्ति विद्विषन्तः । तद् ब्रूहि,

---

१. 'अद्भुतान्यस्य चरितानि' ख.
२. 'प्रेरिताखण्डचण्ड' ख.
३. 'विशिखगणन' ख.

पृष्ठबद्धप्रकोष्ठस्त्वं येनाह्वव्यां निपातितः ।
तद्वैरं क्रूरमुत्पाद्य किं न जीवन्ति कौरवाः ॥ ६८ ॥

भीमसेनः—(सरोषोत्कम्पम्) किं नाम कुरुकुलज्येष्ठस्य युधिष्ठिरस्य नियन्त्रणानुरोधादुपेक्षितधार्तराष्ट्रं मां कदर्थयसि । तन्न खलु वयं भवज्जामातृवद् गुरुजनपरिपन्थिनः ।

जरासन्धः—अस्ति भवतां ज्येष्ठभ्रातरि लोकोत्तरो भक्त्यतिरेकः । कथमन्यथा फल्गुनेन स्वकलत्रार्पणमाचरितम् । (विचिन्त्य सोपहासम्) इदमपि धर्मात्मजस्य कुलधर्मानुसरणनैपुणम् । तथाह्येतेन

जानता जननीवृत्तं पञ्चोपपतिपारगम् ।
याज्ञसेन्यपि यत्तस्याः साधर्म्यमधिरोपिता ॥ ६९ ॥

भीमः—(ससंरम्भम्) रे रे ! पुरुषोपहारपाषण्ड[1] ! समयदीक्षितक्षत्रियघातपातकिन् ! मगधवंशविषपादप ! कृष्णास्वयंवरकोदण्डजर्जरितजङ्घाकाण्ड ! राधेयविधेय ! कामपालपलायिताभिमान ! युधिष्ठिरापराधिन् ! मधुमथनावमानदुर्ललितदुराचारचतुर ! अनाधिगतधर्मतत्त्वविधुरमतिर्गुरूनपि[2] परिवदसि । तदहमचिरेण

गुरुतरयमदण्डोच्चण्डदोर्दण्डघातै-
र्विघटितविकटोरःपीठघाटाललाटम् ।
वदननयनघोणागह्वरोद्गारिघोर-
क्षतजकपिशितं त्वामन्तकायार्पयामि[3] ॥ ७० ॥

(इत्युत्तिष्ठति ।)

---

१. 'पहारघातपाषण्ड' ख.
२. 'तत्त्वगुरू' ख.
३. 'अर्चयामि' ख.

कृष्णः — (दृष्टिक्षेपेण वारयित्वा) न खल्वनिर्धारितवीरप्रतिवीरसमयं द्वन्द्वयुद्धं प्रशंसन्ति ।

जरासन्धः — भगवन् ! देवर्षे ! अनुजानीहि माम् । नातः परमप्रियाणामहं सोढा ।

नारदः — भो वीरवृन्दिष्ठ ! ननु धर्म्यस्तवायं विधिः । अनुज्ञात एव । यतः,

ललाटनिःसृतं रक्तं रङ्गपत्यधरं यदा ।
सङ्ग्रामयज्ञे तद्राज्ञां सोमपानमिति स्मृतिः ॥ ७१ ॥

जरासन्धः — धन्योऽस्मि ।

शिष्यः — (क) अम्मो ! महेसिणो क[1]लहवड्ढणवेअड्ढम् । मम उण एदाणं वअणसंभमेण उब्भन्तं विअ हिअअम् ।

कृष्णः — भो मगधराज ! त्रयाणामस्माकं कतमस्ते रोचते प्रतिवीरः ।

जरासन्धः — (सजुगुप्सम्) द्वयोरिति वक्तव्ये त्रयाणामित्यात्मानमपि मया सह सम्मर्दक्षमं निर्दिशसि । [2]तदिदमसाम्प्रतम् । यतः,

नाहं बाणो न खलु नरको नापि केशी न कंस-
श्चाणूरो वा न च स(डिभको ! हि बको) नाप्यरिष्टो न हंसः ।

(क) अहो ! महर्षिणः कलहवर्धनवैदग्ध्यम् । मम पुनरेतेषां वचनसम्भ्रमेण उद्भ्रान्तमिव हृदयम् ।

१. 'कलहप्पाडवेअड्ढं' ख.
२. 'तदेव सांप्रतम्' ख.

शत्रुक्षत्रक्षपणनिपुणोत्तालकालाग्निरुद्र-
श्चक्षुर्लक्षीकृतपुरद्रुहो नन्वहं मागधेन्द्रः ॥ ७२ ॥

ततश्च,

गोपाल! त्वमपि पलायितः पुरस्ताद्
(अर्जुनं प्रति)
डिम्भोऽसि त्वमपि सिताश्व! तिष्ठ दूरे ।
(भीमं प्रति)
क्षत्राणां मम भुजरंहसां विसोढा
त्वं भीम! प्रहरणमीप्सितं गृहाण ॥ ७३ ॥

भीमः— ननु सुभटसङ्घसङ्घट्टनोद्भटभुजपरिघसाधनो भीमसेन-स्त्वादृशेषु किमायुधान्तरमपेक्षते ।

जरासन्धः— प्रियं नः, प्रियं नः । (नारदं प्रति) भगवन्! गृहागतं विद्विषमपि न क्रूरेण चक्षुषा वीक्षेतेति नीतिवादः । तदेषामर्थिभाव एव मामतिक्रान्तमर्यादं करोति ।

नारदः— बार्हद्रथ!
कृतापराधान् स्वगृहेऽप्यरातीन्
जिघांसतो नास्ति नृपस्य दोषः ।
उपागतान् हन्ति गुहोपकण्ठं
कण्ठीरवः किं न करीन्द्रयूथान् ॥ ७४ ॥

जरासन्धः— शृणुत भोः! सम्प्रति जरासन्धस्य रिपुनिपाताभिज्ञां प्रतिज्ञाम् । (भीमसेनं प्रति)

चूडागाढनिविष्टमुष्टिविवशव्याभुग्नकण्ठस्फुट-
द्वक्षःकन्दरमग्नमस्तकगलन्मस्तिष्कलिप्तेन ते ।

१. 'गोपालस्त्वमसि' ख.
२. 'गृहान्तरं गतं विद्विषन्तमपि' क.
३. 'ननु बार्हद्रथ' ख.

गात्रेणाहमकृत्रिमोल्बणमहामांसच्छटाविक्रय-
क्रीडाडम्बरमाचरामि समरे नक्तञ्चरेभ्यश्चिरम् ॥ ७५ ॥

भीमः — (कृष्णार्जुनाववलोक्य) वयस्य वृष्णिवीर! वत्स धनञ्जय! इदमुत्थीयते । [1]सम्प्रत्यवसरः पौरुषस्य ।

कृष्णः — निष्प्रतिवीरं वीर(य)स्व ।

अर्जुनः — [2]विजयिनं त्वां पश्येयम् ।

भीमः — (उत्थाय) निभृतं वयस्यवत्साभ्यां स्थीयताम् । (कतिचित् पदानि गत्वा) भगवन् ब्रह्मसम्भव! नमस्ते ।

जरासन्धः — (अञ्जलिं बद्ध्वा) भगवन्! प्रणामः प्रतिगृह्यताम् ।

(इत्युभौ प्रणमतः ।)

नारदः — विजयकीर्तिभाजनं भवेतां भवन्तौ । (उभावुत्थाय [3]परिकरं रचयतः ।)

जरासन्धः — एष सज्जोऽस्मि । [4]सज्जीभव ।

भीमः — ननु [5]नित्यमेव सङ्ग्रामसज्जो भीमसेनः ।

जरासन्धः — तदितः सकलगीर्वाणगन्धर्वयक्षराक्षसदनुजलोक[6]लोचनमहोत्सवायमान[7]समरसम्भवसमुचितमल्लयुद्धाक्षवाटमवतरावः ।

भीमः — बाढम् । (इत्युभौ साटोपं निष्क्रान्तौ ।)

---

१. 'ननु संप्रत्य' ख.
२. 'जयिनं' ख.
३. 'परिकरं बद्ध्वा' ख.
४. 'सज्जीभव' इति खपाठे न.
५. 'सत्यमेव' क.
६. 'लोचनोत्सवा' ख.
७. 'समरसंरम्भसंमर्दितमल्ल' ख.

(नैपथ्ये महान् कलकलः। सर्वे आकर्णयन्ति।)

शिष्यः — (ऊर्ध्वमवलोक्य) (क) भो पेक्ख पेक्ख। सिद्धगन्धव्वगिव्वाणचारणच्छराजक्खरक्खससमूहेहिं निरवआसं आआसं संवुत्तम्। एदाणि दाणि दीसन्ति सुमेरुसिहरप्पमाणाणि विमाणाणि। अदूरे धरणिपुट्ठस्स वट्टइ समग्गो सग्गलोओ।

नारदः — (सविशेषमवलोक्य) अस्मदिच्छानुकूलः कालो वर्तते। तथाहि —

पर्याप्तः प्रसभादपि त्रिजगतः प्राभञ्जनिर्भञ्जने
सङ्कल्पे केनचिदप्यहो न हि जरासन्धोऽतिसन्धीयते।
द्वावेतावपि सङ्गराङ्गणगतावित्युत्सुकाः प्रेक्षितुं
दूरोत्सारितखेचरा दिवि पदं कुर्वन्ति नाकौकसः॥ ७६॥

कृष्णः — एवमेतत्। यथाह भगवान् द्रौहिणिः।

अयमवनिपतिर्नः काङ्क्षितः कान्तकृत्ये
ननु[1] सुचिरवृतोऽयं मागधोऽस्माभिरिष्टः।
इति सुरगणिकानां लब्धयात्रोत्सवानां
कलितकलहकेलिर्जृम्भते सम्भ्रमश्रीः॥ ७७॥

अर्जुनः — अहो निरर्थकोऽपि संवादः सर्वत्र पदं कुरुते। तथाहि —

(क) भोः पश्य पश्य। सिद्धगन्धर्वगीर्वाणचारणाप्सरोयक्षराक्षससमूहैर्निरवकाशमाकाशं संवृत्तम्। एतानीदानीं दृश्यन्ते सुमेरुशिखरप्रमाणानि विमानानि। अदूरे धरणिपृष्ठस्य वर्तते समग्रः स्वर्गलोकः।

---

1. 'नयनरुचिवृतोऽयं' ख।

अक्षामः क्षमते हिडिम्बदमनो बार्हद्रथं बाधितुं,
प्रागल्भ्यं मगधाधिपोऽपि कुरुते भङ्क्तुं बकद्वेषिणम् ।
एवं तावदुपक्रमेषु मृदवः क्रूरीभवन्त्यः क्रमा-
दन्योन्यं प्रसरन्ति गुम्फितगुणाः खे खेचराणां गिरः ॥७८॥

(नैपथ्ये पुनः कलकलः ।)

अर्जुनः —

निर्घातोग्रः कराग्रादपि कमलभुवः पातयन्नम्बुपात्रीं
गौरीकण्ठीरवस्य प्रतिरसितशतैः स्पष्टमुद्घाट्यमानः ।
कल्पापायाम्बुदानामपि परिलघयन् सम्भ्रमाडम्बराणि
ब्रह्माण्डस्फोटचण्डस्तिरयति ककुभः कोऽपि निर्घोष एषः ॥७९॥

कृष्णः — लीलावलयितसुरकुञ्जरकरपीवरं बहुमण्डलमास्फालितं भीमेन ।

शिष्यः — (क) सुणह इदो वि अण्णो । संखोहिअसमुद्दो णिम्महिअमहुमहणणिद्दो उप्पहप्पहाविअमिहिररहतुरंगमो भमिअपाआलभुजंगमो णिअदलिअसअलमहिद्धरन्धो सिढिलिअधरणिपेढबंधो णिज्जिअपलअपज्जण्णणिग्घादडंबरो विमाणभित्तिपडिअपडिरवभमं(वि? मि)अंबरो विम्मारिअदिसाकरिंदकण्णआलो भुवणविणासभअविहुरलो-

---

(क) शृणुत इतोऽप्यन्यम् । संक्षोभितसमुद्रो निर्मथितमधुमथननिद्र उत्पथप्रधावितमिहिररथतुरङ्गमो भ्रमितपातालभुजङ्गमो निर्दलितसकलमहीध्र-रन्ध्रः शिथिलितधरणिपीठबन्धो निर्जितप्रलयपर्जन्यनिर्घातडम्बरो विमानभित्ति-पतितप्रतिरवभ्रमिताम्बरो विसारितदिशाकरीन्द्रकर्णतालो भुवनविनाशभयविधुर-

---

१. 'मथनो' ख.
२. 'अम्बुपात्रं' ख.
३. 'लीलापलायित' ख.
४. 'भयभरिअंबरो' ख

अपालो, ज्झंतिचकिअच्छरगणालिंगिदगयणचरजूआणो पडिअसुभटभुअ-किवाणो मुणिअमहामल्लसम्मद्दो पवड्ढइ महंतो सद्दो ।

नारदः — सम्यगवहितं वत्सेन । तथाहि —

ब्रह्माण्डस्यान्तकाले द्रुतमिव दलतश्चण्डमार्ताण्डतापा-
त्तीव्रादौर्वाग्निदाहात् स्फुटदुरुदृषदां पर्वतानामिवोग्रः ।
व्यारुग्णक्षोणिभारातुरकमठपतिस्फारपृष्ठास्थिमाठी-
पीठप्रस्फोटकल्पः कवलयति रवः कोऽपि काष्ठाः कठोरः ॥ ८० ॥

तत् सर्वथा कुटिलीकृतकार्कोटकभोगि[1]भङ्गभीषणं निजदोर्दण्डमण्डलमास्फालितं जरासन्धेन ।

शिष्यः — (अन्यतोऽवलोक्य) (क) भो इदो पेक्खह । अणग्गलुग्गलन्तमदसलिलधारापवट्टिअधरणिरेणुवारणेहिं वारणेहिं तक्खणक्कंतवाहवारजणिअजवतुलिअगन्धवाहेहिं वाहेहिं तुरिअतुरग्गलंघणसफलीकअसारहिमणोरहेहिं रहेहिं परसुचक्ककोअंडभिंडिपालमंडलग्गलग्गमुट्ठिणिट्ठुरभुअदंडसाहसुब्भडेहिं भडेहिं सव्वदो समु(त्थु? क्खु)ब्भइ दंसिअजु[2]अप्पवुत्ती धरित्ती ।

लोकपालो झटितिचकिताप्सरोगणालिङ्गितगगनचरयुवा पतितसुभटभुजकृपाणो ज्ञातमहामल्लसम्मर्दः प्रवर्तते महान् शब्दः ।

(क) भो इतः पश्यत । अनर्गलोद्गलन्मदसलिलधाराप्रवर्तितधरणिरेणुवारणैर्वारणैः तत्क्षणाक्रान्तवाहवारजनितजवतुलितगन्धवाहैर्वाहैः त्वरिततुरङ्गलङ्घनसफलीकृतसारथिमनोरथैः रथैः परशुचक्रकोदण्डभिण्डिपालमण्डलाग्रलग्नमुष्टिनिष्ठुरभुजदण्डसाहसोद्भटैः भटैः सर्वतः संक्षुभ्यति दर्शितयुगप्रवृत्तिर्धरित्री ।

---

१. 'भोग' ख.
२. 'जअपरिवुत्ति' ख.

निर्दयः । अतोऽहं जनैः सर्वजनैरुग्र इत्युदाहृिये क्रूर इत्युदाहृतो भवामि । इति शबरस्वभावोक्त्या शैलजापतिः संहाररुद्रश्चाहमिति ध्वन्यते ॥ २२ ॥

क्व प्रयास्यति गिरीश एष भो
यस्य वेश्म हि मही महत्यसौ ।
सन्निधिर्मम न सह्यते यदि
द्रागितोऽपसर तर्हि तापस ! ॥ २३ ॥

क्वेति । त्वया दूरतोऽपसर दुर्मदेति यदुक्तोऽसि तत्र ब्रवीमि । भोस्तापस ! एष गिरीशः पर्वताधिपतिः क्व प्रयास्यति इतः कुत्र गमिष्यति । महती विस्तीर्णासौ मही पर्वतवनभूमिः यस्य मम वेश्म भवनम् । स्वभवनमुज्झित्वा क्व गन्तव्यम् । मम सन्निधिः सामीप्यं न सह्यते यदि तव दुस्सहश्चेत्तर्हि द्राक् क्षिप्रमितोऽस्मात् प्रदेशादपसर गच्छ । आगन्तुको हि त्वम् । तदितोऽन्यत्र गमनमनुचितं न भवतीति भावः ॥ २३ ॥

इत्यमूनि वचनानि धूर्जटेः
शृण्वताथ जमदग्निसूनुना ।
शङ्करः शबरवेष एष इ-
त्यात्मनैव निरणायि धीमता ॥ २४ ॥

इतीति । इत्येवंप्रकाराण्यमूनि धूर्जटेर्भगवतो वचनानि शृण्वता जमदग्निसूनुना रामेण शबरवेषः शङ्कर एव एष इत्यात्मनैव स्वबुद्ध्यैव निरणायि निश्चितम् । अत्र हेतुः धीमता बुद्धिमतेति । शैलजेयमित्यादिभगवद्वाक्यध्वनितार्थतत्त्वावगमो निश्चयः ॥ २४ ॥

तं प्रपद्य कलितप्रदक्षिणो
दण्डवत् प्रणतवानुवाच च ।
यन्मयोदितमतत्त्ववेदिना
क्षम्यतां तदिदमम्बिकापते ! ॥ २५ ॥

तमिति । स जमदग्निसूनुस्तं भगवन्तं प्रपद्य प्राप्य कलितप्रदक्षिणो दण्डवत् प्रणतवान् दण्ड इव दीर्घनमस्कारं कृतवानुवाच च । किमिति । हे

अम्बिकापते! अतत्त्ववेदिना तत्त्वं परमार्थमजानता मया यदुदितं सावक्षोभमभिहितं तदिदं क्षम्यतां सह्यतामिति प्रार्थनायां लोट् ॥ २५ ॥

यद्युदैष्यदिह मे विवेकिता
तन्मया खलु भवानवेत्स्यत।
ऊष्मणा हि महताधिगम्यते
भस्मना निचुलितोऽपि पावकः ॥ २६ ॥

यदीति। इहास्मिन्नवसरे मे विवेकिता विवेकशालित्वम् उदैष्यद् उदितम् उद्भूतं यदि तत् तस्माद् मया भवानवेत्स्यत खलु विदितो भविष्यत्येव। ममेदानीं विवेकाभावादेव भवानविदितोऽभविष्यदित्यर्थः। विवेकिना तु सुवेद्य एव भवानित्याह दृष्टान्तमुखेन। पावकोऽग्निः भस्मना निचुलितोऽप्याच्छादितोऽपि महतोष्मणा उष्णत्वेन हेतुनावगम्यते ज्ञायते। हि यस्माद्। यथा तावददृष्टस्वरूपोऽग्निरूष्मणावगम्यते तथा भवानपि शबरवेषतिरोहितस्वरूपोऽप्यसाधारणेन तेजसावगन्तुं शक्य एवेत्यभिप्रायः ॥ २६ ॥

मुग्धचन्द्रमकुटं मुदां पदं
दुग्धपाण्डुवपुषं दुरासदम्।
सर्पहारकटकं सनातनं
भक्तबान्धव! भवन्तमाश्रये ॥ २७ ॥

मुग्धेति। हे भक्तबान्धव भक्तानां बन्धो! भवन्तमहमाश्रये सर्वात्मना भजामि। कीदृशम्। मुग्धचन्द्रमकुटं बालशशिशेखरं मुदां पदं प्रीतिस्थानं दुग्धमिव पाण्डुवपुषं धवलशरीरं दुरासदम् अपुण्यजनैरप्राप्यं सर्पहारकटकं सर्परूपाणि हारकटकाद्याभरणानि यस्य। सनातनं शाश्वतं तादृशमिति सम्बन्धः ॥ २७ ॥

नित्यमुक्तममलं निरामयं
निष्कलं निरुपमं निरत्ययम्।
निष्कलङ्कचरितं निरीश्वरं
नीललोहित! भवन्तमाश्रये ॥ २८ ॥

नित्येति । नित्यमुक्तं नियमेन प्रकृतितो भिन्नम् अत एवामलं निर्मलं निरामयं निर्दोषं निष्कलमस्वरूपं निरुपममुपमारहितं निरत्ययं निरवसानं निष्कलङ्कचरितम् अमलचरित्रं निरीश्वरम् ईश्वरो यस्य नास्तीति तथाभूतम् । हे नीललोहित! भवन्तमाश्रये ॥ २८ ॥

पुण्यपूरसुलभं पुरद्विषं
पार्वतीप्रियतमं द्युतेः पदम् ।
सर्वबोधसरसं सदाशिवं
सन्ततं भव! भवन्तमाश्रये ॥ २९ ॥

पुण्येति । पुण्यपूरेण सुकृतसञ्चयेन सुलभं सुखप्राप्यं पुरद्विषं त्रिपुरशत्रुं पार्वतीप्रियतमं द्युतेः तेजसः पदं स्थानं सर्वबोधसरसं सर्वज्ञत्वात्सरसं सदा प्रसन्नं सदाशिवं हे भव! सन्ततं सर्वदा भवन्तमाश्रये ॥ २९ ॥

इत्थमादि नुवते प्रसेदिवान्
भार्गवाय भगवान् महेश्वरः ।
दत्तवान् परशुमात्मनस्ततो
विश्रुतः परशुराम इत्यसौ ॥ ३० ॥

इत्थमिति । इत्थमादि नुवते स्तुवते भार्गवाय प्रसेदिवान् प्रसन्नो भगवान् महेश्वरः आत्मनः परशुं निजमेव परशुं दत्तवान् अर्पितवान् । ततस्तस्माद्धेतोरसौ भार्गवः परशुराम इति विश्रुतः प्रसिद्धोऽभूत् । ततः प्रभृतीति वा ॥ ३० ॥

निर्जरद्रुहमनेन सत्वरं
दैत्यवर्गमवदारयाखिलम् ।
अस्तु वत्स! तव भद्रमित्यमुं
सम्प्रभाष्य स हरस्तिरोदधे ॥ ३१ ॥

निर्जरेति । स तादृशः शबरवेषो हरः । हे वत्स त्वमनेन परशुना निर्जरद्रुहं देवद्वेषिणमखिलं दैत्यानां वर्गं समूहं सत्वरं शीघ्रं अवदारय खण्डय । तव भद्रमस्तु मङ्गलमस्तु । इत्यमुं परशुरामं सम्प्रभाष्य सम्यगुक्त्वा तिरोदधे तिरोबभूव ॥ ३१ ॥

भार्गवोऽपि भवशासनाद् द्रुतं
दानवौघशलभानशेषतः ।
उज्ज्वलोत्कटकुठारपावक-
ज्वालयालघुमदानदाहयत् ॥ ३२ ॥

भार्गव इति । भार्गवोऽपि भवस्य भगवतः शासनाद्धेतोर्दानवौघमेव शलभानशेषतः सर्वानपि उज्ज्वलया प्रदीप्तया उत्कटया कुठारया कुठाररूपया पावकज्वालया अलघुमदान् गुरुतरगर्वानमून् द्रुतमदाहयद् भस्मीकारितवान् ॥ ३२ ॥

शङ्करोऽथ मुदितः समस्ततः
शस्त्रशास्त्रममुमध्यजीगपत् ।
बाहुविक्रमभरेण भूयसा
बाहुलेयसदृशः स चाभवत् ॥ ३३ ॥

शङ्कर इति । अथानन्तरं मुदितो दैत्यनिधनेन सन्तुष्टः शङ्करोऽमुं भार्गवं समस्ततः सर्वमपि शस्त्रशास्त्रं धनुर्वेदमध्यजीगपद् अध्यापितवान् । स च भार्गवो भूयसा महता बाहुविक्रमभरेण भुजवीर्यप्रकर्षेण बाहुलेयसदृशः स्कन्दतुल्योऽभवत् ॥ ३३ ॥

स प्रपद्य शितिकण्ठशिष्यता-
मप्रमेयमहिमा महामुनिः ।
अत्यशेत महसा सुरासुरा-
नाश्रयाश्रयिसदृक्षतेदृशी ॥ ३४ ॥

स इति । स महामुनिर्भार्गवः शितिकण्ठस्य शम्भोः शिष्यतां प्राप्य लब्ध्वा अप्रमेयमहिमा अपरिच्छेद्यप्रभावः सन् महसा निजतेजसा सुरानसुरांश्चात्यशेतातिशयितवान् । आश्रयस्याश्रयिणश्च सदृक्षता सादृश्यं ईदृशी एवंप्रकारा । आश्रयतुल्यो भवत्याश्रयीति यदुच्यते तदत्र प्रत्यक्षमभूदित्यर्थः ॥ ३४ ॥

स व्रजन्नभिबुभूषतो मुखाद्
द्वीपिनः सपदि रक्षितं द्विजम् ।

वेदशास्त्रजलराशिपारगं
मित्रधेयमकृताकृतव्रणम् ॥ ३५ ॥

स इति । स भार्गवो व्रजन् भगवत्समीपादाश्रमं प्रतिगच्छन्नभिबुभूषतोऽभिभवितुमिच्छतो द्वीपिनो व्याघ्रस्य मुखात्सपदि रक्षितं तेन परित्रातम् । कुठारेण शार्दूलं हत्वा रक्षितम् । वेदशास्त्ररूपस्य जलराशेः पारगं पारदृश्वानमकृतव्रणं नाम द्विजं ब्राह्मणं मित्रधेयमकृत सुहृदं चकार ॥ ३५ ॥

तेन साकमुचितेन बन्धुना
प्रस्थितः स मरुतेव पावकः ।
आश्रमं निजमवाप्य सादरं
वन्दते स्म पितरौ महाद्युतिः ॥ ३६ ॥

तेनेति । उचितेन योग्येन बन्धुना तेनाकृतव्रणेन समम् । मरुता वायुना पावक इव इत्यनेन सदा साहचर्यं दर्शितम् । प्रस्थितः स महाद्युतिरुत्कृष्टतेजा भार्गवो निजमाश्रममवाप्य सादरमादरातिशयेन पितरौ रेणुकाजमदग्नी वन्दते स्म अभिवन्दयामास ॥ ३६ ॥

हैहयक्षितिपतिस्तदन्तरे
वीर्यवान् स कृतवीर्यनन्दनः ।
मन्त्रिभिः सह मृगव्ययोत्सुकः
प्राविशद्वनमनूनसैनिकः ॥ ३७ ॥

हैहयेति । तदन्तरे तस्मिन्नवसरे हैहयक्षितिपतिर्वीर्यवान् पराक्रमी स तथा प्रसिद्धः कृतवीर्यनन्दनः कार्तवीर्यार्जुनः मृगव्ययोत्सुकः मृगयायां सश्रद्धः । 'प्रसितोत्सुकाभ्याम्—' इति सप्तम्यास्तृतीया । मन्त्रिभिः सहानूनसैनिको बहुसैन्यसमेतो वनं प्राविशत् प्रविष्टवान् ॥ ३७ ॥

दोःसहस्रपृथुशाखिमण्डलः
सत्त्ववानचलतुङ्गविग्रहः ।
भूषणद्युतिशतेन पुष्पितः
काननान्त इव जङ्गमो बभौ ॥ ३८ ॥

दोरिति । स कृतवीर्यनन्दनः जङ्गमः सञ्चारवान् काननान्त इव बभौ शोभते स्म । कीदृशः । दोःसहस्रमेव पृथु स्थूलं शाखिमण्डलं वृक्षसमूहो यस्य । सत्त्ववान्, सत्त्वं बलं तदेव वा सत्त्वा वनजन्तवः तद्वान् । अचल इव तुङ्ग-विग्रहः उन्नतशरीरः । भूषणानां द्युतिशतेन दीप्तिपुञ्जेन पुष्पितः सञ्जात-पुष्पः ॥ ३८ ॥

खड्गवृन्दमथ खड्गमण्डलैः
शल्ययूथमथ शल्यकोटिभिः ।
अच्छभल्लमपि भल्लराशिभिः
पत्रिणश्च स जघान पत्रिभिः ॥ ३९ ॥

खड्गेति । स नृपः अथ अनन्तरं खड्गानां मृगविशेषाणां वृन्दं खड्गमण्डलैरसिजालैर्जघान हतवान् । शल्यानां वराहविशेषाणाम् .... ॥ ३९ ॥

सिंहजालमथ संहरन् शरैः
कृन्तति स्म बहु दन्तिनां कुलम् ।
निर्लुलाव च लुलायमण्डलं
सञ्चचार गवयान् गवेषयन् ॥ ४० ॥

...........मण्डलं निर्लुलाव निर्लूनवान् । मृगविशेषान् गवेषयन् मार्गयन् सञ्चचार सर्वत्र सञ्चारं कृतवान् ॥ ४० ॥

क्रूरसूरकरदूरतापितो
भूपतिर्बहुभिरन्वितो बलैः ।
क्षुत्तृडातुरतया स सत्वरं
भार्गवाश्रममशिश्रियत् तदा ॥ ४१ ॥

क्रूरेति । क्रूरैः सूरकैर्दिवाकररश्मिभिः दूरमत्यर्थं तापितः सन्तापित-शरीरः भूपतिः अर्जुनो बहुभिरसङ्ख्यैर्बलैः सैन्यैरन्वितः सहितः क्षुधा बुभुक्षया तृषा पिपासया चातुरो दीनस्तस्य भावस्तत्ता तया हेतुना तस्मिन् समये सत्वरं भार्गवस्याश्रममशिश्रियदाश्रितवान् ॥ ४१ ॥

स्वर्गवीं द्रुतमधोगथो मुनि-
र्भोज्यपेयचयमाशितम्भवम् ।
येन सैनिकसहस्रकोटिभिः
सौहितीं भृशमवापदर्जुनः ॥ ४२ ॥

स्वरिति । अथो तदागमनानन्तरं मुनिर्जमदग्निर्द्रुतं स्वर्गवीं सुरभितनयाम् । आशितं यावत्तृप्ति भक्षितं भवत्यनेनेत्याशितम्भवं भोज्यानां पेयानां चयम् अधोग् दोहनं कृतवान् । 'दुहियाचिरुधि—' इत्यादिना द्विकर्मकत्वम् । अधोगिति 'दुह प्रपूरणे' इत्यस्माल्लङि रूपम् । येन दुग्धेन वस्तुजातेनार्जुनः सैनिकसहस्रकोटिभिः सह भृशमत्यर्थं सौहितीं तृप्तिमवापत् प्राप्तवान् ॥ ४२ ॥

स प्रशस्य जमदग्निमुच्चकै-
र्विस्मितो निजपुरीमुपागतः ।
मन्त्रिणा कुमतिनाथ लम्भित-
स्तादृशीं सुरगवीं प्रति स्पृहाम् ॥ ४३ ॥

स इति । सोऽर्जुन उच्चकैर्विस्मितो विस्मितिं प्राप्तो जमदग्निं प्रशस्य श्लाघयन् साधु साध्विति प्रशंसन् निजपुरीं माहिष्मतीपुरमुपागतः प्राप्तः । अथानन्तरं कुमतिना दुर्बुद्धिना केनचिन्मन्त्रिणा सचिवाधमेन तादृशीं तथाप्रभावां सुरगवीं प्रति स्पृहामिच्छा लम्भितः प्रापितः । तां स्वीकर्तुमाशामुत्पादित इत्यर्थः ॥ ४३ ॥

निर्मलं मुकुरमास्यमारुत-
स्तीरपांसुनिकरो जलाशयम् ।
किञ्च लाञ्छनमृगः सुधाकरं
भूपतिं कुसचिवश्च दूषयेत् ॥ ४४ ॥

निर्मलमिति । निर्मलं स्वच्छं मुकुरं दर्पणमास्यमारुतो मुखवायुः दूषयेद् दुष्टं करोति । इदं सर्वत्रान्वीयते । जलाशयं तडागादिकं तीरपांसुनिकरस्तटतलभूरेणुकपटलम् । अपि च सुधाकरं चन्द्रं लाञ्छनमृगः कलङ्कमृगः ।

भूपतिं कुसचिवो दुष्टामात्यश्च दूषयेदित्येवम् ॥ ४४ ॥

क्रुष्यतेव मुनिरेत्य याचितो
धेनुमप्रवितरंस्तु हिंसितः ।
निघ्नतीं निजबलानि तेन ता-
मुज्झताथ तदपत्यमाहृतम् ॥ ४५ ॥

............(अ)प्रदिशन् मुनिस्तु हिंसितः । निजबलानि सैन्यान् निघ्नतीं स्वप्रभावेण निधनं कुर्वाणां तां धेनुमुज्झता त्यजता अथानन्तरं तेन राज्ञा तदपत्यं तस्य धेनोरपत्यं वत्स आहृतं बलादपहृतम् ॥ ४५ ॥

तत्क्षणादुशनसा स्वविद्यया
जीवितस्य पितुराज्ञया कृती ।
अर्जुनं तमकृतव्रणान्वितः
प्राप कोपकलुषो भृगोः सुतः ॥ ४६ ॥

तदिति । तत्क्ष(णं ? णात्) तदानीमेव उशनसा शुक्रमुनिना स्वविद्यया स्वस्य मृतसञ्जीविनीमन्त्रबलेन जीवितस्य प्राप्तजीवस्य पितुर्जमदग्नेराज्ञया नियोगेन हेतुना कृती समर्थो भृगोः सुतः परशुरामः अकृतव्रणेन निजसखेन ब्राह्मणेनान्वितः कोपकलुषः क्रोधक्षुभितहृदयः सन् तमपराधिनमर्जुनं प्राप प्राप्तवान् ॥ ४६ ॥

संस्मृतेन पुरवैरिकिङ्करे-
णाहृते परशुकार्मुके वहन् ।
स्यन्दनं समधिरुह्य रेणुका-
नन्दनोऽरुणदरातिमन्दिरम् ॥ ४७ ॥

27. Taken up for publication in the Trivandrum Sanskrit Series. The commentary is incomplete.

Parameśvara II refers to his grandfather, Parameśvara I in the commentary as follows:

यो न्यायकणिकाव्याख्यामकरोत् परमेश्वरः ।
तस्य पौत्रेण तत्सूनोरेवान्तेवसता स्वयम् ॥

Moreover the author refers to his three paternal uncles in the course of the commentary. The relevant passages are:

1. इति गोपालिकासूनुर्ऋषेः पितुरनुग्रहात् ।
अन्तेवासी पितृव्यस्य भवदासस्य धीमतः ॥

2. इति व्याख्यापयामास कार्यवादमिमं सुधीः ।
सुब्रह्मण्यो यथार्थाख्यो भ्रातुरेव च सूनुना ॥

3. एवं स्वत प्रमावादं व्याख्यद् गोपालिकासुतः ।
वासुदेवपितृव्योक्तरीत्या केवलयैव तु ॥

At the end of the commentary on कालप्रत्यक्षतावादः the author makes mention of a Śaṅkara with deep respect and reverence.

कायवाङ्मनसां सम्यक् प्रह्वीभावेन शङ्करे ।
अन्यथाख्यातिवादेऽपि स व्याख्यातुं समुद्यतः ॥

Since Parameśvara II has referred to Bhavadāsa, Subrahmaṇya and Vāsudeva as uncles in clear terms, it is safer to assume that Śaṅkara was most probably not his uncle but only his teacher.[28]

Vāsudeva II. Parameśvara II had a scholarly brother called Vāsudeva whose contributions are more

---

28. Sri. Ramanatha Sastri is of opinion that Śaṅkara was probably one of the uncles of Parmeśvara II. see ntroduction to Sphoṭasiddhi with Gopālikā, p. x

literary than śāstraic. The colophon at the end of his *Devīcarita* runs as follows:

इति श्रीमत्कात्यायनीपादाम्बुजमधुव्रतेन श्रीमद्गोपालीसुतेन
श्रीवासुदेवेन विरचिते श्रीमद्देवीचरिते काव्यरत्ने षष्ठ आश्वासः ।

At the beginning of the work entitled *Satyatapaḥ-kathā*, Vāsudeva refers to his father, uncles and brother as follows:

पुण्यमहोदयमिश्रा. सपितृपितृव्याग्रजास्सहोदयमिश्राः ।
(verse 6)

The *agraja* in the hemistich quoted above most probably is Parameśvara II.

In the ninth stanza of the same work the author pays homage to his uncle Bhavadāsa:

नत्वा भवदासं तं सुवाग्जितश्रुतिपथाभिभवदासन्तम् ।

At the end of *Devīcarita* also Bhavadāsa is mentioned with great respect.

यस्येहाभवदासः स्वर्गौर्यौः (?) भक्तितो महाभवदासः ।
येनेहाभवदासस्स्वान्ध्यं मे जयतु स सुमहाभवदासः ॥

These references in the works prove beyond doubt that there was a Vāsudeva who was the younger brother of Parameśvara II. In his works Vāsudeva has mentioned his uncle, Bhavadāsa but has kept silent over the other uncles. From this we may infer that Bhavadāsa was probably Vāsudeva's teacher as well. But the fact that Vāsudeva had a teacher called Īśvara can be gathered from the following homage in *Satyatapaḥ-kathā:*

अपि परमाद्यं नाम श्रितमीश्वरमिति गुरुं च तमाद्यं नाम ।

The four *yamaka-kāvyas*— *Devīcarita*, *Satyatapaḥ-kathā*, *Acyutalīlā* and *Śivodaya*[29] — are very artificial and not easily intelligible as *yamaka kāvyas* are bound to be. The *Devīcarita* describes the exploits of the goddess in six cantos. In the manuscript of the work, the beginning is lost. At the end of the last canto occur the following stanzas:

परमेश्वरभूतो यः श्रितो वृषी भव इवाप्तवरभूतो यः ॥
तस्यां जातेन ततः स्तुतयशस ऋषेस्तु सुगुणजातेन ततः ।
पापानामेतेन क्षप्तृमया वासुदेवनामेतेन ॥
कृतमायाया मातुस्स्वय प्रसादेन सदुदयाया मातुः ।
काव्यमिदं परमेय सन्त इयुश्चाम्बिका मुदं परमेयम् ॥

Satyatapaḥ-kathā in three *āśvāsas* describes the story of Satyatapas *alias* Ṛsi, one of the ancestors of Vāsudeva. Satyatapas in addition to practising penance at Vedāranya had gone on a pilgrimage to various holy places such as Rāmeśvara, Srīrangam, Anantaśayanam, etc., accompanied by another person. The poem begins propitiating the goddess at Veḷakkāṭu.

स्वस्ति भवेदमितायै वेदवनं श्रयमाणवेदनितायै ।
देव्यै नामागस्य स्थितं तटाकं श्रित च नामागस्य ॥

Aa the end of the work Gopālikā is rεferred to as follows:

भूतायामद्भूताद् गोपालीतस्त्विलतो हि गोपालीतः ।

In this work no direct internal evidence is available to attribute it to Vāsudeva. But the references to the

---

29. These works appear to be attributed to Vāsudeva (I), the paternal uncle of Vāsudeva (II), by Vatakkumkur Rajaraja Varma. (See History of Sanskrit Literature in Kerala, Pt. I, p. 462)

goddess at Vedāranya, Gopālī (mother) and Bhavadāsa will be enough evidence to ascribe its authorship to Vāsudeva, the brother of Parameśvara II.

Acyutalīlā deals with the story of *Bhāgavata* in four chapters. At the beginning and end the author makes references to the goddess of Vedāraṇya. Towards the close of the work he mentions his mother Gopālī in the words;

यन्माता गोपालीवृतं हरिं श्रीरिव श्रिता गोपाली ।

There is also a reference to Bhavadāsa.

प्रणतोऽस्मि गतं भवसागरनाविकसद्ध्वयं भवदासमहम् ।

These references coupled with the peculiar *yamaka* style of the work warrant us to ascribe the work to Vāsudeva.

Śivodaya is the smallest of the four *yamaka-kāvyas* by Vāsudeva and it is concerned with Śiva and His wife installed in the temple at Vedāranya. At the beginning there is a description of the place and its greatness. At the end the author wishes happiness to his mother in the following words:

अपि विशदा गोपाल्यै मात्रे स्वस्त्यस्तु मे सदा गोपाल्यै ।

The work contains two *āsvāsas* only.

Kaumārilayuktimālā is the only known work on Mīmāṁsā written by Vāsudeva and it is based on the *Mīmāṁsā-vārttika* of Kumārila. At the close of the work the author himself says:

इह श्रीमत्कौमारिलपरमशास्त्रेऽथ च मया
व्यधायीदं दुर्गागुरुजनमहानुग्रहजुषा ।

There are two colophons at the end of the transcript of the work kept in the Madras Oriental Mss. Library:

1. इति श्रीमच्छ्रुतिकान्तारावस्थितवृषावितृभूतायानन्दायिभास्व-
च्छवरार्यकृष्णनतमहर्षिगोपालीनन्दनकृतिः कौमारिलयुक्तिमाला ।

2. ... ... पदाश्रितसदाहितश्रीमद्वासुदेवार्यश्रीमत्परमेश्वरार्य-
पदाश्रिताशिव- .... श्रीपार्थसारथिसुचरितपरितोषणकृति-
कौमारिलतिलकं समाप्तम् ।

From these colophons two facts could be gathered. Firstly that Vāsudeva, the author of the work, is the son of Ṛsi and Gopālikā and hence the brother of Parameśvara II. Secondly the work is known under two titles *Kaumārilayuktimālā* and *Kaumārilatilakam.* A notable peculiarity of the work is that every stanza in it begins with a *vākya* of Vararuci.

Vākyāvali, a poem in four cantos describing the life of Kṛṣṇa, too shows the very same peculiarity and it is written by one Vāsudeva as could be gathered from the colophons at the end of the cantos. So most probably his poem also was composed by our Vāsudeva, who probably copied this artificial style of composition from *Haricarita* written by Parameśvara I, who was his grandfather.

Cakorasandeśa, a poem already referred to above is held to be a work composed by one of the members of the Payyūr family. According to some its author is Parameśvara I[30], and according to certain others, one

---

30. Dr. Kunhan Raja, Introduction to *Haricarita*, p. xxiv.

Vāsudeva is its author[31]. Moreover it may be pointed out that there is no evidence of any validity to show that the work was written by a Payyūr Bhaṭṭatiri.

Ṛsi III, son of Parameśvara II and father of Parameśvara III was also known by another name त्रैविद्येश as could be gathered from a colophon in *Jaiminīyasūtrārthasaṅgraha*. The colophon runs. इति त्रैविद्येशापरनामधेयश्रीमदृषिपुत्रश्रीपरमेश्वरविरचिते सूत्रार्थसङ्ग्रहे तृतीयस्याध्यायस्य तृतीयः पादः (p. 348). The title *Traividyesa* is ample testimony for Ṛṣi's alround scholarship[32].

Parameśvara III refers to his grandfather in the *Jaiminīyasūtrārthasaṅgraha* in the following words:

तत्रभवन्तः षड्दर्शनीपारदृश्वत्वे सत्यपि विशेषतः कौमारिलतन्त्रस्वातन्त्र्यवत्तया विवृततत्त्वाविर्भावतत्त्वबिन्दुस्फोटसिद्ध्योऽस्मत्पितामहपादा विभ्रमविवेकव्याख्यायाम् ।

(p. 49)

As the works mentioned are written by Parameśvara II, it is beyond doubt that the author of *Jaiminīyasūtrārthasaṅgraha* was his grandson.

Jaiminīyasūtrārthasaṅgraha is a brilliant commentary on Jaimini's sūtras and it is published for the first time in the Trivandrum Sanskrit Series.

Parameśvara (probably the father of Ṛṣi I). There is a commentary on *Kāśikā* by a certain

31. Sri Kuttamasseri Narayana Pisharoti, *Pariṣut Traimāsikam*, Vol. VI, No. I, p. 22.
32. This title was also borne by Ṛṣi I. Vide Uddaṇḍa Śāstri's *Mallikāmāruta*
त्रैविद्येशो महर्षिर्निरवधिमहिमा यद्गृहे जागरूकः ।

Parameśvara[33] and it is ascribed to Parameśvara I by some[34] and to Parameśvara III by others[35] There is hardly any evidence to support either of the views.

This commentary, by its quality, cannot be placed on a par with the commentaries of the abovementioned Parameśvaras of the Payyūr family. Nor does it refer to any of these eminent Mīmāṁsakas. The latest of the works mentioned in it is *Nītitattvāvirbhāva* (A. D. 1300). So if at all Parameśvara, the author of the commentary on *Kāśikā*, belonged to the Payyūr family, which is quite probable, in my opinion, it is safer to reckon him as belonging to a generation earlier than that of Ṛsi I. And it is not impossible that he was the father of Ṛsi I.

On enquiry I understand from Sri Chitran Namputiri of Porkkalam that at a time when there was no male member and only a single female member remained in the Payyūr family, she was married to a member of the Mangalam family who was adopted as the heir. He had no issue by her and thus the original Payyūr family became extinct.



33. vide the colophon
इति परमेश्वरविरचिते काशिकाव्याख्याने उपमानं समाप्तम् ।
(Ms. Trivandrum, T. 337, p. 126)
34. K. Rama Pisharoti, *The Three Philosophers of Kerala*, I. H. Q. Vol. V.
35. Introduction to *Gopālikā*, p. xv.

MANUSCRIPTS NOTICES AND STUDIES*

XIII

THE ACYUTA-RĀMA-KṚṢṆA-ĀKHYĀḤ OF ŚRĪDHARA-VEṄKAṬEŚA.

By

Dr. V. Raghavan.

In the handlist of the manuscripts newly acquired for the Travancore University Manuscripts Library, I found the work of the above-given name* entered against No. 2890J with its author noted as Śrīdhara. As most of the other works in this codex happen to be the works of Śrīdhara-Veṅkate'a, popularly known as Ayyāvāl, I entered in the "Additions and Corrections" of Vol. I of my *New Catalogus Catalogorum* (p 361a) that the author of the *Acyuta-rāma-kṛṣṇa-ākhyāḥ* appeared to be the same Śrīdhara-Veṅkateśa. Recently I got occasion to examine this manuscript and I found my surmise to be correct.

Śrīdhara-Veṅkaṭe'a is a well-known name in the annals of the literary and religious activity of Tanjore District during the Mahratta period. A canonised saint, referred to always by the reverential appellation '*Ayyāvāl*' (in Sanskrit *Āryāḥ*), he took a leading part in popularising the cult of salvation through the repeated utterance of the Lord's name, *Nāmasiddhānta*. Besides a tract on this school of thought, he produced many hymns embodying this philosophy, the most celebrated of which is the *Ākhyāsasti*. His hymns supplied the texts and burdens for the popular religious and devotional exponents called the Bhagavatars or Harikatha-per-

formers, even as his portrait formed part of the pantheon of the Bhajana-mathas. Though the Vanivilas Press has recently popularised some of his hymns in Devanagari, devotional circles knew all his hymns in Grantha print for a long time. I was led to examine the Trivandrum manuscript *Acyuta-rāma-kṛṣṇa ākhyāḥ*, because such a title was not known among the works of Śrīdhara-Veṅkaṭeśa.

As the name indicates sufficiently, this too is a contribution of the author bearing out the greatness and efficiency of the worship of the Lord's name. It contains seven verses in *Mālinī* and *Śikhariṇī* metres on the names *'Acyuta'* and *'Kṛṣṇa'*, two verses in *Vasantatilaka* and *Śikhariṇī* on the name *'Rāma'* and one *Anuṣṭubh* in the end authenticating the authorship:

इत्यच्युताख्या कृष्णाख्या रामाख्या च समीरिता ।
भवार्णवसमुद्धारनाविका श्रीधरार्यकैः ॥

Collections of the hymns of Śrīdhara-Veṅkaṭeśa are known in single codices, as for instance in the Adyar Library (Catalogue II, Appendix pp. ix-x), but an *Acyuta-rāma-kṛṣṇa-ākhyāḥ* is not found there. However, I found some light on the identity of this short hymn in a Grantha publication of 1895 from Kumbhakonam, issued through the Srividya Press, by the late Narasimha Bhagavatar and Bhattasri Narayana Sastrigal, and re-issued through the Sarada Vilas Press of the same place in 1919. This publication entitled *Śrīdharastutimaṇimālā* presents all the known hymnal contributions of Śrīdhara-Veṅkaṭeśa, and in a verse at the end Narasimha Bhagavatar says that, with the sole exception of the *Gaṅgāṣṭaka* (believed to have been uttered by the Saint and connected with the miracle of his bringing forth the Ganges in the well in the courtyard of his house), he has given in the book all

the *stotras* of Śrīdhara-Venkateśa. There is an *Acyutāṣṭaka* in this collection which has relation to the manuscript under notice here.

The *Acyutāṣṭaka* in Narasimha Bhagavatar's collection has eight verses, the first seven of which are the same as the first seven in our manuscript, though the order of the verses in the latter differs. While the concluding verse of the former is absent from the latter, the last three verses of the latter, which make out a different and distinct identity for it, are absent from the former.

The Curator of the Library kindly supplied me with a transcript of the version in the Trivandrum codex. As this text has differences, though it is mostly corrupt, and as the Grantha publication is not easily available, I present here the text of this rare short *stotra* of Śrīdhara-Veṅkaṭeśa.

[श्रीश्रीधरवेङ्कटेशार्यकृताः

अच्युतरामकृष्णाख्याः]

अभिलपंननिसर्गादच्युताख्ये भजे त्वां

भरसि मदघवृन्दं त्वद्बुभुक्षावशात्[1] त्वम् ।

अघहृदिति तवाम्ब[2] प्रत्युत ख्यातिदोऽहं

त्वयि मम वद का[3] वा सङ्गतिर्दैन्यवाचाम्[4] ॥ १ ॥

---

1. Triv. Ms. विशा
2. „ „ तवां(स ?)
3. „ „ कं
4. „ „ वाचां

[5]अधि[6]रसनमयि त्वामच्युताख्ये दधानं
वनजभवमुखानां वन्द्यमाहुर्महान्तः ।
स तु विनमति मातश्वाश्वगोश्वादनादीन्[7]
भवति ननु विचित्रा पद्धतिस्तावकानाम् ॥ २ ॥

[8]समवहितमपश्यन् सन्निधौ वैनतेयं
प्रसभविधुतपक्षा[9]पाणिरीशोऽच्युताख्ये ।
समवितुमुपनीतस्सामजेन्द्रं त्वया द्राग्
वद जननि विना त्वां केन वा किं कदाभूत् ॥ ३ ॥

[10]जननि मुरभिदाख्ये जाह्नवी निम्नगैका
समजनि पदपद्माच्चक्रिणस्त्वां[11] श्रितानाम् ।
परिणमति समस्ताः पादवार्बिन्दुरेको[12]
जगति ननु तटिन्यो जाह्नवीसब्रह्मचार्यः ॥ ४ ॥

---

5. This verse is No. 5 in the old Grantha publication. The version in the Triv. Ms. has evidently regrouped the verses by their metres.
6. Triv. Ms. अयि
7. " " श्वाश्वगोश्वादनादीन्. The meaning is that the reciter of God's name, being one who has realisation of the unity of all beings in God, sees God even in low beings like horse, cattle, dog and eaters of the flesh of these, even as *Bhāgavata* says :—

   विसृज्य स्मयमानान् स्वान् .... ।
   प्रणमेद्दण्डवद्भूमौ आश्वचण्डालगोखरम् ॥
8. No. 7 in the old Grantha publication.
9. Triv. Ms. पक्षां
10. No. 6 in the old Grantha publication.
11. त्वाश्रितानां in " "
12. Triv. Ms. वार्बिन्दुरेकः

[13]सभायां[14] द्रौपद्यांशुकहृतिभिया[15] तद्रसनया
धृता तस्याश्चेलं प्रतनु[16] तदवस्थं[17] विदधती[18] ।
व्यतानीः[19] शैलाभं व्यसन[20]विसरं[21] चाम्ब हरता-
मियान् गोविन्दाख्ये वद वसनराशिस्तत्र कुतः ॥ ५ ॥

[22]चिरातीता सान्दीपनितनुभुवः कालभवन-
प्रपत्तिस्तं[24] पित्रोः पुनरगमयत्[25] सन्निधिमिति ।
यशः कृष्णस्येदं कथमहह न त्वां रसनया
यदि श्रीकृष्णाख्ये भजति स तदानीं[26] मुनिसुतः ॥ ६ ॥

[27]हरेर्यच्चोरत्वं यदपि च तथा जारचरितं
तदेतत्सर्वांहस्तातिहृतिकृते संकथनतः ।
इतीदं माहात्म्यं मधुमथन ते[28] दीपितमिदं[29]
वदन्त्याः कृष्णाख्ये तव हि विचरन्त्या विलपितम् ॥ ७ ॥

---

13. No. 4 in the old Grantha publication.
14. Triv. Ms. सह्यायां
15. ,, ,, हृदि. Old grantha publication स्मृति. हृति seems to be the correct reading.
16. ,, ,, धृतास्याश्चेलं तव बत
17. ,, ,, तदवस्थां
18. ,, ,, विदधति
19. ,, ,, व्यतानि
20. ,, ,, is correct here; old Grantha publication wrongly reads वसन
21. ,, ,, विसरञ्चाम्ब
22. No. 2 in the old Grantha publication.
23. Triv. Ms. चिरातितासांदीविनि
24. ,, ,, -स्सं
25. ,, ,, -रहमयत्
26. ,, ,, ददानीं
27. No. 3 in the old Grantha publication.
28. Triv. Ms. मधुमथनके
39. ,, ,, दीवित-

[30][यदेष स्तौमि त्वां त्रियुगचरणत्रायिणि ततो
महिम्नः का हानिस्तव तु मम सम्पन्निरवधिः ।
शुना लीढा कामं भवति सुरसिन्धुर्भगवती
तदेषा किंभूता स तु सपदि सन्तापभरितः (रहितः) ॥८॥] (?)

[इति श्रीश्रीधरवेङ्कटेशार्यकृतौ अच्युताष्टकं सम्पूर्णम् ।]

[31]रामाभिधे निजरमण्यनुसन्ध(न्धि ?)तस्त्वां
विद्याधरोऽभजद्; अहं तु भजामि साक्षात् ।
[32]तं त्रातवत्यसि न मां; किमये ततोऽहं
दूनोऽस्मि? तत्र वद कस्तव पक्षपातः ॥ ८ ॥

अयन्ते विश्रान्ति निगमनिकरा यत्र परमां
यदानन्दोदन्वत्पृषतलवतृष्णा विधिमुखाः ।

---

30. Not found in the Triv. Ms. Not clear in lines 1 and 4. Compare Śrīvatsāṅkamiśra's *Śrīstava*, verse 5, where the same idea is expressed:

क्षोदीयानपि दुष्टबुद्धिरपि निःस्नेहोऽप्यनीहोऽपि ते
कीर्तिं देवि लिहन्नहं न च बिभेम्यज्ञो न जिहेमि च ।
दुष्येत्सा तु न तावता; न हि शुना लीढापि भागीरथी
दुष्येत्, श्वापि न लज्जते न च बिभेत्यार्तिस्तु शाम्येच्छुनः ॥

31. These three verses 8, 9, 10 are not found in the old Grantha publication. Verse 8, first half, says that a Vidyādhara was saved by meditating upon the word Rāma indirectly through the word Rāmā meaning 'his own beloved'.

32. Triv. Ms. तत्

33. " " पृषद्

महेशो जिह्वायां क्षणमपि स नैवोज्झितुमलं[34]
नन्वु त्वां रामाख्ये तव मधुरतां वर्णयतु कः ॥ ९ ॥

इत्यच्युताख्या कृष्णाख्या रामाख्या च समीरिता ।
भवार्णवसमुद्धारनाविका **श्रीधरार्यकैः** ॥ १० ॥

इत्यच्युताख्या रामाख्या कृष्णाख्या सम्पूर्णम् (र्णा) ।

हरिः ओं शुभमस्तु हरिः ओम् ।

---

34. Triv. Ms. नैवोरितु-

BOOK REVIEW

THE MAHĀBHĀṢYA OF PATAÑJALI WITH THE PRADĪPA OF KAIYAṬA AND THE UDDYOTANA OF ANNAMBHAṬṬA, PART I, Madras Government Oriental Manuscripts Series, No. 7. Edited by Prof. P. P. S. Sastri and Dr. A. Sankaraṇ. Government Press, Madras, 1948. pp, xx+240. Price Rs. 20-12-0.

The *Mahābhāṣya* of Patañjali is a very important treatise, the most authoritative one, on the Paṇiniyan system of Sanskrit grammar. Two valuable commentaries on it are known, namely the *Bhāṣyapradīpikā* of Bhartṛhari and the *Bhāṣyapradīpa* of Kaiyaṭa of which the latter is the better known. But even the *Pradīpa* is in need of elucidation in several places and among the numerous commentaries written on it, the *Uddyota* of Nāgeśa is the most popular. The present work comprises another valuable commentary on the *Pradīpa* by name *Uddyotana* written by Annambhaṭṭa, the well-known and versatile scholar of the 17th century A. D.

The present volume is the first part of the work and contains the first four *āhnikas* of the first *pāda* of the first *adhyāya* of the *Bhāsya* with the *Pradīpa* and the *Uddyotana*. The *Uddyotana* is here published for the first time and it is a commentary which is clear, elaborate and scholarly Though mainly a commentary on the *Pradīpa*, the author has also offered his remarks on several passages in the *Bhāsya* itself and thus made his work a very valuable guide for understanding the various problems discussed in the *Bhāsya*.

The book is very carefully edited and neatly

printed and the scholars responsible for this edition deserve to be congratulated for bringing out this useful publication An Introduction has been supplied to the work by Mr. T. Chandrasekharan, Curator of the Madras Government Oriental Mss Library, which contains mainly an account of Annambhatta and his works, the special merits of the *Uddyotana* and the relative chronology of Annabhaṭṭa and Nāgeśa. There is an Errata for the part published, but some misprints, especially in the *Uddyotana*, have been left out in it The price of the book is rather prohibitive

S VENKITASUBRAMONIA IYER

Licence No. 644 dated 9-3-1949.

Vol. VI. No. 4. October 1950.

JOURNAL

OF

THE TRAVANCORE UNIVERSITY ORIENTAL MANUSCRIPTS LIBRARY

TRIVANDRUM.



[Annual Subscription Rs. 4]

PRINTED AT THE S. V. G. PRESS,
TRIVANDRUM.

1951.

CONTENTS

॥ श्रीः ॥

नारायणभट्टप्रणीतः

नृगमोक्षप्रबन्धः

तत्रैकदा मनुजवृत्तिमुपाचरिष्णु-
विष्णुः स्वयं पुरवरे मणिमन्दिरान्ते ।
सेवासमामिलदनेकयदुप्रवीर-
सौराज्यलाभरसो निषसाद मोदात् ॥ १ ॥

श्रीः

विवरणम्

वन्दे तद् द्वन्द्वमद्वन्द्वं यत् कारणमकारणम् ।
कामधक् कामधुग् दिव्यमलकानलकालिकम् ॥

तुन्दाभ्यन्तरलीयमानजगतीवृन्दावनात् तुन्दिलं
छन्दाधीनचराचरोदयलयं वन्दारुमन्दारकम् ।
भिन्दानं निखिलान्तरायममलानन्दावबोधात्मकं
विन्दामः शरणं करेणुवदनं वृन्दारकाभिष्टुतम् ॥

अम्बां धूर्तैणमदजम्बालबिन्दुमवलम्बामहे शशिमुखीं
बिम्बाधरामरुणबिम्बायुताभ्युदयसम्बाधबोधिसुषमाम् ।
लम्बालकां श्रितकदम्बाटवीं नतकदम्बार्थकल्पकलतां
शम्बाहिनीं पृथुनितम्बां कृपाकरदृशं बाहुलेयजननीम् ॥

जम्भारिप्रमुखामरेन्द्रमकुटीसम्भारशुम्भन्मणी-
गुम्भाद(म्भ?भ्र)वलन्मयूखलहरीसम्भाविताङ्घ्रिद्वयाम् ।
रम्भागर्भसगर्भ्यनिर्भररुचिं कुम्भाभिरामस्तनीं
सम्भान्तीं हृदि भारतीमभिमतारम्भाय सम्भावये ॥

यो मथ्नन् पाणिनीयामृतजलधिमुपादत्त सर्वस्वसारं
योऽबध्नीत प्रबन्धान् मधुरमधुझरीमृग्यमैत्रानुबन्धान् ।
शेषं साक्षादशेषास्समनुकृतनराकारमाचक्षते यं
सोऽयं नारायणार्यो मम विमलगवीमार्गमादेष्टुमीष्टाम् ॥

सञ्जातं जङ्घनीति प्रसृमरतमसां व्याचरीकर्ति कीर्तिं
सन्देहं दन्दहीति प्रतिकृतिविकृतिं शैमुषीं मोमुषीति ।
श्रीपोषं पोपुषीति प्रतिकलसुखदां वैदुषीं सेदुषी या
वीक्षा शिक्षागुरूणां लगतु मयि कृपाधोरणी धारणी सा ॥

वञ्चीशवंशकलशार्णवपूर्णचन्द्र-
श्रीरामवर्मयुवराज(वरप्रणुन्नः) ।
नारायणीयनृगमोक्षमहाप्रबन्ध-
सोपानकं विवरणं विवरीवरीमः ॥

महाकविप्रणीतत्वात् कृतिरेषा गरीयसी ।
यथामति तथाप्येषा मया व्याख्यायते मितम् ॥

अथ तत्रभवान् नारायणभट्टारको महाकविः

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥"

इत्याद्यालङ्कारिकवचनप्रामाण्यात् काव्यस्य कीर्त्याद्यभिमतानेकफलसाधनतामवधारयन् 'काव्यालापांश्च वर्जयेद्' इति निषेधशास्त्रस्यासत्काव्यगोचरतां च निर्धारयन् नृगमोक्षाख्यं प्रबन्धं प्रबन्धुकामः प्रारिप्सितानन्तरायपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलफलकत्वेन— .

'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्'

इत्याशीराद्यन्यतमस्य प्रबन्धप्रारम्भलक्षणत्वाच्चादौ नृगमोक्षबीजभूतं भगवतः श्रीकृष्णस्य सुखावस्थानरूपं वस्तु निर्दिशन् कथामवतारयति **तत्रेत्या**दिना — **तत्रेति** । तत्र द्वारकायाम् । एकदा एकस्मिन् काले । 'सर्वैक-' इत्यादिना सप्तम्यन्तात् स्वार्थिको दाप्रत्ययः । स्वयमात्मना मनुजवृत्ति मनुष्यधर्ममुपाचरिष्णुः अधितिष्ठन् । उपाङ्पूर्वात् चरतेः 'अलं कृञ्-' इत्यादिना ताच्छीलिक इष्णुच्प्रत्ययः । स्वेच्छयैव लोकानुग्रहाय स्वीकृतनरानुकृतिः न प्राकृतवत् कर्मपारवश्येनेति भावः । विष्णुर्वासुदेवः । मणिमन्दिरैः नवरत्नखचितोपभवनैः अन्ते रम्ये । 'अन्तरेऽवसितौ रम्येऽप्यन्तः' इति विश्वः । पुरवरे भवनश्रेष्ठे । 'अगारे नगरे पुरम्' इत्यमरः । 'दैवाद्वृते वरः श्रेष्ठे' इति च । यद्वा मणिमन्दिरान्ते तत्र पुरवरे इति योजना । तत्र पुरवरे मणिमन्दिरान्ते इति वा योजना । प्रासादे मणिवेद्यां पर्यङ्क इतिवत् । सेवायै भजनाय समामिलद्भिः सङ्गच्छमानैः अनेकैः यदुप्रवीरैः सह यः स्वैरानुलापः स्वच्छन्दमुहुस्सल्लापः तत्र सरसः कुतूहली सन् । 'अनुलापो मुहुर्भाषा' इत्यमरः । मोदात् हर्षाद् निषसाद । 'षद्लृ विशरणगत्यवसादनेषु' इत्यस्मात् नियोगेनासनार्थात् लिट् । 'सदिरप्रतेः' इत्यभ्यासस्य षत्वम् । आदेः परस्य लिट् इति तत्परस्य षत्वनिषेधः । अवतस्थे इत्यर्थः । धातूनामुपसर्गवशात् अर्थान्तरे वृत्तिः । तदुक्तम् —

तदानीञ्च किमिदमिति सकरुणयदुलोकैर्मृदुलहसितलसितेन च

"उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥"

इति ।

अत्रात्मारामस्य भगवतः सेवासमागतयदुवीरस्वैरसल्लापसारस्य सामर्थ्याभिप्रायगर्भस्य मनुजवृत्तिमुपाचरिष्णुरिति विशेषणस्य विन्यासात् परिकरालङ्कारः ।

'अलङ्कारः परिकरः साभिप्राये विशेषणे ।'

इति लक्षणात् । मणिमन्दिरान्ते पुरवर इति समृद्धिमद्वस्तुवर्णनाद् उदात्तालङ्कारः । चारिष्णुर्विष्णुरित्यत्र अनुप्रासश्च । वृत्तं वसन्ततिलकम् ।

'उक्तं वसन्ततिलकं तभजा जगौ गः ।'

इति लक्षणात् । तच्छब्दस्य परमात्मवाचकत्वेन सर्वमङ्गलास्पदत्वाद् आदौ तत्प्रयोगः । तच्छब्दपरमात्मवाचकत्वञ्च स्मर्यते भगवद्गीतायां —

'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।'

इति।

ननु

"देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥"

इति देवतावाचकस्यैव निरवद्यत्वाभिधानात् परमात्मनश्च देवतात्वाभावात् कथं तद्वाचकस्य प्रबन्धमुखे योग्यत्वमिति चेत्, न; 'सेयं देवता ऐक्षत' 'तेजः परस्यां देवतायाम्', 'त्वं वा अहमस्मि भगवो देवता' इत्यादिश्रुतिभ्यः परमात्मनो देवतात्वस्य निर्विवादत्वात् सर्वमनवद्यम् ॥ १ ॥

तदानीमिति । किञ्च तदानीं तस्मिन् काले । 'तदो दा च' इति चकाराद् दानीम्प्रत्ययः । तस्य प्राग्दिशीयत्वेन विभक्तित्वात्त्यदाद्यत्वम् । किमिद-

भगवता दूरादेव विलोक्यमानास्सम्भ्रमविस्मयसूचकचटुलचरणन्यासाः किमपि समुन्मिषितघर्मकणाङ्कितवदनपङ्कजा रौक्मिणेयसात्यभामेयजाम्बवतेयप्रमुखाः सकलयदुकुमाराः सत्वरमुपगम्य भगवन्तमकाण्डकरुणावताराङ्कुरितबाष्पकणाङ्कितनयनकोणं प्राणंसिषुः ॥

मित्यनवधारणेन विमृशद्भिरिति शेषः । सकलयदुलोकैः, न केवलं भगवत्सभावासिभिः । मृदु मृदुलम् । 'कोमलं मृदुलं मृदु' इत्यमरः । हसितं हासः । भावे क्तान्तम् । तेन लसितः शोभितः । लसतेः कर्तरि क्तः । तेन मन्दहासमनोहरेणेत्यर्थः । सर्वज्ञत्वेन परिज्ञातपरमार्थत्वेऽपि मनुष्यलोकविडम्बनाय साकूतमन्दहसितेनेति भावः । सर्वज्ञत्वमेवाह भगवतेति । चकारो भिन्नक्रमः । भगवता चेति । भगवत्त्वञ्च षाड्गुण्यसम्पन्नत्वम् । तथा चोक्तम्—

"प्रवृत्तिञ्च निवृत्तिञ्च भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥"

दूरादेव विलोक्यमानाः सन्दृश्यमानाः । विलोकयतेः कर्मणि शानचि 'सार्वधातुके यक्' इति यक् । 'आने मुक्' इति मुक् । अत्युज्ज्वलत्वादिति भावः । सम्भ्रमः भगवते निवेदयाम्यहं पूर्वमहं पूर्वमिति त्वरा । विस्मयः अदृष्टचरवस्तुदर्शनजनितमाश्चर्यम् । तयोः सूचकाः ज्ञापकाः चटुलचरणयोः मनोहरपादयोः न्यासाः विक्षेपाः येषां ते तथोक्ताः । 'सम्भ्रमस्त्वरा' इत्यमरः । "विस्मयोऽद्भुतमाश्चर्यम्' इति च ।

'मनोज्ञे चाटु चटुलं सुन्दरं चारु पेशलम्' ।

इति वैजयन्ती । किमपि बहु समुन्मिषितैः समुद्भूतैः । मिषतेः कर्तरि क्तः । घर्मकणैः स्वेदलवैः अङ्कितानि चिह्नितानि वदनपङ्कजानि मुखारविन्दानि येषां ते तथोक्ताः । 'घर्मो निदाघः स्वेदः स्यात्', 'लवलेशकणाणवः' इति चामरः । रौक्मिणेयः प्रद्युम्नः । सात्यभामेयः सुन्दरः । जाम्बवतेयः साम्बः । सर्वत्र 'स्त्रीभ्यो ढक्' इति ढक् । एते प्रमुखाः प्रधानानि येषां ते तथोक्ताः ।

किन्नु भवतामद्भुतमुद्भूतमिति पृष्टवन्तमेनं प्रत्यवादिषुः ॥

वयं खलु ताताद्य प्रातराशिनः प्रीतचेतसो नातिदूरविपिनान्तरेषु स्फीततरसम्पत्प्रथिमवशात् प्रमदवनप्रतिमानेषु प्रागदृष्टचरानपि

'क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः' ।

इत्यमरः । सकलयदुकुमाराः अकाण्डे यः करुणावतारः दयोदयः तेन अङ्कुरिताः सञ्जाताङ्कुराः । तारकादित्वादितच् । बाष्पकणाः बाष्पजलबिन्दवः तैरङ्कितौ नयनकोणौ कटाक्षौ यस्य तं भगवन्तं सत्वरमुपगम्य प्राणंसिषुः प्रणामं चक्रुः । प्रपूर्वात् नमतेः लुङ् । परस्मैपदे 'उपसर्गादसमासेऽपि णोपदेशस्य' इति नकारस्य णकारः । 'यमरमनमातां सक् च' इति सगिटौ । मुखपङ्कजानीत्यत्रोपमालङ्कारः ॥

अनन्तरं भगवता अनुयुक्ताः प्रत्यवदन् इत्याह— **किन्विति** । भवतां युष्माकं किमद्भुतमाश्चर्यं उद्भूतं सञ्जातम् । नु इति पृच्छायाम् । 'नु पृच्छायां विकल्पे च' इत्यमरः । इति इत्थं पृष्टवन्तं कृतप्रश्नम् । पृच्छतेः कर्तरि निष्ठायां 'ग्रहिज्या-' इत्यादिना सम्प्रसारणे व्रश्चेति षत्वे 'ष्टुना ष्टुः' इति ष्टुत्वम् । एनं श्रीकृष्णं प्रत्यवादिषुः प्रत्यवोचन् । प्रतिपूर्वाद् वदतेः लुङि परस्मैपदम् । 'वदव्रज —' इति वृद्धिः । अत्रापि यदुकुमारा एव कर्तारः ॥

प्रतिवचनप्रकारमाह— **वयमिति** । हे तात जनक, 'तातस्तु जनकः पिता' इत्यमरः । अद्य खलु अस्मिन् दिवसे । 'सद्यः परुद्' इत्यादिना निपातनात् साधुः । वयं प्रातरश्नन्तीति प्रातराशिनः । 'सुप्यजातौ' इति ताच्छील्ये णिनिः । कृतप्रातर्भोजनाः प्रीतचेतसः सन्तुष्टचित्ताः नातिदूरेषु अत्यन्तं स्फीताः प्रवृद्धाः स्फीततराः । स्फायतेर्निष्ठायां 'स्फायः स्फी निष्ठायाम्' इति स्फ्यादेशः । ततस्तरप् । तास्सम्पदः पुष्पफलसमृद्धयः तासां प्रथिमा पृथुत्वम् । पृथ्वादित्वादिमनिचि 'रऋतो हलादेः' इति रभावः । तस्य वशात् प्रमदवनप्रतिमानेषु अन्तःपुरो-

प्रदेशान् प्रदरीदर्शितुकामाः प्रचुरकौतुकात् प्रचरन्तः प्रतिकलकलित-विहरणरसपरिश्रमवशात् प्रभूतां पिपासामुपासीदन्तः प्रतिदिशं प्रहित-लोचनाः प्रहिमिव कश्चिददूराद्लोकिष्महि ॥

ततश्च त्वरमाणा वयं परिहीणसत्त्वसञ्चारस्य तस्य कूपस्य प्रमुषित-प्रायोपनाहं पीनाहदेशमासाद्य विलोकयमानाः —

धानतुल्येषु नातिदूरेषु आसन्नेषु । नञर्थस्य नशब्दस्य 'सुप्सुपा' इति समासः विपिनान्तरेषु वनमध्येषु प्राक् पूर्वं अदृष्टचरान् अदृष्टपूर्वान् । भूतपूर्वे चरट् । प्रदेशान् । यद्वा प्रागदृष्टचरानित्येकं पदम् । प्राग्भिः पूर्वैः अदृष्टचरानित्यर्थः । प्रदरीदर्शितुकामाः अतिशयेन द्रष्टुकामाः । प्रपूर्वात् पश्यतेर्यङो लुकि द्वित्वे अभ्यासस्य रिगागमः । ततस्तुमुन् । 'तुं काममनसोरपि' इति मकारलोपः । प्रचुरकौतुकाद् अतिकुतूहलात् प्रचरन्तः प्रतिकलं प्रतिक्षणं कलिते कृते विहरणे विहारे यो रसः तेन यः परिश्रमः तस्य वशाद् आयत्तत्वात् । 'वश आयत्तता-तायाश्च' इति विश्वः । प्रभूतां बहुलाम् ।

'प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।'

इत्यमरः । पिपासां पातुमिच्छाम् । पिबतेः सन्नन्ताद् अप्रत्ययः । तत-ष्टाप् । 'उदन्या तु पिपासा तृड्' इत्यमरः । उपासीदन्तः प्रापन्तः । उपा-सीदतेश्शतरि 'पाघ्रा-' इति सीदादेशः । प्रतिदिशं दिशि दिशि । 'अव्ययं विभक्ति-' इत्यादिना विभक्त्यर्थेऽव्ययीभावः । 'अव्ययीभावे शरद्-' इति टच् । प्रहितानि प्रेषितानि लोचनानि यैस्ते तथाभूतास्सन्तः अदूरात् प्रहिं कूपमिव 'पुंस्येवान्धुः प्रहिः कूपः' इत्यमरः । कश्चिदगाधभूगर्तं अलोकिष्महि अद्राक्ष्म । 'लोक दर्शने' इत्यस्माल्लुङ् ॥

ततश्चेति । ततश्चानन्तरं च त्वरमाणाः । 'ञित्वरा सम्भ्रमे' इत्यस्माल्लट-श्शानचि मुगागमः । शीघ्रं गच्छन्त इत्यर्थः । वयं परिहीणः परित्यक्तः । परि-पूर्वाज्जहातेर्निष्ठायां 'घुमास्था' इतीत्वे 'ओदितः' इति नत्वे च 'कृत्यचः' इति

तोयं नास्मिन् निरैक्षिष्महि हहह पुनः कूपगर्भे कथञ्चि-
न्मान्तं ध्वान्ते महान्तं गिरिमिव च कमप्यन्तरद्राक्ष्म जन्तुम् ।
सूक्ष्मेक्षायां त्वजानीमहि कुटिलवलत्पुच्छमन्धान्धुदेशे
गाढव्याढौकितं तं जरठसरटकप्रौढमूढानुकम्पाः ॥ २ ॥

णत्वम् । सत्त्वसञ्चारः प्राणिसञ्चारो येन ताद्दशस्य तस्य कूपस्य प्रमुषितो लुप्तः पीनाहो मुखबन्धनमस्य यदिति च । विलोकयमानाः पश्यन्तस्सन्तः ।

तोयमिति । वयमस्मिन् कूपे तोयं न निरैक्षिष्महि न द्दष्टवन्तः । 'ईक्ष दर्शने' इत्यस्मात् कर्तरि लुङ् । हहहेति खेदे । 'हहहेत्यद्भुते खेदे' इत्यमरः । पुनः किन्तु कूपगर्भे अन्तः मध्ये ध्वान्ते अन्धकारे कथञ्चित् कृच्छ्रेण मान्तं मानं कुर्वाणम् । 'मा माने' इत्यस्मादादादिकादकर्मकात् कर्तरि लटः शतृ । महान्तं पृथुलं गिरिं पर्वतमिव स्थितमित्युत्प्रेक्षा । कमप्यनिर्धारितविशेषं जन्तुं प्राणिनं अद्राक्ष्म । 'द्दशिर् प्रेक्षणे' इत्यस्मात् कर्तरि लुङि च्लेरङभावपक्षे 'न द्दशः' इति क्सस्य निषेधात् 'सृजिद्दशोः' इत्यमागमे 'वदव्रज–' इति वृद्धिः । चशब्दः समुच्चये । ऊढा धृता अनुकम्पा यैस्ते । हन्त महानयं जन्तुः कूपपतित इति सञ्जातकारुण्या इत्यर्थः । वयमिति शेषः । सूक्ष्मेक्षायां सावधानावलोकने तु कुटिलं वक्रं यथा तथा वलत् संवृण्वत् पुच्छं लाङ्गूलं यस्य तम् । वलदित्यत्र 'वल संवरणे' इत्यस्माल्लटः शता । अनुदात्तेत्वलक्षणात्मनेपदानित्यत्वस्य चक्षिङो ङित्करणेन ज्ञापितत्वात् । अन्धयतीत्यन्धः । पचाद्यच् । स चासावन्धुश्चेति कर्मधारयः । तस्य देशे गाढं यथा तथा व्याढौकितं द्दढसम्बद्धमित्यर्थः । ढौकतेर्गत्यर्थात् कर्तरि क्तः । तं प्रागनवधारितविशेषं जन्तुं जरठसरटकप्रौढं वृद्धकृकलासवर्यं अजानीमहि निरचिनुम । ज्ञा अवबोधने' इत्यस्मात् लङि 'अनुपसर्गाज्ज्ञः' इत्यात्मनेपदे 'ज्ञाजनोर्जा' इति जादेशः । अत्र ध्वान्ते मान्त-मित्यनेन कूपस्य दूरीकृतालोकतयातिदूरता व्यज्यते । सूक्ष्मेक्षायान्त्वजानीमही-त्यनेन गाढान्धकारेऽप्यालोकविषयत्वेन सरटकस्यातितेजस्विता व्यज्यते । स्रग्धरावृत्तमेतत् ।

'म्रभ्नैर्यानान्त्रयेण त्रिमुनियतियुता स्रग्धरा सा प्रसिद्धा' ।

इति लक्षणात् ॥ २ ॥

प्रीतिकरी । तदुक्तम् —

'नान्दीप्रयोगे तु कृते प्रीतो भवति चन्द्रमाः ।'

इति । उच्यते — मङ्गलात्मिका नान्दीत्युक्तं, मङ्गलाचरणेन विघ्नाः शाम्यन्तीति घण्टापथः । अत एव च 'नान्दी विघ्नप्रशान्तये' इत्युक्तम् । तस्माद् भरतविरुद्धं नैतन्नान्दीग्रहणम् । अथवा नान्दीति रङ्गपूजा कथ्यते । यदाहुः — 'नन्दी वृषस्सोऽथ महेश्वरस्य' इत्यादि ।

"नन्दी वृषो वृषाङ्कस्य रङ्गोऽभून्नृत्यतः पुरा ।
अतस्तदाख्यया नान्दी रङ्गपूजा प्रकीर्तिता ॥"

इति । पूजायां देवतास्तुतिमङ्गलायतनं च भवति । ततो नान्द्यन्ते रङ्गपूजान्ते प्रस्तावकप्रवेश[1] इति सेत्स्यति ।

अत्र पुनस्ततश्शब्दोऽविलम्बितानन्तर्यद्योतनार्थः, नान्द्यवसानेऽविलम्बितं स्थापकः प्रविशेदिति । तदभावे तदानन्तर्यमर्थसिद्धम् । प्रविशतिपदस्य वर्तमानार्थो विध्यनुषक्तः । तत्र वर्तमानत्वं नटपरम्परयानुष्ठानात्, विध्यनुषङ्गो नान्द्यन्ते कर्तव्यत्वात् । विशतेः पुनः कर्म रङ्गमित्यर्थाल्लभ्यते । सूत्रं नाट्यशास्त्रं धरत इति सूत्रधारः । 'धृञ् धारणे' इत्यस्मात् कर्मण्यण् । सूत्रं तदर्थाभिव्यञ्जिकां वाचं धत्ते इति सूत्रधार इति तु शिष्टम् ।

'सूत्र — [नेपथ्याभिमुखमवलोक्य] आर्ये यदि नेपथ्यविधानमवसितं तदितस्तावदागम्यताम्' इति । सूत्रधारपदस्य प्रतीकोपादानं यथा 'वैशं-' इति वैशंपायनस्य । तत्र प्रविष्टस्स इत्यर्थाल्लभ्यते अन्यस्याप्रसङ्गात्, अवलोक्येत्यत्र आहेति च; क्त्वाप्रत्ययस्योत्तरक्रियापेक्षत्वात् क्रियाविशेषस्यानन्तरप्रवृत्त्या गम्यमानत्वाच्च । न चेदमार्ये[2]

---

१. Ms. प्रस्तावप्रवेशः.
२. Ms. चिह्न.

इत्यादिवचनं कवेः स्यात्, तस्य नव्याह्वानासम्भवात् । आगम्यता-मित्यत्र (भवत्या) इत्ययोंऽप्यर्थात्सिध्यति, वचनप्रकारभेदवत्त्वात् । अतः प्रविष्टस्य सूत्रधारो नेपथ्याभिमुखमवलोक्येत्याह आर्ये यदि नेपथ्य-विधानमवसितं तदितस्तावद् गम्यतामितीत्यर्थात् सम्पद्यते । क्वचि-दितस्तावदित्येव दृश्यते, तत्र प्रविशेत्यर्थमिद्धम् । क्वचिन्नान्द्यन्ते सूत्र-धारः प्रविश्येत्येवमपि दृश्यते । नृपथ्यस्येदं नेपथ्यं, नटानां वर्णिका-परिग्रहार्थं संवृतो रङ्गैकदेशः । नेपथ्यमत्र विशिष्टो निजवेषः, नान्यानुकरणार्थः । प्रस्तावनायां सूत्रधारनटीपारिपार्श्विकविदूषकाणामनु-कार्यत्वाभावात् ।

[नान्द्यन्ते ततः प्रविशति सूत्रधारः ।] सूत्र - या सृष्टिः स्रष्टु-राद्येत्यादि सन्निवेशेऽप्युक्तप्रकरण सम्बन्धो द्रष्टव्यः । अय तु विशेषः इत्यर्थः । स्पष्ट श्लोकावसाने तत इत्यर्थातिवद्धो न पदेन । ततो नैपथ्याभिमुखमवलोक्याहेति । या सृष्टिरित्यादि । स्रष्टुः आद्या सृष्टिरापः । अत्र मनुः —

'अप एव ससर्जादौ तासु वीर्यमवासृजत्'

इति । श्रुतिः श्रोत्रेन्द्रियं, तस्य विषयः शब्दः, स एव गुणो यस्याः । येति स्त्रीलिङ्गनिर्देशः तन्त्वपेक्षया । इतिशब्देन प्राति-पदिकार्थस्य व्यवच्छिन्नत्वात् सर्वभूतप्रकृतिरित्यत्र प्रथमा । या सृष्टिः स्रष्टुराद्येत्याद्युक्ते अवनियजमानादीनां स्फुटप्रतीतेरिह प्रसादो गुणः । तदुक्तम् —

'यत्तु प्राकट्यमर्थस्य स प्रसाद इति स्मृतः ।'

इति । प्रपन्नः निष्पन्नः अवतु रक्षतु । अवनं चात्र अभीष्टफल-

१. Ms. कवेस्तात्स्य नाव्याह्वान.

२. Some portion seems to be missing after this.

३. Ms. तदयुक्तम्.

लाभं प्रति सहायकरणं, अन्यथा कथमस्माकं श्रेयो भवेदिति भावः । युष्मान् सामाजिकान्, तेषामेव सम्बोधनयोग्यत्वात् । सम्बोधनसारो हि युष्मदर्थः । ईश इत्यनेन रक्षणाधिकारित्वमुक्तम् । अष्टाभिस्तनुभिः प्रपन्नः अष्टमूर्तिरित्यर्थः । अनेन ईश्वरस्य प्रपञ्चात्मत्वं ईश इत्यनेन प्रपञ्चादुत्तीर्णरूपत्वं च प्रकाश्यते इत्युभयात्मकत्वमागमसिद्धम् । किञ्च प्रत्यक्षाभिस्तनुभिः प्रपन्न इत्यनेन एवंभूतोऽयं कथमप्रत्यक्ष इत्युच्यते इति द्योत्यते । अत्र भवविषयो भावोऽभिव्यज्यते । यथाह —

'[१]रतिर्देवादिविषया व्यभिचारी तथाञ्जितः[२] ।
[३]भावः प्रोक्तः'

इति ।

क्वचित्पुनः स्थापकवचनोपक्रमे 'अलमतिविस्तरेण' 'अलं प्रविस्तरेण' इति कथ्यते । यथा वेणीसंहारे देवदारिकादौ तेन स्वाभिमतनाट्यप्रयोगविलम्बो मा भूदिति वक्ष्यमाणार्थविषयवचनं विनिवार्यते ।

ननु सूत्रधारनट्यादीनां[४] वेषो[५] निज एव अनुकार्यत्वाभावादित्युक्तम् । ततो भाषापि निजैव स्यात् । सा खल्वेषां देशभाषा न संस्कृतम् । ततः कथं सूत्रधारस्य संस्कृतभाषा भवेत्, नट्याः प्राकृतं वा । उच्यते—तत्र सूत्रधारस्य तावत् संस्कृतभाषणं नाट्ये विहितम् । यथाह —

"राजविप्रविटामात्यसुभटा[६]धीतयोषिताम् ।
नटनर्तकधूर्तानां संस्कृतं पाठ्यमुच्यते ।।"

---

१. Ms. रतीर्देवादि.
२. Ms. तथाञ्जितः.
३. Ms. देवः.
४. Ms. नाट्यादीनां
५. Ms. विशेषो.
६. Ms. सुभटाधिकं.

इति । पारिपार्श्विकस्य बालरामायणे प्राकृतं दृश्यते, विक्रमोर्वशीयादौ संस्कृतम् । चारुदत्ते पुनस्सूत्रधारस्यापि प्राकृतं दृश्यते; तच्चिन्त्यम् । कर्पूरमञ्जर्यां तस्येदं युक्तम्, सट्टकस्य प्राकृतात्मकत्वात् ।

आर्ये इत्यादरविशिष्टेनाह्वानेन तस्यां रागबहुमानादयः प्रकाश्यन्ते । अत एव यदि नेपथ्यविधानमवसितं इत्यौचित्यपुरस्कारेण नटिसमाह्वानं कृतम् । औचित्यमेव हि सर्वत्र रससर्वस्वम् । उक्तं च ध्वनिकृता—

"अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥"

इति । तत्तर्हि आगम्यतामिति प्राप्तकाले लोट्, तवागमनस्य कालः प्राप्त इत्यर्थः । तावच्छब्दो वाक्यालङ्कारे । क्वचिदितस्तावदित्येव दृश्यते, तत्रागम्यतामित्यर्थाल्लभ्यते ।

प्रविश्य नटीति । अत्रापि पूर्वं तत इति पश्चादाहेति चार्थसिद्धम् । अय्य, इयं ह्मीति । आर्य इयमस्मि, मया किं क्रियतामिति शेषः । नट्याः प्राकृतं पाठ्यं, यत उक्तम्—

"स्त्रीणां तु प्राकृतं प्रायश्शौरसेन्यधमेषु च ।
पिशाचात्यन्तनीचानां पैशाचं मागधं तथा ॥"

इति । इयं ह्मि इत्यस्यावसाने इतिशब्दोऽर्थसिद्धः । एवमुपरिष्टादपि द्रष्टव्यम् । तथा इदं कविवचनं इदं कविनिबद्धवक्तृवचनम् इत्ययं वचनविभागोऽपि तत्र तत्रौचित्येन पर्यालोचनीयः । त्रैविक्रमे तु सूत्रधारेणैव सह नट्याः प्रवेशः कथ्यते 'ततः प्रविशति सूत्रधारः सह प्रियया' इति । तन्न चतुरश्रम् । सूत्रधारेण प्रस्तुताक्षेपिस्वकार्यविमर्शार्थं समाहूतानां नटीप्रभृतीनां पृथक् प्रवेशो युक्तः ।

अथेह तादृशकार्याभावात् सहप्रवेश इति मन्यते । तत्साधु, सूत्रधारस्य नाट्यप्रयोगात्मकं प्रस्तुतं वस्तु नास्ति तदाक्षेपकं स्वकार्यवचनं च नास्तीत्यपूर्वमेतत् । क्वचित् पुनः 'नान्द्यन्ते ततः प्रविशति सूत्रधारः । सूत्र — आर्ये, तृतीये खलु चित्रपटे' इत्यादि दृश्यते । तत्रापि सहप्रवेशः सिद्धः; अन्यप्रवेशाकथनात्, नटी नटीत्यन्तरा पात्रनिर्देशात्, तस्याश्च[1] वचनोपलम्भाच्च ।

आर्ये अभिरूपभूयिष्ठा इत्यादि । एतत् सूत्रधारस्य नटीं प्रति प्रस्तुताक्षेपि स्वकार्यवचनमेव खलु । अत्र वक्तव्यम् —

"सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ।
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥"

इति । तत्र विक्रमोर्वशीयादौ मारिषं प्रत्यस्य स्वकार्यवचनं, भगवदज्जुकादौ विदूषकं प्रति, अत्र नटीं प्रति । ननु दूतघटोत्कचादौ नट्यादिरहितेन सूत्रधारेणैव स्थापना क्रियते । एकाङ्करूपकेष्वेवमिति चेत् कथं कल्याणसौगन्धिकादौ अनेकाङ्केष्वप्येवं दृश्यते, कथं पञ्चरात्रे । अनाटक एवमिति चेत् कथं बालचरिते । यद्येवमयं प्रकारोऽस्ति किन्तु एष न साधीयान्, वचनविरोधात् । अभिरूपभूयिष्ठा अभिरूपा विद्वांसः ।

'प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः ।'

इति सिंहः ।

अध्यस्स इत्यादि । परिहावइस्सदि इति पाठः । किमपि न परिहीनं भविष्यतीत्यर्थः ।

कथयामीति । भूतार्थं परमार्थम् ।

आ परितोषादित्यादि । परितः सर्वतो रोमाञ्चमन्दस्मितादि-

1. Ms. तस्य च.

रूपेण परिवाहनीत्या बहिः प्रकाशमानो रसास्वादनसमुद्भूत आनन्द-स्तोषः परितोषः । अभिविधावाङ् । विदुषामिति बहुवचनेन परितोषस्य व्याप्तिर्दर्शिता । साध्विति बोद्धव्यम् । प्रयोगविज्ञानं प्रयोगस्य चतुर्विधाभिनयरूपस्य रसास्वादननिमित्तभूतस्य विज्ञानं शिल्पं कौशलं क्रियाभ्यासपूर्वको ज्ञानविशेषः । एतत् समर्थयति — बलवदिति ।

'बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे ।'

इत्यमरः । अप्रत्ययं विश्वासरहितम् । विश्वासश्च शिक्षाविषयः ।

'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु ।'

इति सिंहः । अत्र मतिर्भावः । अभ्यासाभावे न प्रयोगविज्ञान-साधुतास्वलक्षणग्रहणात् । तदुक्तम् —

'भ्रान्तिज्ञानोपदेशाभ्यां शास्त्रादेस्तत्त्वधीर्मतिः ।'

इति ।

सुभगसलिलेति । प्रच्छायं, 'छाया बाहुल्ये' इत्येकवद्भा-वान्नपुंसकता । अत्र शृङ्गारो रसः । ग्रीष्ममधिकृत्येति । अधिकृत्य प्रस्तुत्यारभ्येत्यर्थः । अनेनात्र गीतं निबद्धरूपमिति सिद्धं भवति । अनिबद्धनिबद्धभेदेन द्विधा खलु गीतम् । निबद्धस्याङ्गं पदम् । यथाहुः —

"नेत्रे करौ च पादौ च षडङ्गानि यथा तनोः ।
पदतेनौ च बिरुदपाटौ[1] तालस्वरौ तथा ॥
अङ्गान्येतानि षट् प्राहुः प्रबन्धस्य यथाक्रमम् ।"

इति ।

---

१. Ms. विरुतपादौ.

'पदं स्वराधिकरणमर्थस्य प्रतिपादकम् ।'

इति । स्वरग्रामजातिरागगीतानां परस्परं भेदः । सामवेदात् सम्भूताः सप्त स्वराः, स्वरतो ग्रामाः, ततो जातयः, जाते रागाः; तेषां ध्वन्यात्मकत्वं, गीतस्य वर्णात्मकत्वम् ।

तह । तथेत्यभ्युपगमे । इसिचुंबिएत्यादि ।

> इषच्चुम्बितानि भ्रमरैस्सुकुमारकेसरशिखानि ।
> अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि ॥

नवत्वाच्चुम्बनं, तस्येषत्त्वं सुकुमारत्वात् । दयमाना आदरेणेत्यर्थः । अत्रापि शृङ्गारः । गाथाप्रकारश्चायम् । तदुक्तं ज्ञानाश्रय्याम्[1] — 'पञ्चस्वनुष्टुबादिषु सा गाथा भवति । पादैश्चतुर्भिष्षड्भिर्वा । सा गाथा चतुर्भिर्वा षड्भिर्वा पादैस्सजातीयैर्विजातीयैर्वा भवति' इति ।

अहो इत्याश्चर्ये । तथाविधगानैकतानतया चित्रार्पित इव । सर्वतस्सर्वत्र । रङ्गशब्देन रङ्गस्थो जनो लक्ष्यते । सर्वेषामपि स्तैमित्यप्रतीतिः प्रयोजनम् । कतमत्प्रयोगकरणेनेत्यनेन अस्यापूर्वनाटकप्रयोगकरणोद्यमः सूचितः । एनं रङ्गस्थविशिष्टविद्वज्जनम् । आराधयामः प्रीणयामः ।

अभिज्ञानशकुन्तलमिति[3] । अभिज्ञानं शकुन्तला च अभिज्ञानशकुन्तलम् । 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इत्येकवद्भावः । अभिधेयेनाभिधायकस्य व्यपदेशादभिज्ञानशकुन्तलम् । नामेति प्रकाशे । नाटकमिति रूपकप्राधान्यमुक्तम् । 'अधिकृत्य कृते ग्रन्थे' इत्यणि आदिवृद्धौ आभिज्ञानशकुन्तलमिति स्यात् । 'शिशुक्रन्दयमसभद्वन्द्व'—

---

१. Ms. ज्ञानाश्रय्यां.
२. Ms. पदैः.
३. Ms. अभिज्ञानशाकुन्तलमिति.

इत्यादिना छप्रत्यये रूपान्तरप्रसङ्गः । शाकुन्तलमित्यपि भवति 'अधिकृत्य कृते ग्रन्थे' इत्यण् । अभिज्ञानशकुन्तलेत्यपि भवति नैतत्, तथा रूपं हि ग्रन्थप्रत्ययस्य लुपि सम्भवेत् । लुप्त्वाख्यायिकाविषयः, लुबाख्यायिकाभ्यः प्रत्ययस्य बहुलमिति । अथवा अभिधेयाभिधायकयोर्[1]भेदव्यपदेशात्तथापि स्यात् ।

तत्रासीति । असीत्यव्ययमहमर्थे । नन्वत्र सूत्रधारेण कार्यसूचको रङ्गप्रसादनश्लोको वक्तव्यः । 'रङ्गं प्रसाद्य मधुरैः' इत्यादिकथनात् । पुनः भारतीवृत्तिः प्रयोक्तव्या, 'भारतीं वृत्तिमाश्रयेद्' इत्युक्तेः । तस्याश्चत्वार्यङ्गानि प्ररोचना, वीथी प्रहसनम् आमुखं चेति । तत्र वीथ्यङ्गानि त्रयोदश उद्घात्यकावलगितादीनि । प्रहसनं त्रिधा शुद्धवैकृतसंकरभेदेन । आमुखस्य त्रीण्यङ्गानि कथोद्घातः प्रवर्तकं प्रयोगातिशयश्चेति । एतानि पृथक् दर्शनीयानि । उच्यते — भारत्यङ्गत्वेऽपि वीथीप्रहसने प्रस्तावनाङ्गं न भवतः । कथमिव नाट्यं नाट्यस्यारम्भभागो भवेत् । इतरथा नाटकादिप्रस्तावनायामङ्गत्वेनोपात्तयोर्वीथीप्रहसनयोरपि आरम्भभूतप्रस्तावनायामङ्गत्वेनान्ये वीथीप्रहसने स्याताम् । तयोरप्युपक्रमे तथैवान्ये तयोरपि तथेति पर्यवसानवैधुर्येण प्रागारब्धनाटकादेरनुदय एव स्यात् । वीथ्यङ्गानि त्वामुखाङ्गानि स्युः । तदुक्तम् —

'वीथ्यङ्गान्यामुखाङ्गत्वादुच्यन्तेऽत्रैव तत् पुनः ।'

इति । कथोद्घातादित्रयं चेति षोडशाङ्गानि प्रस्तावनायाः । तत्र कथोद्घातप्रयोगातिशययोरप्येकत्र न समावेशः । अन्यथैव कथापात्रप्रवेशसिद्धेः । वीथ्यङ्गेष्वप्यन्यप्रस्तावान्यकार्यलक्षणावलगितस्य प्रयोगातिशयस्य च न समावेशः, उभयोरप्येकरूपत्वात् । अतः पञ्चदशैवाङ्गानि सम्भवन्ति । एषु पुनरत्र प्ररोचना नास्ति, कविना-

1. Ms. रभेवद्व्यप.

यकप्रेक्षकप्रयोक्तृप्रशंसाभावात् । कालिदासग्रथितवस्तुना नवेन नाटकेनेति रूपस्थानसाधनमात्रकथनम्, न कविप्रभृतेर्गुणकीर्तनम् । वीथ्यङ्गेष्ववलगितभेदः, आमुखांशेषु प्रयोगातिशयो वास्ति 'एष राजेव दुष्यन्तस्सारङ्गेणातिरंहसा' इति ।

> "यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते ।
> प्रस्तूयतेऽन्यत्र वान्यत् तच्चावलगितं द्विधा ॥"

इति वचनात्,

> "एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः ।
> पात्रप्रयोगो यत्रैष प्रयोगातिशयस्तु सः ॥"

इति वचनाच्च । अन्यान्युद्घात्यकादीनि न सन्ति, प्रवर्तकं च नास्ति ।

नन्वत्र प्रस्तावनाङ्गेषु षोडशस्वेकमेवाङ्गमस्ति नान्यानीति किमेतत्, अन्यानि कस्मान्न सन्ति । उच्यते— एषां न समुच्चयः, किन्तु विकल्प एव । एष्वेकेन वा द्वाभ्यां वा त्रिभिर्वा चतुर्भिर्वा यथायोगं प्रस्तावना भवति । तथा हि विक्रमोर्वशीये प्ररोचनैवास्ति, नान्यान्यङ्गानि । मालविकाग्निमित्रे नागानन्दे च प्ररोचनाप्रयोगातिशयावेव । रत्नावल्यां प्ररोचनाकथोद्घातौ । अनर्घराघवे प्ररोचनावाक्केलिप्रयोगातिशयाः । एवमन्यत्राप्यङ्गविकल्पोऽवसातव्यः । तदुक्तम् —

> 'एषामन्यतमेनार्थं पात्रं वाक्षिप्य सूत्रभृत् ।
> प्रस्तावनान्ते निर्गच्छेद्'

इति ।

मङ्गलश्लोक एव रङ्गप्रसादनश्लोकः । तथाच 'रङ्गं प्रसाद्य मधुरैः श्लोकैः' इत्यर्धेन श्लोकै रङ्गं प्रसादयेदित्युक्तम् । बहुवचनमविवक्षितम् । श्लोकानां काव्यसूचकत्वमनियतम् । कथं ज्ञायते ।

आप्तवचनादेव ज्ञायते । तथाहि—

"कुर्याच्चानन्तरं तत्र देवब्राह्मणसंश्रयम् ।
स्फुटश्लक्ष्णपदैः श्लोकैः नानारससमन्वितैः ॥
रङ्गं विजह्य च ततः काव्यश्रवणकारणात् ।
तत्तत् प्रस्तावयेत् काव्यमुपक्षेपपुरस्कृतम् ॥"

इति । साहित्यसारेऽप्युक्तम्—

"अनवद्यपदैः पद्यैस्सदा सभ्यान् प्रसादयेत् ।
ऋतुमासाद्य यं कश्चित् भारतीं वृत्तिमाश्रयेत् ॥"

इति । अत्र कुत्रापि पद्यानां काव्यार्थसूचकत्वं नोक्तम् । तर्हि भवतु ऋतुश्लोकस्य काव्यार्थसूचकत्वमिति चेत् तदप्यनियतम्, अन्यथापि दर्शनात् । ननु बहुरूपकाचार्येणास्य श्लोकस्योदाहरणत्वेन 'सत्पक्षा मधुरगिरः' इति श्लोको दर्शितः, ततो ज्ञायते ऋतुश्लोक एव रङ्गप्रसादनश्लोकः, स काव्यार्थसूचकश्चेति । मैवम्, ऋतुश्लोक एव रङ्गप्रसादनश्लोक इति न युक्तम्, 'रङ्गं प्रसाद्य' इत्यनेन रङ्गप्रसादनतूपादानयोः पौर्वापर्येण भेदप्रतिभासात् । अतः 'सत्पक्षा मधुरगिरः' इति श्लोक ऋत्वाश्रयत्वेनोदाहृतः, न रङ्गप्रसादनत्वेन । स पुनः 'निष्प्रत्यूहम्' इत्यादिना पूर्वं दर्शित इति बहुरूपकाभिप्रायः । ऋतुश्लोके काव्यार्थसूचकत्वमनियतमित्यपि तस्याशयः, लक्ष्यानुरोधादित्यलमनेन ।

अत्र भारतीवृत्तिसमाश्रयणाद्वाचिकं प्रधानं, नाङ्गिकं नापि कथानटनं, तथा मङ्गलश्लोकेऽपि । यत् पुनरत्र कचित् सूत्रधारेण प्रविश्य मङ्गलश्लोकमवष्टभ्य नृत्तं कथानटनं च बहलबहलं क्रियते यच्च नटीप्रभृतिप्रसङ्गाभावः तस्य कियती साधुतेत्यत्र नाट्यविदः प्रमाणम् ।

एष राजेति । एष इति दृष्ट्वा वदति श्रुत्वा वा स्मृत्वा वा । कथं दर्शनम् । 'तवास्मि गीतरागेण हारिणा प्रसभं हृतः' इत्युक्तेः । दुष्यन्त-

भूमिकां गृहीत्वा स्ववर्ग्यो नटो नैपथ्यशालाया रङ्गाभिमुखमागतः। ततो दुष्यन्तसदृशदर्शनं दुष्यन्तदर्शनं सञ्जायते। कथं श्रवणम्। तस्मिन्नेवोक्तः। नैपथ्ये दुष्यन्तस्य प्रावेशिकीध्रुवागीतिकां श्रुत्वा प्रविशन्तं दुष्यन्तानुकर्तारमाकलय्य एष इति निर्देशः। तथा तच्छ्रुत्वा स्मृत्वापि सम्भवति। तदुक्तं साहित्यसारे—

"सर्वमुक्त्वाथ वक्तव्यमन्ते[1]प्रस्तावनाविधेः।
सूत्रधारः स्वयं गच्छेदागच्छत्पात्रमन्तिके॥
सूचितं ध्रुवया गीत्या श्रुत्वा स्मृत्वा समीक्ष्य वा।"

इति। अत्र पुनर्ध्रुवागानमर्थसिद्धम्। अनर्घराघवादौ 'दिणअरकिरणुक्करो' इत्यादिना साक्षादभिहितम्, उभयथापि युक्तत्वात्।

ननु सूत्रधारानुमत्या कथमन्येषां नटानां दुष्यन्ताद्यनुकरणे-प्रवृत्तिप्रसङ्गः। मैवं, सूत्रधारस्यानुमत्यैव तेषामियं प्रवृत्तिः। ते खलु पूर्वमेवानेनात्रेदं नाट्यमस्माभिः प्रयोक्तव्यम्, एवमार्यमिश्राणां नियोगः, तत्र पुनरस्य भूमिका त्वया ग्राह्या अस्यामुनास्य त्वयास्यास्त्वयेत्यादिकं प्रबोधिता वर्तन्ते। अन्यथा 'अय्यमिस्सेहिं[2] पढमं एव्व आगत्तं अहिण्णाणसउंदलं णाम अपुव्वणाडअप्पओएण अलंकरीअदुत्ति' इति कथनमनुपपन्नं स्यात्। तथा 'प्रतिपात्रमाधीयतां यत्नः' इति च न युज्यते। पूर्वमेव च तैस्सकलानि नाटकानि सम्यगागमितानि च भवन्ति। तेषु पुनर्विशेषमात्रमेव तत्र तत्र परिषदा तदनुशिष्टसूत्रधारेण वा नाट्यादय आवेद्यन्ते। अत एवोक्तं विक्रमोर्वशीये— 'तदहमद्य विक्रमोर्वशीयं नाम नाटकं प्रयोक्ष्ये, तदुच्यतां पात्रवर्गः स्वेषु स्वेषु पात्रेषु पाठ्येष्वसंमूढैर्भवितव्यमिति'। तथा मालविकाग्निमित्रे च—'अभिहितोऽस्मि परिषदा कालिदासग्रथितवस्तु मालविकाग्निमित्रं नाम नाटकमस्मिन् वसन्तोत्सवे

१. Ms. गच्छेदागच्छेत् पात्रमन्तिके.
२. Ms. अय्यपुत्तेहिं पुढम.

प्रयोक्तव्यमिति, तदारभ्यतां सङ्गीतकम्' इति । ननु यदि सूत्रधारानुमत्या तत्सहायनटानामेवं प्रतिपत्तिः तत्कथं क्वचित् प्रस्तुतनाट्यप्रथमभूतपात्रप्रवेशोद्यतानामेषां नैपथ्यवाक्यश्रवणे सूत्रधारस्य 'किमिदं वचनम्' इति संशयो जायते । तथा विक्रमोर्वशीये- 'किन्नु खलु विज्ञापनानन्तरमार्तानां कुररीणामिवाकाशे स्वरयोगः श्रूयते' इति । तदेतन्न युक्तम् । अयं स्वयं खलु प्रयोक्तव्ये अस्मिन् विक्रमोर्वशीये प्रथममप्सरःपात्रप्रवेशः कर्तव्यः, स च त्वया च कर्तव्यः, तत्रैवमाकाशवचनमिति स्ववर्ग्यान् न्ययुङ्क्तेति, तथा '[विचिन्त्य] भवतु ज्ञातम्' इति च न युक्तम् । उच्यते- अत्र विज्ञापने परिषत्परितोषमुखेन प्रस्तुतविस्मरणम् । विज्ञापनात् प्राक् तेन विस्मरणं येन नैपथ्यवचने संशयः स्यात् । स्वप्नवासवदत्तायां 'एवमार्यमिश्रान् विज्ञापयामि । अये किन्नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग, पश्यामि । [नैपथ्ये] उस्सरह अय्या' इत्युच्यते । अत्र खलु विस्मरणस्य कारणं विज्ञापनव्यग्र(ता) इति साक्षादुक्तम् । कीदृगिदं विज्ञापनमिति चेत् उच्यते 'भोस्सभासदः साम्प्रतमहं स्वप्नवासवदत्ता नाम नाटकं प्रयोक्ष्ये । तदवधानदानेनानुगृह्यताम्' इति । कथं ज्ञायत इति चेत् उपपत्त्या ज्ञायते । न खलु नान्द्यन्ते प्रविष्टः प्रस्तावकः मङ्गलश्लोकानन्तरमार्यमिश्रानन्यद्विज्ञापयेत् । ईदृशविज्ञापनप्रकार एव 'एवमार्यमिश्रान् विज्ञापयामि' इत्यत्रैवंशब्देन परामृष्टः । अथ किमिति सन्देहानन्तरनिर्णये जाते तद्विज्ञापनं न क्रियते इति । एवं न क्रियते । स्वयं वचनेन ज्ञापयितव्योऽर्थः स्वकीयैः प्रयोगेणोपक्रान्त इति । अत एव अतिचरितार्थ(त)या सूत्रधारस्य निष्क्रमणम् । अयं नयोऽन्यत्राप्यनुसन्धेयः ।

नन्विदानीं प्रयुयुंक्षितस्य रूपकस्य पूर्वमेवाधिगमे सर्वमेतदुपपद्यते । अनधिगमे तु कथम् । तथाहि आश्चर्यचूडामणिनाटकं प्रयोगप्रसङ्गात् प्राङ् नन्द्यादिभिर्नाधिगतम् । अवगतं चेत् 'अच्चाइदं खु एदं, आआसं पसव(इ) पुप्फं, सिअदाओ तेल्लं उप्पादअंति, जइ दक्खिणाओ दिसाओ आअदं णाडअणिबन्धणं' इति नटीवचनं न स्यात् । कविरपि न ज्ञायते

यतः 'कदमो सो कई' इत्यादि पुनर्नटीप्रश्नवचनम् । ततस्तत्र सहायनटै-र्लक्ष्मणानुकरणोद्यतैः क्रियमाणस्य नेपथ्यज्याघोषस्य नोपपत्तिः, किं पुन-स्तच्छ्रवणादेः । उच्यते - नट्यादिभिः पूर्वमेवावगतमिदं नाटकं, किन्तु दक्षिणदेशो विद्वज्जनदरिद्र इति विततां लोकप्रसिद्धिमवलम्ब्य सहसा नट्येवमाह । अन्यथा 'उपचिनु गुणम्' इत्यादिसूत्रधारवचनेन झटित्ये-तन्नाटकगुणदर्शनं नट्या कृतं न सम्भवति । दृष्टाश्च गुणा नट्या । अत एव 'कदमो सो कई अत्तणो पञ्चारूवं णिबंधणव्वाजेण देसंतरं पसिदुकामो' इति तस्या जिज्ञासा । किञ्च 'त्वमपि पत्रावधानं कुरुष्व' इति कथनेनापि ज्ञायते पूर्वमेवावगतमिदं नाटकमिति । पूर्वमवगतस्वरूपक्रमपाठ्यादि-ष्विदानीमवधाननियोगो घटते नानवगतस्वरूपादिषु । तस्मात् पारि-पार्श्विकादीनां सूत्रधारसहायानामेवं प्रवृत्तिरुपपन्नेति स्थितम् । अत्रैतत्सर्वं नाट्यन्यायादेवं भवतीत्येतदेवालमिति ।

'एष राजे'त्येतत् पात्रसूचनम् । तदुक्तं—

'सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ।'

इति । नन्वेष राजेति मुख्यदुष्यन्तोऽपि कथ्येत, अनुकर्त्रनुकार्ययोः लोके क्वचित्समानकालत्वदर्शनात् । नाट्ये च क्वचित्सूत्रधारानुकार्ययोः समानकालदेशत्वमुपपद्यते यथा चारुदत्ते । तत्र हि उपवासपारणानिरत-नटीप्रार्थनया सूत्रधार आमन्त्रणनिमन्त्रणार्थं कश्चित् ब्राह्मणं विचिन्वन् साक्षाच्चारुदत्तस्य वयस्यं मैत्रेयं दृष्ट्वा उपसृत्य निमन्त्रितवान् । तत् कथं भिन्नदेशकालत्वे घटताम् । न खल्वत्र वयस्यब्राह्मणभूमिकां गृहीतवान् कश्चिन्नटः सूत्रधारेणोपसृतः, तस्मिन् मुख्यब्राह्मणविषयनिमन्त्रणा-सम्भवात् । न च निमन्त्रणमनुकरणं भवितुमर्हति, सूत्रधारादेः प्रस्तावना-प्रवृत्तस्य प्रवृत्तेः मुख्यत्वात् । तथा अप्यनुकार्यत्वे अयं सूत्रधारो-ऽनुकर्ता स्यात् । ततः प्रस्तावनाया एव नाट्यत्वमापतेत्, अस्तमियाच्च प्रस्तावना । तस्मान्मुख्यमैत्रेय एवात्र मैत्रेयः । एवं दुष्यन्तोऽपि मुख्यः

1. Ms. इत्यादि न पुनः.

स्यात्। अत्राभिधीयते– इहानुकार्याणामतीतत्वमनु(क)र्तॄणां वर्तमानत्वं च प्रज्ञातम्। क्वचिदनुकार्याणां वर्तमानत्वमस्ति चेदस्तु; तत् पुनरत्यल्पत्वान्न समाकल्प्यते। समकालतायामपि तेषामतीतत्वमेवाभिसन्धातव्यम्, अन्यथा चमत्काराभावात्। किञ्च यदीह सूत्रधारेण मुख्यो राजा दृश्यते तर्हि नाट्यं विरमेत्। सूत्रधारो हि गृहीतनेपथ्यं नैपथ्यशालाया निर्गच्छन्तं ध्रुवासूचितं रङ्गप्रवेशाभिमुखमवश्यं पश्यति। तथा दृश्यमानस्स मुख्यश्चेत् प्रत्यक्षैव तदवस्थेति किमर्थमिदं प्रतिनिधिभूतमनुकरणात्मकं नाट्यं परिगृह्यते। परिगृह्यते चेत् मुख्यानुकर्तैव दृश्यते न मुख्य इति कथमत्र एष इति मुख्यदुष्यन्तकथनं सम्पद्यताम्।

किञ्च सूत्रधारस्य नट्यादिभिस्सह सम्भाषणं युक्तम्, स्वसहायत्वात्, नानुकर्तृभिः, तेषां तु क्वचिद् दर्शनमात्रं युक्त, समीपप्राप्तत्वात्; सम्भाषणं पुनर्न सम्भवति स्वासहायत्वात्। अनुकार्यैः सह सम्भाषणस्य दर्शनस्य वा का कथा, अतीततया तदानीमविद्यमानत्वात्। एवं स्थिते चारुदत्ते यस्य दर्शनमेव न सम्भवति तं साक्षान्नायकवयस्यं ब्राह्मणं दृष्ट्वा निमन्त्रितवान् सूत्रधार इति कथनं कथमिति न विद्मः।

ननु दूतघटोत्कचे स्थापनायां सूत्रधार आह—

"यान्त्यर्जुनप्रत्यभियानभीता यतोऽर्जुनस्तां दिशमीक्षमाणाः
नराधिपाः स्वानि निवेशनानि सौभद्रबाणाङ्कितनष्टसंज्ञाः॥"

इति। एतद्वचनं तदवस्थान्नराधिपान् दृष्ट्वा न घटते। एते मुख्याः स्युर्नानुकर्तारः, तेषां प्रवेशादर्शनात्। उच्यते– एतान् साक्षाद् दृष्ट्वा नैतद्वचनम्। तर्हि किं तदनुकर्तॄन् दृष्ट्वा? तदा खल्वसाक्षाद् दर्शनम्। एतदपि न। तर्हि कथं दर्शनम्। उच्यते– समतीतमितिवृत्तं शृण्वतां कथयतां स्मरतां च तत्र तत्र प्रत्यक्षाभिमानो जायते। तदत्र

१. Ms. gives the alternative reading 'अथ'
२. Ms. यातोऽर्जुनस्तां दिशमीक्षमाणः.

सूत्रधारस्य 'निवेद्यतां निवेद्यताम्' इति नैपथ्यभाषितं श्रुत्वा एतद्दूत-घटोत्कचमेवमस्मदीयैः प्रयोक्तुमारभ्यत इति जानतोऽपि तच्चिरातिक्रान्त-मभिमन्युवधादिकं अनुस्मरणवशादनुभूयमानमभूत् । अत एते नरा-धिपाः अर्जुनाद् भीता धावन्तीत्युक्तिः । तथा वेणीसंहारे च चिरातीतं दूतम् । दूतधुरया स्वगृहानागतस्य भगवतः श्रीकृष्णस्य सम्माननाव्यग्रेण विदुरेण प्रेक्षणकप्रयोगाय नियुक्तं शैलूषवर्गं कविभावसम्पादितमनुस्मरणवै-भवात् प्रत्यक्षमिव पश्यतो नैपथ्यनिर्गतपारिपार्श्विकस्य सूत्रधारं प्रति तादृशप्रयोगार्थं 'त्वर्यतां त्वर्यताम्' इति वचनम् । सूत्रधारोऽपि तथा-विधं वृत्तान्तमाकर्ण्य तत्पश्यन्निव तदानीन्तनम्मन्यतया

'निर्वाणवैरदहनाः प्रशमादरीणाम्'

इत्याशंसावचनमकरोत् । अन्यथा का नामेदानीमेवंकारं प्रार्थनाप्राप्तिः । पाण्डवा हि शत्रून् जित्वा ननन्दुः, धार्तराष्ट्रा युद्धे विपन्नाः, तत् सर्व-मतिपुरातनम् । अत एव चैतत् श्रुत्वा अनुकर्तुर्भीमस्य क्षोभोऽभूत् । 'लाक्षागृहानलविषान्न' इत्यादिवचनं चोत्थितम् । नन्वनुकार्यस्यापि वृत्त-मनुकर्तुर्न भवितुमर्हति, इतरथा कथमनुकरणम् । न चानुकार्यस्य साक्षाद् भीमस्य सूत्रधारोक्तमेतद्वचनं निशम्य कोपो बभूव । तदा कथमेतदनुकर्तुर्जायेत । सत्यं, किन्तु अनुकार्यवृत्तमप्यविरुद्धं भावपोषकं च क्वचिदनुकर्तुर्भविष्यति नाट्यन्यायात् । प्रबोधचन्द्रोदयेऽपि सूत्रधारस्य वचनं 'विवेकेनेव निर्जित्य' इत्यादिकं निशम्य कुपितस्य 'आः पाप शैलू-षाधम' इत्यादि कर्तुर्भाषणम् । एवं चेहानुभावयमानेन स्मरणे(न) 'यान्त्यर्जुने'त्यादि वचनमुपपन्नम्, न मुख्यदर्शनेन । चारुदत्ते त्वयं नयो न क्रमते इत्युक्तम् ।

ननु 'तवास्मि गीतरागेणे'त्यत्र अहं गीतरागेण हृतः, एष इत्येत-द्विधेयतयोक्तमुपमेयत्वाद्, अन्यत्तूपमानत्वादनुवाद्यम् । सिद्धं ह्युपमानं भवति । अतस्तदनन्तरमभिज्ञानशकुन्तलप्रयोगेण परिषदमाराधयामः इति वक्तव्यम् । अन्यथा न नाटकेन परिषदुपस्थातव्या, गीतहृतत्वात् ।

प्रयोक्तव्यमिदानीं विस्मृतवानयं निष्क्रान्त इति का वा सङ्गतिः । उच्यते— शाकुन्तलप्रयोगेण परिषदमाराधयाम इति यदुक्तव्यं तत् क्रियैवोक्तम् । 'एष राजेव दुष्यन्तस्सारङ्गेणातिरंहसा' इति स्वप्रयोगक्रिया कथिता । स्वकीयजनप्रयोगोऽपि स्वप्रयोग एव भवति । निष्क्रान्तपदग्रहणस्य घटना वक्ष्यते । तस्मादत्र विस्मृतं शाकुन्तलमिदानीं स्मृतं, अतस्तस्य प्रयोगं कुर्मः । स चैवं प्रक्रान्तो मदनेनासिप्रभृतिना । तद्वयमपि अनन्तरकरणीयाय सज्जीभवामः इति वाक्यार्थः सम्पद्यते । कथम् , इह तावत् 'तवास्मि गीतरागेण' इति वाक्येन विस्मृतः कारणं खल्वभिधीयते । विस्मृतिश्च संवादनरूपस्य कारणतया कथिता । स्मृतिर्हि विस्मृतिपूर्विका । ततः स्मृतमद शाकुन्तलं प्रयोक्तव्यं इत्यनुवादाल्लभ्यते । ततस्तत्प्रयोगं कुर्म इति चार्थात्सिध्यति, प्रयोगार्थनटीमम ह्वानादिप्रवृत्तेः । तत्र प्रथमभूतदुष्यन्तयुतपात्रप्रवेशस्य शिष्यादिना विधीयमानत्वात् तत्पृष्ठपातिवैखानसशकुन्तलादिपात्रप्रवेशोऽनन्तरकरणीयः । तदर्थं सज्जाभवति निष्क्रम्य वर्णिकापरिग्रहादिना । अतस्सर्वमुपपन्नम् । यत् पुनरुपमानत्वाद्राजवृत्तस्यानुवाद्यत्वमाशङ्कितम् तदप्रयोजकम् । अत्र खलु सूचनमेव प्रयोजकत्वेनोच्यते, न विधेयत्वम् । सूच्यमानं पुनरनुवाद्यं वा भवतु विधेयं वा भवतु, नात्र कश्चिदाग्रहः; सूचनमेव कर्तव्यम् । अत एवोक्तम्—

'सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ।'

इति । तथा चैवं सूचितस्य राज्ञः प्रवेशो वक्ष्यते ।

सूत्रधारेण सूचितानां राज्ञां दूतघटोत्कचे अप्रवेशो नोपपन्नः । ननु कथं बहूनां राज्ञां युगपत् प्रवेशः, तदा 'ततः प्रविशति वानरशतम्' इतिवद् विलम्बनं स्यात् । 'पात्रैस्त्रिचतुरैरङ्कः' इति बहुपात्रसूचनं न

१. Ms. प्रयोगन्तमह.
२. Ms. विधीयमानानत्वात्.
३. Ms. भवन्ति.
४. Ms. कश्चाग्रहः

नारदः — (विचिन्त्य) भवतु[1] विज्ञातम् । तदेतद् युद्धं युद्धमिति[2] तूर्णमाकर्ण्य समरभ्रमोद्घूर्णनतिरस्कृत[3]महार्णवप्रवाहं सन्नद्धं[4] मगधराज-सैन्यमित एवाभिवर्तते ।

कृष्णः — (पुरोऽवलोक्य) अहो प्रागल्भ्यं बृहद्रथसुतवरूथिनी-मण्डलस्य । यतः,

सम्मूर्च्छत्समदचमूमतङ्गजानां
क्ष्माचक्रं चरणभरेण दूरनम्रम् ।
उद्वोढुं कथमपि[5] दिग्गजाः क्षमन्ते
व्याभुग्नोन्नमदुरुकन्धरैः शिरोभिः ॥ ८१ ॥

अर्जुनः — (ससम्भ्रमम्) वयस्य वासुदेव ! किमावयोरायुध-ग्रहणवेला वर्तते ।

कृष्णः — न हि द्वन्द्वयुद्धसीमानभिज्ञो[6] जरासन्धः ।

नारदः — एवमेतत् । न युगान्तमन्तरेण दहति दिनकरो जगन्ति ।

(नैपथ्ये)

किं किं स्यन्दनडम्बरेण रथिनः ! स्थेम्नाऽलम् आधोरणाः !
दूरे सीदत सादिनः ! किमिह वः सम्पत्तयः पत्तयः ! ।

सर्वे — साधु जरासन्ध ! साधु । सत्यसन्धः खल्वसि ।

---

१. 'भवतु तावत् जातं तदेव' ख.
२. 'युद्धमिति तूर्णं' क.
३. 'उद्घूर्ण तिरस्कृत' क.
४. 'सन्नद्धमगध' क.
५. 'कथमिव' ख.
६. 'युद्धप्रकारसीमा' ख.

(पुनर्नैपथ्ये)

एकः स्तोकपराक्रमो रिपुरयं हन्तव्यतां गतः
प्रोत्क्षेप्तुं स्वभुजावपीह मम धिग् गीला समुन्मीलति ॥ ८२ ॥

सर्वे — अहो! मगधराजस्याज्ञायां समग्रं सङ्ग्रामसाधनमपि चित्रनिर्मितमिव निष्पन्दयोधवृन्दमवतिष्ठते।

(पुनरन्यतोऽपि नैपथ्ये)

राजन्! मागध! मा गमः सरभसं कालानलग्रासतां
मुञ्च क्षोणिपतीन् पुटीकुरु करौ किञ्चित् किरीटोपरि।
तस्मै त्वं कुरुजाङ्गलाधिपतये यो जाङ्गलीकायते
त्रातुं भीमभुजाभुजङ्गममुखात् तान् धार्तराष्ट्रानपि ॥ ८३ ॥

सर्वे — साधु वृकोदर! साधु। युक्तमजातशत्रुमेदुर्यस्य तवेदं व्याहृतम्।

(नैपथ्ये)

रे रे! दुर्वचनमुखर! मूर्ख! कुरुकुलपांसन! दुराचारनिशाचरीकामुक! क्षुद्रनक्षत्रपिशाचदमन! दुर्ललितसुयोधनविधेयक! भूर्भुवःस्वस्त्रयीविजयिनं जगमन्धमपीतरलोकसाधारणं कलयसि। तदेष प्रहन्यसे।

अर्जुनः — हन्त! परस्पराधिक्षेपदीपितकोपानलाकलितचेतसोः पुरःप्रसारितबाहुपरिघयोरन्योन्यस्थानकनिविष्टनिर्निमेषचक्षुषं रार्यजरासन्ध-

१. 'हंहो मागध' ख.
२. 'तान्' क.
३. 'अपि नरलोक' ख.
४. 'प्रहन्यते' ख.

योर्निष्प्रतिबन्धः समरसंरम्भः संवृत्तः । तद्वयमप्यार्यस्याशिष्टतात्ये समराङ्कणनिकटवर्तिनो भवामः । यतः,

स्वहस्तसाध्येऽपि जनस्य कर्मणि
प्रहर्षहेतुः सुहृदां समागमः ।
लघूकरोत्याशु निदाघमुल्बणं
समीरणो लब्धपवित्रधूननः ॥ ८४ ॥

सर्वे — तथा । (इति परिक्रामन्ति ।)

कृष्णः — (पुरो निर्दिश्य) अहो नु खल्वनयोरनियतजयपराजयमखिललोकविस्मापनमनुज्झितमल्लयुद्धसमयमाचेष्टितम् । तथाहि —

निर्धूतदन्तदलनं नितरां निरस्त-
केशग्रहं नखविलेखनमार्गशून्यम् ।
घोणाभिघातविमुखं रहिताक्षिरोधं
चित्रं प्रवृत्तमुभयोर्भयदं नियुद्धम् ॥ ८५ ॥

अर्जुनः — एवमेतत् । तथाह्यनयोः

आकर्षणभ्रमणचारविकर्षणानि
संरोधनिष्क्रमणरक्षणवञ्चनानि ।
[1]संव्यूहनोद्वहनवेष्टनवेल्लनानि
सम्मोहयन्ति नयनैः सह मानसं नः ॥ ८६ ॥

नारदः — (विलोक्य सहर्षम्) दिष्ट्या साम्प्रतमवन्ध्यः संवृत्तः प्रजापतेरस्मन्नयननिर्माणयत्नः । यदनयोरस्मदग्रत एव,

निबिडगरुडपक्षा[2]क्षेपवित्रस्तलोकं
कलितधवलशङ्खं प्रस्फुरच्चापयष्टि ।

1. 'संव्यूहनोपहनवेष्टन' क.
2. 'पक्षं' ख.

घटितकमलकेलि स्तम्भितक्ष्माभृदुच्चै-
श्चरितमिव मुरारेः शोभते[1] मल्लयुद्धम् ॥ ८७ ॥

शिष्यः —(क) भो पेक्खह[2] पेक्खह । सअलगिरिकडयप्फोडयपडिसद्दणिद्दअप्फालिअमण्डलं णीसंगसमंगीकअबहुमग्गवग्गणं गलगुहाणिरुद्धसंदंसद्दणिसंदअं अण्णोण्णदंसिअसिलोघडिज्जमाणपाडिमोडिसोप्पकरवलच्चयुद्धाणअप्पाडिहाणअभिमज्जमाणविण्णाणविसेसअं अण्णोण्णवंचणाविह्माविदसअललोअं उब्भडगरुडपक्खपरवसोणामिअमत्थअं वेसणीवेल्लणणिरुद्धपडिमल्लभुअमण्डलं सकुडुम्बढोक्करविण्णाणणिप्पडिअहत्थमत्थआपेडणं णी[3]रन्धसंदंसिअबाहुपीडणं ढोक्कराढत्तवुप्पकच्छाअड्ढणं कक्खपडपरिवेसज्जिदपादभंजणं कुम्मरीकप्पिदसव्वंगपीडणं चहुसीविण्णाणं मुणिअबाहुमोडणं गुणालविण्णाणघडिदअंघाणाहिमंडलं णिरुद्धपडिवक्खभुअसंधिमत्थअं उत्तरढोक्करविरयारिदकन्धरापरिपीडणं धवलसंखपरिकप्पिदेक्कपादभञ्जणं पविसिअपट्टिसजज्जरिदवेरिवच्छत्थलं पुरिसमत्थंडविण्णाणवच्छलिचित्तमोहणं झत्ति जुद्धं पवट्टइ जरासन्धभीमसेणाणम् ।

(क) भोः पश्यत पश्यत । सकलगिरिकटकास्फोटितप्रतिशब्दनिर्दयास्फालितमण्डलं निःसङ्गसमङ्गीकृतबहुमार्गवल्गनं गलगुहानिरुद्धसदंशध्वनिसन्ततं ....? अन्योन्यवञ्चनाविस्मापितसकललोकं उद्भटगरुडपक्षपरवशोन्नामितमस्तकं वेसनीवेल्लननिरुद्धप्रतिमल्लभुजमण्डलं ....? नीरन्ध्रसन्दर्शितबाहुपीडनं ....? कक्षपटपरिवेषार्जितपादभञ्जनं ....? निरुद्धप्रतिपक्षभुजसन्धिमस्तकं ....? धवलशङ्खपरिकल्पितैकपादभञ्जनं प्रवेशितपट्टिशजर्जरितवैरिवक्षःस्थलं ....? झटिति युद्धं प्रवर्तते जरासन्धभीमसेनयोः ।

---

१. 'शोभितं' ख.
२. 'पेक्खह सअल' ख.
३. 'णिरत्थकदसिसअणा' ख.

नारदः — यथाभिहितं वत्सेन ।

रुद्रस्य द्विरदासुरेण मरुतां पत्युर्महेन्द्रद्विषा[1]
संफेटाः[2] सह कैटभेन च हरेर्ये सम्प्रवृत्ताः पुरा ।
साक्षी तेष्वयमेव नारदमुनिः किश्चान्यथा मन्यते
तान् सर्वान् मगधेन्द्रमारुतिमहासङ्ग्रामविस्मापितः ॥ ८८ ॥

अर्जुनः — अहो संविमर्दोन्मदिष्णुता[3] मगधराजस्य ।

नोत्तीर्णा बकराक्षसेन न पुनः सोढा हिडिम्बेन ये
शल्येनापि विरोधिमण्डलमनःशल्येन नो लङ्घिताः ।
तानार्यस्य तरस्विनः प्रतिमुहुः प्रीत्या प्रतीच्छत्ययं
क्रोधाक्रान्तकृतान्तपाशसदृशान् दोर्यन्त्रबन्धानमून् ॥ ८९ ॥

कृष्णः — अहो समरसम्भ्रमस्यातिभूमिः ।

युद्धदुन्दुभिनिध्वाननिर्भरीकृतकन्दराः ।
अमी जगत्त्रयं क्षुब्धं भर्त्सयन्तीव भूधराः ॥ ९० ॥

शिष्यः — (क) भो पेक्खह पेक्खह । एदाणं मल्लसंगामसंभमेण पअण्डा विअ तरंगलंघिअगगणंगणा घोलंति दंसिअभुवणविणाससुद्दा (समुद्दा) । सिढिलमूलबन्धसंभमोपसंगग्गभग्गसिहरगलंतगंडसेलुच्चआ समुच्चलंति सेलुच्चआ । उब्भन्तबंभंडसंरंभसिढिलसमीरण-

---

(क) भोः पश्यत पश्यत । एतयोर्मल्लसङ्ग्रामसम्भ्रमेण प्रचण्डा इव तरङ्गलङ्घितगगनाङ्गणा घूर्णन्ति दर्शितभुवनविनाशमुद्राः (समुद्राः) । शिथिलमूलबन्धसम्भ्रमप्रसङ्गाग्रभग्नशिखरगलद्गण्डशैलोच्चयाः समुच्चलन्ति शै-

---

1. 'द्विषां' ख.
2. 'संक्षोभाः सह' ख.
3. 'संमर्दोन्मदि' ख.

क्कंतधगलंतरिक्खं होइ अन्तरिक्खम् । घुव्वन्तभुवमंडलणिवेसम-घोलमाणविमाणकोडिताडिदसुमेरुसिहरो दंसिदपलओपसग्गो वलइ सग्गो । णमन्तचउरंतधरणिमण्डलुद्धरणजज्ज(रि)दकुम्भपब्भारणिब्भरा विब्भलंति सअलदिसागआ । भज्जंतभुवणभारणिस्सहणिस्सेससीसणि-वेसो समुत्तंमयि जणिदादंकविसेसो सेसो । ता मण्णे सव्वहा कप्पि-दविकप्पावसाणं कप्पावसाणं वट्टइ त्ति ।

नारदः — अहो अवगतकार्यपर्यन्तानामपि सम्भ्रमेषु मानसं मुह्यति । यदमुष्य भगवतः पद्मासनस्यात्यन्यैव प्रश्नं चरक्रमो वर्तते । तथाहि —

क्व एष ननु सम्भ्रमः त्रिभुवनं भिनत्तीव भो
  [1]नियुद्धमिदमुद्धतं ननु तयोर्महावीरयोः ।
कुतोऽथ जगतां शमः श्रयति मामधेऽन्त्यां दशां
  ब्रवीति बहुधेत्यहो मुखचतुष्टयी ब्रह्मणः ॥ ९१ ॥

अपि च,

पौलस्त्योत्तालहेलातरलभुजबलान्दोलितस्यानुवेलं
  कैलासस्यानुकारं कुलगिरिपतयः सर्वतो बिभ्रतीमे ।

लोच्चया: । उद्भ्रान्तब्रह्माण्डसंरम्भशिथिलसमीरणाक्रान्तधगला(?)न्तरिक्षं भवत्यन्तरिक्षम् । घुन्वद्भुवमण्डलनिवेशघूर्णमानविमानकोटिताडितसुमेरुशिखरो दर्शितप्रलयोपसर्गो वलति सर्गः । नमच्चतुरन्तधरणिमण्डलोद्धरणजर्जरित-कुम्भप्राग्भारनिर्भरा विह्वलन्ति सकलदिशागजाः । भज्यमानभुवनभारनि-स्सहनिःशेषशीर्षनिवेशः समुत्ताम्यति जनितातङ्कविशेषः शेषः । तस्मान्मन्ये सर्वथा कल्पितविकल्पावसानं कल्पावसानं वर्तत इति ।

---

1. 'खलु' ख.

किञ्च प्रोद्भ्राम्यमानः[1] परिकुपितमहामल्लसङ्ग्रामवेगै-
रन्तर्दीप्तौर्वतापादिव लुठति हठात् क्षोणिपृष्ठे पयोधिः ॥ ९२ ॥

कृष्णः — एवमेतत् । यथाह पद्मयोनिपद्मनाभकलहसम्भवो (?) भगवान् ।

वीरव्यापारभारादनियतनमितोन्नामितैकैकपार्श्व-
क्ष्माचक्राक्रान्तिदूरव्यपगमतरलोत्तालतोयोत्कराणाम् ।
डोलासङ्ग्रामकेलिः परिणमति मिथस्तूर्णमेषां चतुर्णां
गूढक्रोधावगाढस्तिमितगिरिगणोद्गारिणां वारिधीनाम् ॥ ९३ ॥

अपि च,

स्कन्धे निक्षिप्य नम्रां भुवमनुभवतः खेदविच्छेदमीष-
च्छेषस्याशेषवक्त्रैरपि समसमयोद्गीर्णनिश्वासकीर्णाः ।
उद्दामा धूमसङ्घाः सपदि पिदधते सप्तपातालगर्भान्
किञ्चोदञ्चन्ति वेगोच्चलदचलमहीमूलबन्धोरुरन्ध्रैः ॥ ९४ ॥

अर्जुनः — एवमेतत् । यथाह यमलार्जुनोत्पातमारुतः । सम्प्रति हि —

व्योम्नः क्रोडात् प्रतीपं लगति दिनपतेः स्यन्दनः पूर्वशैले
त्रस्यत्स्वर्दन्तिपृष्ठाच्छ्रयति सहचरं वाजिनं वज्रपाणिः ।
किञ्चान्य दिग्वधूः करतलकलितैरञ्चलांशुकानां
नित्योत्पक्ष्माणि चक्षूंष्यपिदधति समित्सम्भ्रमोद्यद्भ्रमीणि ॥ ९५ ॥

अपि च,

---

1. 'किञ्चित्प्रो' ख.
2. 'महान्' ख.
3. 'क्रोडावगाढ' ख..
4. 'उद्भूता' ख.

विक्रान्त्युत्कर्षहर्षाद् गगनचरगणैर्मागधस्योपरिष्टात्
पौष्पी वृष्टिर्निसृष्टा किल वलनवशात् तूर्णमार्यस्य मूर्ध्नि ।
यावत् संपातलीलां[1] जनयति विजयी तावदेष प्रवृत्तः
शौर्यश्लाघोद्यतानां स्वयमनिपुणतादोषमेषां प्रमार्ष्टि ॥ ९६ ॥

शिष्यः—(क) भो पेक्खह । णं एस मागहो सरोससमरभीमणो भीमसेणेण णिट्ठुरणिट्ठाविदकलहहत्थथोरहत्थप्पहारजज्जारिदसन्धिबन्धं जुज्झिय महाभुअङ्गो व्व गरुलेण, चाणूरमल्लो व्व महुमहणेण, जलन्धरासुरो व्व कालकन्धरेण, दहमुहो व्व हेहअज्जुणेण ससंभमं सगाहिदो । तक्खणं च होइ व्व हरिसुप्फुल्लणेत्तो सहस्सणेत्तो, सम्मदवियम्भमाणहासलंछियकवोलो पोलत्थो, पसरंतभिउडितडप्पभञ्जणो पभंजणो, तुवरन्तकरग्गलग्गपाससंजमो जमो, मउलंतकन्दोट्टकन्तिणेत्तो तिणेत्तो । गलिअगव्वा व्व दाणवा । गज्जिअं च पज्जत्तपलअपज्जण्णणिग्घादघोसगम्भीरभीसणं पडिरवभरिअबह्मंडोदरं विओदरेण ।

(कृष्णार्जुनौ हर्षं नाटयतः ।)

(क) भोः पश्यत । नन्वेष मागधः सरोषसमरभीषणो भीमसेनेन निष्ठुरनिष्ठापितकलभहस्तस्थूलहस्तप्रहारजर्जरितसन्धिबन्धं युद्ध्वा महाभुजङ्ग इव गरुडेन, चाणूरमल्ल इव मधुमथनेन, जलन्धरासुर इव कालकन्धरेण, दशमुख इव हैहयार्जुनेन ससंभ्रमं सङ्गृहीतः । तत्क्षणं च भवतीव हर्षोत्फुल्लनेत्रः सहस्रनेत्रः, सम्मदविजृम्भमाणहासलाञ्छितकपोलः पौलस्त्यः, प्रसरद्भ्रुकुटितटप्रभञ्जनः प्रभञ्जनः, त्वरमाणकराग्रलग्नपाशसंयमो यमः, मुकुलायमानेन्दीवरकान्तिनेत्रस्त्रिनेत्रः । गलितगर्वा इव दानवाः । गर्जितं च पर्याप्तप्रलयपर्जन्यनिर्घातघोषगम्भीरभीषणं प्रतिरवभरितब्रह्माण्डोदरं वृकोदरेण ।

---

१. 'संवादलीलां' ख.

नारदः —(सविशेषमालोक्य) ह ह ह,

घोरोद्गारश्वसनविसरच्छोणिताम्भःकणाना-
मासारेण क्षणमरुणयन्नन्तरिक्षस्य कुक्षिम् ।
बाह्यायन्त्रप्रगुणघटनोत्पिष्टपृष्ठास्थिभङ्ग-
ध्वानत्रस्यत्त्रिभुवनमरिर्भीमसेनेन भग्नः ॥ ९७ ।

कृष्णः — [2](विलोक्य) भगवन् ! न[3] खलु भग्नः; किन्तु भग्नोऽयमस्माकं मनोरथः । यतः,

जीवितापायपर्यन्तं भङ्क्त्वा भीमेन भूतले ।
एष क्षिप्तोऽपि सुप्त्वेव प्रत्यर्थी पुनरुत्थितः ॥ ९८ ॥

अर्जुनः —(सखेदम्) अहो अद्भुतम् । यतः,

वीर्यादार्येण भग्नोऽपि पुनरुत्थाय युध्यति ।
(सहर्षम्) भग्नः पुनरयं दिष्ट्या (सानुतापम्) धिगेष पुनरुत्थितः ॥ ९९ ॥

नारदः —

भोश्चित्रं जगति ममापि चक्षुषोः प्रा-
गीदृक्षः समरविधिः परोक्षभूतः ।

कृष्णः —धिङ्माया किमियमसौ कथं मयि स्यात् ।

अर्जुनः — किं तावत् प्रभवति नान्तकोऽप्यमुष्मै ॥ १०० ॥

---

१. 'प्रगुणनघनोत्पिष्ट-' ख.
२. '(विलोक्य)' इति कपाठे न.
३. 'न खलु न खलु भग्न. शत्रुः' ख.

(सर्वे चिन्तां नाटयन्ति ।)

(नेपथ्ये)

नैतैर्यत्नैस्त्वया शक्यो हन्तुं द्वैमातुरो नृपः ।
तस्मादसारादारम्भान्निवर्तस्व वृकोदर ! ॥ १०१ ॥

(सर्वे आकर्णयन्ति ।)

कृष्णः — काले खलु साभिप्रायेयमशरीरभारती समुच्चरति ।

शिष्यः —(क) अम्मो सच्चन्दकारित्तणं पभंजणतणअस्स । जं इदाणीं समरणिव्वत्तणप्पवुत्तं असरीरसरस्सई आअण्णअन्तो वि महाराअं जंघासु गेह्णिय सरभसं च गअणगणे समंदोलिअ धरणिपिट्ठे गाढमप्फालदि ।

कृष्णः — साधु वृकोदर ! साधु । अशरीरवाचोऽभिप्राय कर्मणा विवृणोषि । यतः, नैतैर्यत्नैः(त्वया) शक्य इति यत्नान्तरशक्यत्वमभिहितम् । द्वैमातुरशब्देन च द्वेधा विदारणमेव पुनरुपदिष्टम् ।

नारदः — वत्स ! न केवलमेवास्फालयति । किन्तु,

(क) अहो स्वच्छन्दकारित्वं प्रभञ्जनतनयस्य । यदिदानीं समरनिर्वर्तनप्रवृत्तामशरीरसरस्वतीमाकर्णयन्नपि महाराजं जङ्घयोर्गृहीत्वा सरभसं च गगनाङ्गणे समान्दोल्य धरणिपृष्ठे गाढमास्फालयति ।

---

१. 'त्वया शक्य' इति खपाठे न.

मङ्क्षु क्षिप्त्वाग्रकायं क्षितितलफलके सव्यमाक्रम्य पद्भ्यां
जङ्घाकाण्डं द्वितीयं सरलकरिकराकारमुत्क्षिप्य दोर्भ्याम् ।
अन्तर्डोला(यितान्त्रा)वलिबहलगलत्फेनिलासृक्प्रवाहं
त्रुट्यत्पृष्ठास्थिपीठस्फुटितपटुरवं पाटयत्येष शत्रुम् ॥ १०२ ॥

अर्जुनः — अहो अद्भुतान्तरमिदं च वर्तते ।
आर्येणाजौ मगधनृपतेर्दारितस्योदरान्तात्
सद्यो विद्युन्निभमभिनभो जृम्भते ज्योतिरेतत् ।
तच्चोदारं त्रिदशपुरुषाकारमङ्गीकरोति
स्वर्गस्त्रीभिस्तदनु गमितः सोऽपि वैमानिकत्वम् ॥ १०३ ॥

(सर्वे विस्मिताः ।)

नारदः — ननु प्रसिद्धोऽयं वादः ।

प्रतिक्रिया पातकसन्ततीना-
माकल्पमिष्टा यशसः प्रतिष्ठा ।
आब्रह्मलोकं त्रिदिवस्य पन्था
राज्ञां रणे यत् प्रतिशत्रु मृत्युः ॥ १०४ ॥

शिष्यः — (क) भो एदाओ दाव हदो हदो मागहो त्ति सुणिअ सरअणदपुलिणमंडलादो व्व पसा(रिआ) सलिलसंघ.(द ! दा) पच्चूसविसदणहकुहरादो व्व पयोसतिमिरवित्थारा महावराहदढं(ड ! ठा)समु-

(क) भो एतास्तावत् हतो हतो मागध इति श्रुत्वा सरयनदपुलिनमण्डलादिव प्रसारिताः सलिलसङ्घाताः प्रत्यूषविशदनभःकुहरादिव प्रदोषतिमिर-

१. 'बहुलगलं फेनि' ख.
२. 'निभमपि नभो' ख.
३. 'तच्चोदारात्रिदश' ख.
४. 'यशसां' ख.

क्खिप्पमाणमेदिणीपेढादो व्व पलअजलधिकल्लोला झत्ति समरंगणपरि-सरादो विअंभमाणभीमसेणभअविब्भला पलाअन्ति मगहराअध-जिणीओ ।

नारदः — ननु युक्तमेतत् । स्वामिसाराः सैनिका इति ।

कृष्णः — न खलु नखरप्रहारदारितमदकरिणि केसरिणि जृम्भमाणे गिरिकटकनिकटभाजो भवन्ति कलभयूथाः ।

(नेपथ्ये)

भो भो भीताः शृणुत मगधक्षोणिभृद्दण्डनाथाः
संत्रस्यन्तो दिशि दिशि बलान्यञ्जसा विद्रवन्ति ।
विद्विट्शब्दग्रहणविमुखश्रोत्रमार्गो निसर्गा-
दार्तत्राणप्रणयिहृदयो नन्वहं भीमसेनः ॥ १०५ ॥

अर्जुनः — वयस्य ! पश्य पश्य । नन्वेष मगधराजभुजपरि-घपरिघट्टनमृदितमेदुरांसमण्डलो विपुलफालभित्तिगलितघर्मवारिशीकरः कठोरकरमकन्धराकेसरसदृशसमरधूलिधूसरितपृष्ठपीठो निकचबन्धुजीव-कुसुमसदृशशस्त्रक्षतलेखालाञ्छितशरीरो माङ्गलिकमृदङ्गनिध्वानगम्भीर-भारतीसमाश्वासितसकलारिसैनिकः सविनयमात्मानमेवाभिवर्तते ।

(ततः प्रविशति यथानिर्दिष्टो भीमसेनः ।)

(सर्वे पश्यन्ति ।)

भीमसेनः — (जरासन्धमनुसन्धाय स्वगतम्)

विस्तारा महावराहदृढदंष्ट्रासमुत्क्षिप्यमाणमेदिनीपृष्ठादिव प्रलयजलधिकल्लोला झटिति समराङ्गणपरिसराद् विजृम्भमाणभीमसेनभयविह्वलाः पलायन्ते मगधराजध्वजिन्यः ।

नेदृशं पौरुषं क्वापि दृष्टपूर्वं तथाप्यसौ ।
पातितो धर्मराजस्य भागधेयेन मागधः ॥ १०६ ॥

(उपसृत्य) भगवन्! देवर्षे! एष वृकोदरो वन्दते ।

नारदः — भद्र[1]! एवमेव सकलारातिकालाग्निरुद्रो भव ।

भीमः — अनुगृहीतोऽस्मि ।

कृष्णः — वयस्य! वायुनन्दन[2]! इत इतो भवान् । एष निर्भरं परिरब्धुमिच्छामि । (इति गाढं परिष्वज्य) साधु समर्थितं यत् त्वया गुरुतरेत्यादि प्रतिश्रुतम् ।

भीमः — नन्वेषा भवतो भक्तानुग्रहसामग्री । किमत्र मया समर्थितम् ।

अर्जुनः — दिष्ट्या समुत्तीर्णप्रतिज्ञार्णवमार्यं पश्यामि ।

कृष्णः — वयस्य धनञ्जय! ईदृग्विधभ्रातृजनभुजबलेन निर्वर्तितराजसूयं धर्मराजं च कृतार्थं द्रक्ष्यसि ।

भीमार्जुनौ — ननु[3] कृतार्थाः सर्व एव वयम् ।

यः स्मर्तॄणां दोग्धि निर्वाणमग्र्यं
ब्रह्मस्तम्भं यः स्वधाम्ना बिभर्ति ।
कल्याणानां कारणं शार्ङ्गपाणे!
स त्वं मित्रं वर्तसे देव! येषाम् ॥ १०७ ॥

भीमः — अनुजानन्तु मां भवन्तः कर्तव्यशेषनिर्वर्तनाय ।

---

१. 'भद्र' इति खपाठे न.
२. 'पाण्डुनन्दन' ख.
३. 'ननु' इति खपाठे न.

सर्वे — किमवशिष्टम्[1] ।

भीमः — ननु क्षत्रियाणां मोक्षणम् ।

सर्वे — एवमिदम् ।

(नैपथ्ये)

हा तात! सकलभुवनैकवल्लभ! हा प्रत्यक्षीकृतखण्डपरशुप्रसादगर्वित! हा कामपालप्रहारलीलालम्पट! हा निखिलभूपालसंहारसवनदीक्षित! हा त्यागलीलापहसित[2]शिबिदधीचिवैरोचनिचरित्र! हा सकलार्थिसार्थसङ्कल्पकल्पपादप! कां गतिं कालेन नीतोऽसि ।

(सर्वे आकर्णयन्ति ।)

नारदः — (विलोक्य) एष पितृमरणशोकविह्वलहृदयो वृद्धेनामात्येनाश्वास्यमानो मगधराजकुमार इत एवाभिवर्तते ।

शिष्यः — (क) जो सहदेवो त्ति सुणीअदि ।

कृष्णः — अहो शोकातुरोऽपि मधुरदर्शनः कुमारः ।

अर्जुनः — सर्वथैष भाजनं राजलक्ष्म्याः ।

भीमः — नन्वासन्नलोकान्तरे मरीचिमालिनि प्रकाशलक्ष्मीर्विभावसुमभिसरति ।

(ततः प्रविशति सामात्यः सहदेवः ।)

सहदेवः — (हा तातेत्यादि पठित्वा)

रुधिराम्बुकर्दमितपांसुमण्डले
समराङ्कणे व्रणितकीर्णविग्रहम् ।

(क) यः सहदेव इति श्रूयते ।

---

१. 'किं शिष्टम्' ख.
२. 'अपहासित' ख.

अपि पश्यतो मम भवन्तमग्रतो
हृदयं न विश्वसिति तात! ते वधम् ॥ १०८ ॥

अमात्यः — कुमार! अलमतिपरिदेवनदैन्येन[1] ।

सहदेवः — (अनाकर्ण्य साश्रुपातम्)

प्राणास्तृणानि वपुषि प्रणयैः परस्ताद्
वीरस्य ते भवतु निस्स्पृहता च राज्ये ।
मामङ्कलालितमनाथमपोह्य बालं
लोकान्तरं कथय तात! कथं गतोऽसि ॥ १०९ ॥

(इति मूर्च्छति ।)

(सर्वे करुणं नाटयन्ति ।)

अमात्यः — कुमार! समाश्वसिहि समाश्वसिहि ।

(सहदेवः पुनस्तदेव पठति ।)

अमात्यः — नन्वशोच्यस्ते[2] वीरधर्मोचितां गतिं गतो जनकः । तदिदानीं त्वमपि कालोचितं प्रतिपद्यस्व ।

सहदेवः — का प्रतिपत्तिरितः[3] परम् ।

अमात्यः — नन्ववगतषाड्गुण्यतत्त्वो[4] भवान् । किमत्र मां पृच्छति ।

सहदेवः — नाहं शोकातुरः किमपि वेत्तुं प्रगल्भः ।

---

१. 'परिवादन' ख.
२. 'कुमार नन्वशो' ख.
३. 'अतः परम्' ख
४. 'ननु' इति खपाठे न.

अमात्यः — ननु कुमार, साम्प्रतं पाण्डवेषु संश्रयमेव श्रेयसे समर्थयामि ।

सहदेवः — शास्त्रदृष्टमार्यो ब्रवीति । किन्तु[1] अकृतपितृवधप्रतीकारोऽहमत्र जिह्रेमि ।

अमात्यः — मा मैवम् । धर्मविजयिनो[2] हि वैरभाजनं न भवन्ति । तदेतान् गृहागतानुचितेनैवोपतिष्ठस्व ।

सहदेवः — यद्येवं[3] किमेषां प्राभृतमुपहरामि ।

अमात्यः — य एष ते पितुः साङ्ग्रामिको रथवरः स तावदेषां चरणसञ्चारिणां प्रयाणौपयिकः[4] कल्प्यताम् ।

सहदेवः — बाढम् ।

(उभौ परिक्रामतः[5] ।)

अमात्यः — (तान् प्रति) एष प्रसादपात्रं मगधराजकुमारो युष्मानुपस्थितः ।

सर्वे — इत इतः ।

सहदेवः — (उपसृत्य) देवर्षे ! नमस्ते ।

नारदः — पितुरनवमो बाहुशाली[6] भव ।

सहदेवः — (पृष्ठतोऽवलोक्य) सूत ! इत इतः ।

(सूतो रथमुपनयति ।)

---

१. 'किञ्च अकृत' क.
२. 'विजयिनोऽपि' क.
३. 'यद्येषां प्राभृतमुपहरामि' क.
४. 'औपयिकं' क.
५. '(इति परिक्रामतः)' ख.
६. 'बाहुषाली' क.

सहदेवः — (सर्वानवलोक्य)

वासवाद्वसुमस्माच्च बृहद्रथमतः परम् ।
पितरं मे गतः सोऽयं स्यन्दनः प्रतिगृह्यताम् ॥ ११० ॥

(इति रथमर्पयित्वा प्रणमति ।)

सर्वे — (रथं प्रतिगृह्य कुमारमुत्थाप्य) एवमेव धर्मराजानुवृत्ति-निपुणो राजश्रियः परिणायको भव ।

सहदेवः — अनुगृह्यतामयं मित्रजनो नियोगदानेन

कृष्णः —

पाण्डवात् सहदेवात् त्वमभिन्नोऽस्माभिरीक्ष्यसे ।
तदेष प्रेष्यसे बन्धान्मुच्यन्तां मेदिनीभृतः ॥ १११ ॥

सहदेवः — (अमात्यं प्रति) अनुष्ठीयतां नियोगः ।

अमात्यः — यदभिरुचितं भवद्भ्यः ।

सर्वे — सहदेव! त्वमपि पित्रे कृतयथोचितकृत्यः सिंहासन-मशून्यं कुरु ।

(सहदेवस्तूष्णीमधोमुखस्तिष्ठति ।)

भीमार्जुनौ — कुमार! अलं वैक्लब्येन । सर्वथाजातशत्रोर्मित्रमसि ।

सहदेवः — तथा । (इति सामात्यो निष्क्रान्तः ।)

नारदः — कमलासनोपस्थानसमयो मां त्वरयति । तद् भवन्तोऽप्येतेन रथेन धर्मराजमुपतिष्ठन्तु ।

---

१. 'रथेन जयिनं धर्मं' ख.

सर्वे — यदादिशति शतानन्दसम्भवः । (इति प्रणम्य) भगवन्! पुनरप्ययमेवमेव स्मर्तव्यः शिष्यवर्गः ।

(नेपथ्ये)

जयति भुवनरक्षादीक्षितः शार्ङ्गपाणि-
र्जयति [1]विजयकीर्त्तिः पौरवो राजवर्यः ।

नारदः — एषा नभश्चरैर्गीयते भवतां भोगावलिः ।

(नेपथ्ये)

एष वृद्धो महामात्यो विज्ञापयति—

अपगतनिगलानां साम्प्रतं भूमिपानां
स्वसदनमभिगन्तुं दीयतामभ्यनुज्ञा ॥ ११२ ॥

सर्वे — [2]यथासुखं गच्छन्तु ।

नारदः — किं वो भूयः प्रियमुपकरोमि ।

सर्वे — किमतः परमुपकर्तव्यमस्ति ।

यन्निर्व्योढा कुरुपरिवृढः साम्प्रतं सप्ततन्तुं
यच्चास्माभिर्न्यवधि मगधग्रामणीः सङ्गराग्रे ।
यच्चेदानीमवनिपतयः स्वस्तिमन्तः समस्ता-
स्तत् किं ब्रूमो भवदुपगमानुग्रहो ह्यत्र हेतुः ॥ ११३ ॥

तथापीदमस्तु —

---

१. 'विशदकीर्तिः' ख.
२. '(सहर्षं) यथा' ख. ।

(भरतवाक्यम्)

वंशोदग्रे गुणिनि रमतां रत्नगर्भा नरेन्द्रे
शश्वच्छम्भोश्चरणकमले भक्तिमानस्तु लोकः ।
सार्धं मित्रैरविरतरसान् स्वादयन्तः कवीनां
वाणीगुम्फान् सततगुणिनः सज्जनाः सन्तु कामम् ॥ ११४ ॥

[इति निष्क्रान्ताः सर्वे ।]

भीमपराक्रमं नाम नाटकं समाप्तम् ।

॥ पार्वतीपरमेश्वराभ्यां नमः ॥

। शुभमस्तु ।

श्लोकानुक्रमणी

ŚRĪRĀMAPAÑCAŚATĪ

OF

RĀMAPĀRAŚAVA

WITH

THE COMMENTARY OF RĀMA

AND

THE ṬIPPAṆĪ OF

PUNNAŚŚERI NĪLAKAṆṬHA ŚARMA



EDITED BY

DR. P. K. NARAYANA PILLAI, M. A., PH. D.

CURATOR,

THE UNIVERSITY MANUSCRIPTS LIBRARY,

TRIVANDRUM

PRINTED AT THE S. V. G. PRESS, TRIVANDRUM.

1951

INTRODUCTION

The *Śrīrāmapañcaśati* is a *stotra* work in fifty decades[1] dealing with the Rāmāyana story. The author Rāma Pāraśava was a devotee of Sangameśa, the deity of the temple at Iriññālakkuta,[2] and the prayers are addressed to that deity. This temple is a very ancient one and was built by Nampūtiris[3]. Kūtalmānikya[4] is the Malayalam name of the temple. *Kūṭal* means *saṅgama* and hence the Sanskrit name *Saṅgama* for the temple[5].

The only deity installed in the temple is Bharata as he stays at Nandigrāma waiting for the return of Rāma. Since Bharata lived more or less like an ascetic at Nandigrāma, Brāhmana women do not worship in the temple.

Eventhough the deity installed in the temple is

1. In certain sections more than ten stanzas are met with.

2. A small town in Cochin.

3. See *Rāmapañcaśatī*:
द्विजवरैः कुलीविन्यास्तीरे निजकुलविभूत्यै प्रणिहितः (XLIX. 1)

4. There is a traditional story which explains this name:

   Once a King of the Kāyamkulam Royal family went to worship in the temple and a diamond that was with the King was forcibly drawn to the image by the divine power there. Hence the name *Kūtalmānikya* meaning the place where the diamond has joined the deity. Following this the King demanded that one among his subjects should be in charge of the temple and he nominated one Taccutaya Kaimal. He took charge of the temple affairs and this office was inherited by his descendants. The person who is in charge of the temple affairs is expected to be a celebate and he is invested with special privileges.

5. Another derivation of the name is given by the commentator, viz., श्रीमतां शुकनारदादीनां सङ्गमो मेलनं यत्र तत्. (see infra, p. 111)

Bharata, the author magnifies him and addresses his prayers to him as if he is Rāma, the incarnation of Viṣṇu. In the opening stanza the author says –

.... श्रीवासुदेवः स्वयं
श्रीमत्सङ्गममन्दिरे विहरते श्रेयःप्रदायी नृणाम् ।

Throughout the work the deity is seen taken for Lord Rāma. It may be noted that Rāma is not installed in the temple even as an *upadevatā*[6]. The only explanation for this is that the author has identified Bharata with Rāma. In other words, he has assumed that the deity at *Saṅgama* is Rāma in Bharata's garb. The author has more or less expressed this in the following stanza:

निर्निद्रान् विधिषु भवद्र्तान् द्विजेन्द्रान्
नन्दिग्रामत इह भार्गवोपहूतान् ।
त्वं तादृग्भरतवपुर्धिनोषि सोऽस्म-
त्सन्तापं व्यपनय सङ्गमाख्येश ॥ (XIII. 10)

Here the poet characterises Rāma as भरतवपुः (in the garb of Bharata). Further he seems to suggest the reason for this. As Bharata protected the Brahmins at Nandigrāma, it is in the fitness of things that he should continue to protect them on their being brought to Saṅgama by Paraśurāma[7].

6. The nearest temple dedicated to Rāma is at Tṛprayār, a place at a distance of about six miles from Iriññālakkuta.

7. It is traditionally believed that Paraśurāma brought Brāhmaṇās to Kerala from Nandigrāma. (See XIII. 10 quoted above.) See also:

परीक्षित्काले खल्विह परशुरामेण मुनिना
परीक्ष्यानीता ये परसुखचिदानन्दरसिका. ।
द्विचत्वारिंशत्ते द्विजवरगृहस्थाग्निकरणी-
विशुद्धाः सेवन्ते नतिनुतिषु सक्तास्तव पदम् ॥ (XLIX. 4)

Rāmapañcaśatī and Nārāyaṇīya.

It is beyond doubt that it was the *Nārāyaṇīya* of Melputtūr Nārāyana Bhaṭṭa that inspired Rāma Pāraśava to write *Rāmapañcaśatī.* The author got not only inspiration but a model as well from the *Nārāyaṇīya* A comparative study of these two works will reveal this fact.

1. Nārāyaṇa Bhatta, a great devotee of Lord Kṛṣṇa installed in the Guruvāyūr temple, dealt with the *Bhāgavata* story in the *Nārāyaṇīya* and addressed his prayers to that deity, while Rāma Pāraśava, a devotee of Rāma, dealt with the *Rāmāyaṇa* story in the *Rāmapañcaśatī* and addressed his prayers to the deity in the Saṅgama temple[8].

2. Like the *Nārāyaṇīya* the *Rāmapañcaśatī* also is divided into decades (*daśaka*s). In both of them some sections contain more than ten stanzas.

3. From a textual point of view also there is much resemblance between these two works.

(i) The opening stanza in the *Rāmapañcaśatī* shows definite signs of the influence of the opening stanza in the *Nārāyaṇīya.* They may be compared:

सान्द्रानन्दावबोधात्मकमनुपमितं कालदेशावधिभ्यां
निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम् ।
अस्पष्टं दृष्टमात्रे पुनरुरुपुरुषार्थात्मकं ब्रह्म तत्त्वं
तत्तावद्भाति साक्षाद् गुरुपवनपुरे हन्त भाग्यं जनानाम् ॥

(Nārāyaṇīya)

आनन्दोदयहेतुरिन्दुदृषदामिन्दुर्मुनीनां धिया-
मावृन्दारकमापिपीलिकमिह स्वकसूत्रनीत्या स्थितः ।

8. In *Nārāyaṇīya* every stanza is directly addressed to Kṛṣṇa while this rule is not observed in the *Rāmapañcaśatī.*

श्रीवत्साद्भुतकौस्तुभोज्ज्वलवपुः श्रीवासुदेवः स्वयं
श्रीमत्सङ्गममन्दिरे विहरते श्रेयःप्रदायी नृणाम् ॥
(Śrīrāmapañcaśatī)

(ii) In the second decade of the *Nārāyaṇīya*, Nārāyaṇa Bhaṭṭa has described the Lord in three stanzas. This is seen imitated at the beginning of the *Rāmapañcaśatī*.

(iii) Many expressions that show similarity with *Nārāyaṇīya* may be picked up from the *Rāmapañcaśatī*. For example:

केयूराङ्गदकङ्कणोत्तममहारत्नाङ्गुलीयाङ्कित-
श्रीमद्बाहुचतुष्कसङ्गतगदाशङ्खारिपङ्केरुहाम् ।
काञ्चित्काञ्चनकाञ्चिलाञ्छितलसत्पीताम्बरालम्बिनी-
मालम्बे विमलाम्बुजद्युतिपदां मूर्तिं तवार्तिच्छिदम् ॥
(Nārāyaṇīya, II. 2)

केयूरद्युतिकङ्कणावलिमहोरत्नाङ्गुलीयत्विषा-
मायू रक्तनखात्मना किल धृतं सद्द्राघिमस्थेमया ।
तानावासितलालिताहतगदाचक्राक्षमालादरा-
नाराध्याहमवाप्नुवानि चतुरो बाहून् पुमर्थानपि ॥
(Śrīrāmapañcaśatī, I. 6)

4. Throughout *Nārāyaṇīya* we meet with prayers for relief from illness[9]. Even though not to this extent, *Rāmapañcaśatī* also contains such prayers[10].

5. While *Nārāyaṇīya* concludes with a *keśādipāda*, the 50th decade in *Rāmapañcaśatī* is a *pādādikeśa*.

9. It is believed that Nārāyaṇa Bhaṭṭa wrote his work while he was suffering from acute rheumatism and taht he got relief as he completed the stotra

10. See *Rāmapañcaśatī*, II. 4; XII. 10; XIII. 10, XXX. 12. etc.

6. Nārāyaṇa Bhaṭṭa has stated that his work deserves the name *Nārāyaṇīya* in two ways (द्वेधा नारायणीयं) due either to the nature of the theme or the name of the author. The same is the case with *Rāmapañcaśatī also.*

Eventhough modelled on the *Nārāyaṇīya*, *Rāmapañcaśatī* as a stotra cannot claim parity with its model which is remarkable for the exuberance of emotional sentiment. And consequently it has not been very popular either among scholars or among devotees.

A literary estimate of the work.

A perusal of the work will clearly bear out the fact that eventhough the *Rāmapañcaśatī* is composed in the form of a stotra, its author has taken care to lend the beauty and dignity of a *Kāvya* to it. And he has succeeded to a great extent. From the literary point of view the work, beyond all doubts, is of a high order. The author who attempted to summarise in about 550 stanzas *Vālmīki-Rāmayaṇa* which contains 24000 stanzas, is really under a great handicap. In his anxiety to cover the theme in the minimum space possible, he would naturally have curbed the display of his poetic imagination. Yet it has got to be admitted that in the course of summarising, the author has succeeded in embellishing his work with poetic beauty and linguistic flourish.

The style of *Rāmapañcaśatī* is neither simple nor facile. It is rather rugged in character but it reflects the scholarship of the author in general and his proficiency in Vyākarana in particular. The rare words and usages met with in the work will tempt one to believe that the author was a great scholar who wanted to display his scholarship. The following will illustrate the point:

1. प्रियतिसा (IV. 1). The word means one who has three beloveds– प्रियास्तिस्रो यस्य सः (See Pāṇini– त्रिचतुरोस्त्रियां तिसृचतसृ VII, ii 99),

2. ययुषः (V. 2).

3. श्रोत्रियत्राकृतम् (X. 1). The use of the suffix त्रा may be noted here (See Pāṇini- देये त्रा च. V. iv. 59).

4. अभिजग्मितुमनाः (XVI. 8).

5. अतृणुत (XIX. 6). The root of this rarely used verb is तृण् meaning 'to eat'.

6. आर (XIX. 7). The root of this verbal form is ऋ 'to go',

7. शिवतातिः (XX. 8) The suffix ताति meaning 'one that does' is not very common in Classical Sanskrit (See Pāṇini- शिवशमरिष्टस्य करे. IV. iv. 143)

8. परुत्परार्य्यपि पुनरैषमश्च. (XXIV. 2 (See Pāṇini – सद्यःपरुत्परार्यैषमः etc. V. iii. 22).

9. प्रतिघभरः (XXIV. 2) प्रतिघ is only very rarely used in the sense of anger.

10. धाराळाश्रुः (XXX. 2). धाराळ is not very common in Sanskrit, but in Malayalam it is used very often in the sense of 'much'.

11. अधरबिम्बी (XXX. 7).

12. क्षोणीसून्वै कोमलसून्वै (XXX. 8). Feminine forms derived by suffixing ऊङ् are not very common.

13. विपाठम् (XXXV. 9). A large arrow.

14. कुर्दनम् (XLVIII. 3). The word meaning 'play' is only very rarely used

15. सुस्मूर्षे (XLIX. 11). स्मर्तुमिच्छामि.

The author, though a scholar in grammar as borne out by the above usages, has occasionally used expressions which are not quite consistant with Pāṇini's grammatical rules. e.g.,

1. श्रवणत्वगक्षिरसनाघ्राणानि (I. 8). According to Pāṇini

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (II. iv. 2), the dvandva compound should be singular.

2. सुभ्रु (XVI. 7) This vocative should end in the long vowel (सुभ्रूः) according to grammar.

3. सुमित्राख्या एताः (III. 9). Here the words could have been joined according to sandhi rules.

Inspite of this general tendency to be scholarly and rugged in style, stanzas which could be marked out for facility of expression and poetic ideas are not at all rare in this poem. A few instances are given below:

व्रीलारागातिरेकव्यतिकरवरलीभूतया भाग्यभूम-
 न्नालीनां चाटुभेदैर्निशि निशि निकटं नीतया सीतया त्वम् ।
नालिकेषोर्जिगीषोरभिमतसरणिं गौरवेणानुरुन्धन्
 केलीगेहे च लीलावनभुवि च समं रेमिषे रामचन्द्र ॥

(X. 2)

प्रियतम दृश्यतां प्रचुरोज्ज्वलसुवर्णमयो
 वनहरिणार्भको वहति कामपि मोहनताम् ।
चकितमितस्ततश्चरति धावति संविशति
 भ्रमति मिलत्यहो मम च कृत्रिमपुत्रमृगैः ॥

(XIX. 2)

तत्र विस्तृतगवाक्षमाश्रितं
 त्वामवेक्ष्य भरतोऽभ्यवन्दत ।
उत्स्मिताननममैम सीतया
 विद्युता घनमिवाशु चातकः ॥

(XLVI. 2)

Rāma Pāraśava who was engaged in summarising the long story of *Rāmāyana* naturally could not have had the ease of mind essential for indulging in poetic fancy. Yet we get very often in this work glimpses of his

high imagination. The poet describes that as Rāma followed Viśvāmitra to the forest, the women of Ayodhyā sprinkled *lāja* (fried grain) over him and he fancies whether these are the seeds of the creeper of Rāma's fame. Here is the description:

प्रतिकलवलितास्यं प्रेक्षमाणं मुनीन्द्रं
सविनयमनुयान्तं त्वां रुदा पौरनार्यः ।
ववृषुरुपरि सौधव्रातवातायनस्थाः
किमु रघुवर लाजैः कीर्तिवल्या नु बीजैः ॥

(VI. 4)

The author has used certain impressive similies which have no parallel in the original *Rāmāyana*. A few of them are given below:

1. In describing the Kūrmāvatāra the poet compares the Manthara mount with a devotee of the Lord struggling in the *saṁsāra*.

स्वभक्तं संसारादिव विषसुधावेधकलुषात्
समुद्धर्तुं मग्नं धरणिधरमेकं जलनिधेः ।

(II. 2 ab)

2. The following passage will show that the author could invent similies successively without any effort:

कृतचारुजटो घनैः कचैर्घृतहोमो ध्वशिखामिवज्ज्वलन् ।
जहदश्रुदृशं ससोदरो गुहमापृच्छ्य सुमन्त्रमप्यगाः ॥

प्रियया परिशुद्धभावया श्रियमाणाभ्युदयोऽथ सानुजः ।
प्रयतो विबुधापगां नृपश्रियमन्यामिव पृष्ठतोऽकरोः ॥

स्वपरत्वतमोपनुत्तये स भरद्वाजमुनिस्त्वयाश्रितः ।
शफरध्वजदुर्गदुर्गभूरुपरक्तेन बुधो यथेन्दुना ॥

(XI. 4-6)

The comparison between Rāma with *jaṭa* and fire with flashing flames is simple but at the same time suggestive of the *tejas* in Rāma. The simile in which Bharadvāja is compared to Budha and Rāma to the moon in eclipse is based ont he belief राहुदोषं बुधो हन्यात् and it is very appropriate as Bharadvāja is a Budha (scholar) and Rāma has been depleted of his royal glory. The name Rāmacandra for Rāma also enhances the naturalness of the simile.

3. The fact that Bharata met Rāma in Nandigrāma is depicted in a striking manner with the help of a simile which is of deep philosophical significance. Bharata meeting Rāma is compared to an insane person regaining his own mind. The passage runs:

उन्मत्तः स्वधियमिवाभ्यगाद् भवन्तम् (XII. 3)

4. Through a simile, the poet brings out the ridiculousness of Sūrpaṇakhā's courting of Rāma. The demoness is compared to a female dog that approaches a lion with gestures of love. The poet says:

त्वामभजत शूर्पणखा शुनीव सिंहम् (XVI. 4)

This has no parallel in Vālmiki, but a similar simile occurs in the Āraṇyakāṇḍa. Repudiating the overtures of Rāvaṇa, Sītā says that his desire to get her as his wife is like that of a fox that wishds to marry a lioness. The following is the relevant passage:

त्वं पुनर्जम्बुकः सिंहीं मामिहेच्छसि दुर्लभाम्
(Āraṇyakāṇḍa, XLVII. 37)

5. Being denounced by Sītā it is said that Rāvaṇa looked at her like a serpent looking at a female ichneumon and like a whale at a fish. The passage runs:

..................स तामहि-
र्नकुलीं तिमिश्च शकुलीमिवैक्षत । (XX. 9.)

6. The glowing terms in which Rāma was referred to by Sītā took the wind out of Rāvaṇa's sail. The poet characterises her words in the following stanza as sunshine that causes tender plants to wither out.

अयि तावकीनदयिताभिकस्य त-
न्मुखनिस्सृतेति सुखमस्य शृण्वतः ।
श्रवसामभूच्च तव सादरा कथा
दिवसप्रभेव नवसस्यसम्पदाम् ॥ (XX. 10)

7. In the course of the battle between Rāma and Rāvaṇa at Lankā, Kumbhakarṇa directed a spear with great force towards Sugrīva, the king of the monkeys. The poet says that at that moment Hanumān caught hold of that spear half-way and broke it to pieces as Garuḍa would smash a snake. The passage under reference is—

पत्ये शाखामृगाणां प्रहितमभिपतत्प्रेक्ष्य रूक्षं स शूलं
मध्ये गृह्णन् हनूमानहिमिव गरुडो निर्बभञ्जेक्षुभञ्जम् ।
(XLI. 2)

The simile in the expression इक्षुभञ्जं may also be noted. This seems to be a local simile as here in Kerala it is very often used.

Indirect way of expressing ideas (वक्रोक्तिः) is a striking feature of the style adopted by Rāmapāraśava. This may be illustrated with a few instances.

1. Describing the devotee of the Lord at Saṅgama the poet says that he (the devotee) will not have to drink the mother's breast-milk for a second time, thereby meaning that he will not have to take birth again as he would attain salvation:

धन्योऽसौ मनुजः कदापि न पुनः स्तन्यं जनन्याः पिबेत् (I. 2)

2. Hanumān returned from Laṅkā after meeting Sītā and made Rāma happy by presenting to him her *cūḍā-ratna* and conveying to him her message of love. But how did Rāma's mind react to this? The poet says—

...............ते मनसि विश्रवसो
व्यतनोत्सुतत्वमपि वैश्रवणे । (XXXIV. 6)

i. e., Rāma had made up his mind to confer the glory of being the son of Viśravas on Vaiśravaṇa. This indirect expression amounts to saying that Rāma has decided to kill Rāvaṇa. The desire to destroy Rāvana on the part of Rāma is indirectly described in a different manner as follows:

मण्डोदरीं चकमिषे विधवां विधातुम् । (XLII. 2)

In a scholar and devotee like the author of *Rāma-pañcaśatī* one cannot expect any appreciable degree of the sense of humour. Moreover, even if the author had this sense in an abundant measure it could hardly have any scope in a *stotra* work like the present one. However, in the work humour is not conspicuous by its absence. A few instances are given below.

1. Aṅgada met Rāvaṇa in Laṅkā and asked him whether he would make peace with Rāma or fight against him. The conversation that ensued is described in a stanza which is full of satire and humour. It reads:

'कस्त्वं रे कपिभट', 'बालिनन्दनोऽहं'
'किं नाम', 'खलबलभञ्जदोऽङ्गदाख्यः ।'
'नाश्रौषं', 'परिचितिरास्ति नौ', 'क्व देशे'
'दोर्मूले मम हि पितुः सहोषितौ स्वः' ॥
(XXXVIII. 6)

Aṅgada's final reply that he had occasion to know Rāvaṇa when both of them were kept by Bālin under his arms will excite laughter in the reader. Bālin who vanquished Rāvaṇa was holding his son to fondle him while Rāvaṇa was being crushed by him under his arms. One could imagine in what a glory was Aṅgada there and in what a pitiable plight was Rāvana. The reference to that ignominious position of Rāvaṇa is sure to put him to shame, for so virulent is the element of satire in it. To read and imagine the same will certainly afford much humour.

2. Kumbhakarṇa was awakened by his elder brother Rāvaṇa to fight against Rāma. In the battle the limbs of Kumbhakarṇa were cut off and he began to struggle moving up and down. Then it is said that Rāma killed him by an arrow thinking that 'this man who is wo'nt to sleep throughout, was awakened by his elder brother for no purpose, and let him now go to sleep (for good)'. Rāma's words

स्वप्नग्वृथायं कथमपि गुरुणा बोधितोऽत्र स्वपतु (XLI. 3)

show that he faced Kumbhakarṇa's opposition with all ease and that he could be humorous even while destroying an enemy.

A great scholar that he was, Rāma Pārāśava could command words and expressions as he wished, and embellish his poem with verbal beauty. In fact one of the most, if not the most, striking features of the poem is the profuse employment of *prāsa* in all its possible verieties. Repetition of identical or similar sounds, similarity if not identity of the initial or the last letters in the pādas, *yamaka* and other types of *śabdālaṅkāras* are met with throughout the work, particularly so the द्वितीयाक्षर-प्रास.

(1) Repetition of the same or similar sounds.

(i) मञ्जुस्वर्णकिरीटमञ्जनशिलाभालीकचञ्चत्कचं
  किञ्जल्कोपमचिह्लिवल्लिवलनैर्व्यञ्जत्प्रपञ्चास्थितिम् ।
कञ्जान्तर्दलनेत्रमुल्लसमभिन्यञ्चन्मणीकुण्डलं
  सञ्जल्पामृतफेनपुञ्जहसितं सञ्चिन्तये ते मुखम् ॥
(I. 3)

(ii) शुम्भत्साम्भोजाम्भसं प्रेक्ष्य पम्पा-
  मम्भोजाक्षीविप्रलम्भात् सकम्पः ।
हं भोः स्तम्भस्वेदरोमाञ्चमूर्च्छा-
  जृम्भारम्भान् सम्भृतानन्वभूस्त्वम् ॥
(XXIII. 2)

(iii) गुञ्जद्धंसीमञ्जुनादप्रतिश्रु-
  त्पुञ्जं कुञ्जात्कुञ्जमभ्यञ्जसास्तः ।
अञ्चत्सीतामञ्जुमञ्जीरकाञ्ची-
  शिञ्जाशङ्की वञ्चितो वञ्चुलैस्त्वम् ॥
(XXIII. 3)

(2) *Prāsa* at the beginning of pādas.

आयान्तमाहूय सहोदरं दरा-
  न्मायान्ध्यजादीक्षितवानथो पथि ।
